Shri Raghunatha Te[mp]le MSS. Library,
JAMMU

No. १२३७ घ

Title द्रव्यसार संग्रहः

Author रघुदेव भट्टाचार्यः

Extent ३३१ पत्राणि Age सं. १८२८

Subject न्यायशास्त्रम्

द्रव्यसारसंग्रहः

१२३७

न्याय

सार संग्रह १०१

३३००

सा॰स श्रीगणेशाय नमः॥ श्रीरामाय नमः॥ श्रीसीतायै नमः॥ श्रीलक्ष्मणाय नमः॥ यन्नादात्म्यमुप
१ यात्स्वियोत्पादनापाद्द्वेहेहं गौराप्राग्राहा॥ विपदीयाङ्घ्रिद्वंद्वं जहा॥ अस्तु द्वामापारिमितगु
णग्राममशांतमाद्यं वंदे पद्मादमलमतिभिः प्राप्यते मोत्तलक्ष्माः॥१॥ रघुदेवकृतरम्यसार
संग्रहलोकैनैः संतश्चांतु निःशंकं सिद्धांतसिद्धवर्त्मसु २ अत्र सकलशिष्टैर्ग्रंथादौ मंग
लस्योपनिबद्धत्वादादौ मंगलफलं विचार्यते॥ अत्र केचिन्मंगलं समाप्तिफलकं समाप्त्य
न्याफलकत्वे सति सफलत्वादित्यनुमानान्मंगले समाप्तिफलकत्वसिद्धिरिति समाप्ति
रेव मंगलफलम्। न चोपदर्शितानुमाने हेतुविशेषणासिद्ध्या न किंचिदेतदिति वाच्यं।
मंगलं समाप्त्यन्याफलकं समाप्तिकामनया शिष्टैः कर्तव्यत्वादित्यनुमानान्मंगले समा राम
प्त्यन्याफलकत्वसिद्धोऽपदर्शितहेतुविशेषणासिद्ध्यभावात्। न च तन्यापि तत्र सफल १

त्वासिद्ध्यान्तदूरितहेत्वसिद्धिर्दुर्वारैवेतिवाच्यं॥ मंगलंसफलमविगानशिष्टाचारविषयत्वाद्
र्शवदित्यनुमानान्मंगलेसफलत्वसिद्धेः। अत्रशिष्टत्वंनतावद्वेदविहितानुष्ठातृत्वंवेदे
घातिव्याप्तेस्तेषामपिवेदबोधितनोर्थस्यानदैरनुष्ठानत्वात्। नचात्रवेदपदस्ययावद्वेदा
र्थकतयाअदोषइतिवाच्यं॥ असंभवापत्तेः। क्कापिशिष्टेयावद्वेदविहितानुष्ठातृत्वाभावा
त्। नचवेदनिषिद्धाननुष्ठातृत्वंशिष्टत्वमितिवाच्यं। अत्रापिवेदपदस्ययावत्किंचिद्वेदार्थक
त्वेहिंसाननुष्ठातृत्वेनबौद्धेष्वतिव्याप्तेः। यावद्वेदार्थकत्वेतुवशिष्ठेऽव्याप्तेः। वशिष्ठश्चाण्डा
लीमुपयेमइतिश्रुतितोवशिष्ठस्यचाण्डालीगमनप्रतिपादनेनवसिष्ठेयावद्वेदनिषिद्धाग
म्यागमनकर्तृत्वसत्त्वादितिचेन्न। वेदप्रामाण्याभ्युपगंतृत्वंशिष्टत्वमिति। शिष्टलक्षणेको
ऽपिनानुपपत्त्यभावात्। वेदप्रामाण्याभ्युपगंतृत्वंचानाहार्याप्रामाण्यज्ञानानास्कंदितवेदवि
शेष्यकप्रामाण्यप्रकारकनिश्चयवत्त्वं। अतोवौद्धआहार्यतयाविधनिश्चयमप्रामाण्य

सा॰सं॰ ॥१॥

त्तानात्मकेदितितथाविधनिश्चयं पं चादाय नातिव्याप्तिः। अथ यत्र तथाविधानिश्चयो विशे
षणामुपलक्षणं वा तादृशः सुषुप्तिदशायां पाशिष्टे अव्याप्तेः। नाद्यः बौद्ध अतिव्याप्तेः। अनादि
संसारे बौद्धानामपि कदाचित्तथाविधनिश्चयसत्वादिति चेन्न॥ अनाहार्याप्रामाण्यज्ञा
नानात्मकेदितथावेदविशेष्यकप्रामाण्यप्रकारकनिश्चयजन्यसंस्कारवत्वस्यैव विशिष्टलक्ष
णत्वात्॥ न चैवं सत्यपि बौद्धे अतिव्याप्तिः तत्र तथाविधसंस्कारवत्वस्य विशेषणता बौद्ध
नादृशाय्याम भावसत्वात्॥ तदा तथाविधसंस्कारस्य वेदानप्रामाण्यमिति विरोधिज्ञानेन न
ष्टत्वात्॥ न चैवं सति वेदानप्रमाणमिति निश्चयोत्पत्तिकाले बौद्धे न तथाविधसंस्कारसत्वेन शि
ष्टव्यवहारापत्तिरिति वाच्यं॥ संस्कारे विनश्यद्वस्थत्वविशेषणदानान्न न च तं तथापि शिष्टे वे
दाः प्रमाणमिति निश्चयकाले शिष्टव्यवहारानुपपत्तिर्दूषणैरैवेति वाच्यमिष्टत्वात्॥ तथावि
धनिश्चयजन्यसंस्कारान्यतरवत्वस्य तल्लक्षणत्वाद्वेति॥ ननु एतादृशशिष्टत्वस्योपदार्शे ॥ राम ॥१॥

नहेतोर्निर्विशेषणत्वात्॥ तदपेक्षयापार इष्टसाधनत्वांशे भ्रमभिन्नत्वरूपविशिष्टत्वस्यैवोपदर्शि
तहेतौ निवेशस्य सम्पत्त्वादिति चेन्न॥ इष्टत्वात्॥ अत्र अविगीतत्वबलवदनिष्टाननुबंधि
त्वं॥ अतो नाशिष्टकृतागम्यागमनादौ बलवदनिष्टाननुबंधीष्टसाधनत्वरूपसफलत्वसा
धकउपदर्शितानुमानव्यभिचार इति॥ तस्मादुपदर्शितानुमानात्सफलत्वसिद्धौ न किंचि
द्बाधकमिति॥ तत इष्टसाधनरूपसफलत्वसिद्धौ उपदर्शितपरिशेषानुमानात् मंगलस्य सम
प्तिफलकत्वसिद्धिरिति समाप्तिं प्रति मंगलं हेतुरिति॥ न च मंगलं विनापि नास्तिकादीनां
समाप्तिदर्शनात् व्यतिरेकव्यभिचारेण समाप्तिं प्रति न मंगलं हेतुरिति वाच्यं॥ तत्रापि ज
न्मान्तरीयमंगलकल्पनात्॥ न च तत्र समाप्त्या जन्मान्तरीयमंगलकल्पनातो व्यभिचारेणा
नाभावे सति समाप्तिमंगलयोः कार्यकारणभावग्रहे समाप्तिमंगलयोः कार्यकारणभा
वग्रहे सति अनुकूलतर्कसंपत्त्या अनुमानात् समाप्त्या तत्र जन्मान्तरीयमंगलकल्पने नास्ति

सा॰स॰ २ 3

स्पन्योन्याश्रय इति वाच्यं अनुमितिप्रतिसाध्यसंदेहस्याविरोधितया साध्यसंदेहपर्यवस
न्नव्यभिचारसंदेहस्य तन्नाशे घटनात् ॥ अविगीतशिष्टाचारानुमितसमाप्तिमंगलकार्यका
णभावग्राहकवेदेनैव तथाविधकार्यकारणभावग्रहे बाधकाभावाच्च ॥ शास्तृबुद्धिप्र
तिग्राह्यसंशयस्यापि योग्यतासंशयपर्यवसन्नतया नास्तिककृतग्रंथसमाप्तिस्थले मंगलसंदे
हेन व्यभिचारसंदेहेपि वेदानामप्रामाण्याविष्टस्य पूर्वोपसंभवात् ॥ तदाहुराचार्याः आगममूलत्वाच्चे
ष्टाचारस्य व्यभिचारो न दोषायेति ॥ न च कादंबर्यादौ मंगलसत्वे समाप्त्यभावात् अन्वयव्यभि
चारनिश्चयसत्वात् उपदर्शितरीत्यापि तथा कार्यकारणभावग्रहोऽ दुर्लभ इति वाच्यं
तोऽनुमानाद्यहृदाहृत्सांगमंगल एव समाप्तिजनकत्वं गृह्यते ॥ तत्र च नोक्तानुपपत्तिः कादं
बर्य्यादौ फलाभाविन सांगमंगलाभावस्य कल्पनायतया सांगमंगलसत्वे समाप्त्यनुसा
स्यान्वयव्यभिचारस्याभावादिति ॥ न च कश्चित्सांगमंगले विद्यमानेपि समाप्त्यदर्शनेनान्वे पत्र २

यव्यभिचारात्कार्य्यंप्रवेपदर्शितरीत्यातथाकार्य्यकारणभावग्रह इतिवाच्यं॥ नहित
त्सत्वेतज्जन्यफलानुत्पादएवान्वयव्यभिचारः॥ तथासतिसर्वत्रकार्य्यकारणभावलोपापत्तेः॥
अपितुतत्सत्वदशायांतादृशतत्सकलकारणसत्वेतज्जन्यफलानुत्पादएवान्वयव्यभिचारः॥
सचसांगमंगलेविद्यमानेपिसमाप्त्यनुत्पादेऽतत्रतत्प्रतिबंधकस्यविजातीयादृष्टस्यकल्प
नायाप्रतिबंधकाभावरूपमंगलेतरकारणसत्वात्॥ नचैवंसतिविजातीयादृष्टाभाव
रूपकारणेनसर्वत्रान्यथासिद्धंमंगलंनसमाप्तिहेतुरितिवाच्यं। मंगलस्यतथाविधविजा
तीयादृष्टनाशकत्वेनविघ्नध्वंसद्वारासमाप्तिंप्रतिमंगलस्यहेतुत्वेबाधकाभावात्॥ द्वारेणा
न्यथासिद्धत्वविरहात्॥ नचैवंसतियत्रमंगलकर्तुर्दुरदृष्टसंदेहेनतन्नाशरूपफलोपधाय
कतासंदेहात्तत्समाप्तिरूपफलोपधायकतासंदेहः तत्रकथंमंगलेतस्यप्रवृत्तिः तत्प्रतिबं
धकस्यफलोपधायकतासंदेहस्यतत्रविद्यमानत्वादितिवाच्यं॥ निष्कंपप्रवृत्तिंप्रतिप्र

सा:सं लोपघापकतत्तासंदेहस्यप्रतिबंधकत्वेपिसकंपप्रवृत्तौतस्यतथात्वाभावेनतत्रसकंपप्र
४ वृत्तौबाधकाभावात्। नचतथापिश्रुत्यविगीतशिष्टाचारानुमितात्निर्विघ्नसमाप्तिका
मोमंगलमाचरेदित्यादिवेदात्समाप्तिसाधनतयाप्रतिपादितस्यमंगलस्यालौकिकत्वे
नकथंतल्लौकिकचरमवर्णध्वंसरूपसमाप्तिसाधनत्वेनप्रतिपादितास्यमंगलस्यालौ
(किकत्वेनकथंतल्लौकिकचरमवर्णध्वंस)मलौकिकंलौकिकेनागमितेनत्तस्यविरोधादि
तिचेन्न। तस्यापूर्वद्वारालौकिकांगत्वाभावार्थकत्वेनानुपपत्त्यभावात्प्रकृतेविघ्नध्वंस
स्यैवद्वारत्वादित्याहुः। अत्रचिंतामणिकाराःप्रमतयः। समाप्तिर्नमंगलफलंमंगलेविघ्नध्वंस
द्वारासमाप्तिजनकत्वासंभवेनतत्कल्पकस्योपदर्शितप्रमाणस्यतत्रानवकाशात्। तथाहि
समाप्तिंप्रतिविघ्नध्वंसद्वारामंगलंतदाहेतुःस्यात्यदिमंगलजन्यविघ्नध्वंसःसमाप्ति राम
हेतुःस्यात्तत्तज्जन्यत्वेसतितज्जन्यफलजनकस्यैवतद्वारत्वात्। नचैवनसंभवतिशिष्टात्मक ४

चरमवर्णध्वंसरूपसमाप्तेराकाशनिष्ठाया आत्मनिष्ठादृष्टरूपविघ्नध्वंसस्य च व्यधिकरणत्वे
न तयोर्विधकार्यकारणभावासंभवात्॥ न च स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्वसं
बंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रति विशेषणताविशेषसंबंधेन मंगलजन्यविघ्नध्वंसस्य हे
तुत्वकल्पने नोक्तानुपपत्तिरिति वाच्यं॥ तथा सति जन्मांतरीयसमाप्तेरपि जन्मांतरीयमं
गलजन्यदुरदृष्टनाशजन्यतया जन्मांतरीयफलमुद्दिश्य विशिष्टानां जन्मांतरीयमंगल
प्रवृत्त्यापत्तेः॥ न चेष्टापत्तिः॥ अनुभवविरोधात्॥ न च स्वप्रतियोगिचरमवर्णावच्छेदकतासं
बंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रति स्वावच्छेदकतासंबंधेन तथाविधविघ्नध्वंसो हेतुरिति
शरीरावयवकंठताल्वादिनिष्ठप्रत्यासत्त्या तथा कार्यकारणभावकल्पनान्नानुपपत्तिरिति
वाच्यं॥ जन्मांतरीयमंगलजन्यविघ्नध्वंसस्यावच्छेदकतासंबंधेन नास्तिकशरीरावयवकंठ
ताल्वादौ असत्त्वेन नास्तिककृतग्रंथसमाप्तिष्वप्यले व्यभिचारेण तथा वक्तुमशक्यत्वात्॥

सा॰ स॰ ननुविघ्नस्यलोपसमाप्तित्वमेवतथाविधविघविघ्नध्वंसकार्य्यतावच्छेदकंवाच्यमविघ्न
५ स्यलोपत्वंचस्वावच्छे[illegible]दकावच्छिन्नप्रतियोगिकत्वस्वाव्यवहितोत्तरत्वासन्निकत्वोभय
5 सम्बन्धेनमंगलजन्यविघ्नध्वंसविशिष्टत्वंतथाचोपदर्शितोभयसम्बन्धेनमंगलजन्यविघ्नध्वं
सविशिष्टसमाप्तिंप्रतिस्वावच्छेदकतासम्बन्धेनमंगलजन्यविघ्नध्वंसःकारणमितिपर्य्यवसन्नम्।
अत्रचनोपदर्शितरीत्याव्यभिचारःसंभवति॥नास्तिकस्यएतारंभकंरत्नात्वादावुपदर्शितो
भयसम्बन्धेनतथाविधविघ्नध्वंसाभावेनतदुभयसम्बन्धेनतथाविधविघ्नध्वंसाविशिष्टस्य
समाप्तिरूपकार्य्यस्यतत्राभावादितिचेन्न॥कारणस्यकार्य्यतावच्छेदकत्वाभावनियमेनत
थावक्तुमशक्यत्वात्॥अन्यथाकाशीमरणान्मुक्तिरित्यत्रपंचम्याहेतुत्वार्थमपहायप्रयो
जकत्वार्थकारणस्यासंगतत्वापत्तेः।तथाहि॥मुक्तिंप्रतिकाशीमरणंनहेतुर्योगाभ्यासादि एम
कजन्यतत्वज्ञाननतोमुक्तेस्तत्राव्यभिचारात्॥नचस्वाव्यवहितोत्तरक्षणसन्निकत्वस्य ५

मानाधिकरणयोभयसंबंधेनकाशीमरणविशिष्टमुक्तिंप्रतिकाशीमरणंहेतुरितिवाच्यम्‌ असंकी
र्णस्यकार्य्यतावच्छेदकत्वासंभवेनतथाकल्पनमशक्यत्वात्‌ः एवंचकाशीमरणेमुक्तिहेतुत्वा
संभवेनकाशीमरणान्मुक्तिरित्यत्रपंचम्याहेतुत्वार्थकत्वानुपपत्त्याप्रयोजकत्वार्थकत्वे
कल्पितेइतिवस्तुस्थितिः यद्यपिचकारणस्यकार्य्यतावच्छेदकत्वमुपपन्नंतदादर्शितरी
त्याकाशीमरणस्यापिमुक्तिहेतुतासंभवेनतत्रपंचम्याहेतुत्वार्थमपहायप्रयोजकत्वार्थ
करणमसंगतंस्यादितितस्मात्कारणंनकार्य्यतावच्छेदकमित्यवश्यमभ्युपगंतव्यम्‌॥ तथा
चउपदर्शितरीत्यासमाप्तिमंगलजन्यविघ्नध्वंसयोःकार्य्यकारणभावासंभवेनसमाप्तिं
प्रतिनाविघ्नध्वंसद्वारामंगलंहेतुरपितुविघ्नध्वंसंप्रतिमंगलंहेतुरितिविघ्नध्वंसएवमं
गलफलंनसमाप्तिरितिनचैवंसतिदुरितसंदेहेकथंशिष्टानांमंगलाचरणेप्रवृत्तिर्दुरित
ध्वंसार्थिप्रवृत्तिप्रतिदुरितनिश्चयस्यहेतुत्वात्तदादुरितानिश्चयेतस्यकारणाभावादितिवा

सा॰ स र्यं॰प्राप्याश्चेत्तस्थलेतथाविधकार्यकारणभावकल्पनेपिसर्वत्रतथाविधकार्यकारणा
६ भावकल्पनेमानाभावात् नचतथापि अनिष्टध्वंसार्थिप्रवृत्तिप्रति अनिश्चयस्य हेतुतयाक
6 र्यंविघ्नसंदेहे मंगलेप्रवृत्तिरितिवाच्यं तादृशकार्यकारणभावेपिमानाभावात् नदाकुराचापेः
नहि अनुपपत्तिस्तपापीयंथाभिःपार्श्वेवीहिंदृष्टपपत्तयोनाद्रियेरन्निति वदंति तदसत् नहिक
रणस्यकार्यतावच्छेदकत्वनास्तीति काशीमरणविशिष्टमुक्तिंप्रतिकाशीमरणंनहेतुरिति अ
पितु तमेव विदित्वा अतिमृत्युमेतिनान्यःपंथा विद्यतेऽयनाय इति श्रुतिप्रतिपादितस्यस
र्वत्रमुक्तिंप्रतितत्वज्ञानहेतुत्वस्यानुपपत्त्या। नचमुक्तिंप्रतितत्वज्ञानद्वाराकाशीमरणस्य
हेतुत्वेतथाविधश्रुत्यो(रु)पपत्त्यभावेननथैवोच्यतामितिवाच्यम् दृष्टत्वात् नचैवंसतिका
शीमरणान्मुक्तिरित्यत्रपंचम्याः हेतुत्वार्थत्वमपहाय प्रयोजकत्वार्थत्वकरणमसंगतंस्यादि एम
तिवाच्यम् तत्रप्रयोजकत्वपदस्यतत्वज्ञानद्वाराहेतुत्वार्थकत्वेनानुपपत्त्यभावादितितत्त्वं। ६

स्कारणस्यकार्य्यतावच्छेदकत्वेबाधकाभावादुपदर्शितरीत्यासमाप्तिमंगलजन्यविघ्नध्वंसस्यै
कार्य्यकारणभावसंभवेनसमाप्तिरेवमंगलफलंनविघ्नध्वंसः अतएवनिर्विघ्नंसमाप्यतामिति
समाप्तिकामनया शिष्टानांमंगलाचरणमपिसंगच्छते इत्यलमप्रसक्तविशेषेण ननुसुखदुःखा
भावान्यतरस्यैवपुरुषार्थत्वनियमेनतदन्यतरभिन्नायाःसमाप्तेर्नपुरुषार्थत्वमितिकथंस
माप्तिमुद्दिश्यमंगलेप्रवृत्तिःतस्याःपुरुषार्थोद्देश्यकत्वनियमादितिचेन्नासमाप्तेर्मुख्यपुरु
षार्थत्वाभावेपिसुखसाधनतयागौणपुरुषार्थत्वसंभवात् उपदर्शितान्यतरत्वघटितनियमस्य
मुख्यपुरुषार्थत्वनिवेशेनानुपपत्त्यभावात् तर्हिकथंमोक्षेमुख्यपुरुषार्थत्वव्यवहार इतिचे
न्नाशंकनीयंमोक्षस्यापिदुःखाभावरूपत्वात् तथाहि आत्यंतिकीदुःखनिवृत्तिर्मुक्तिरत्रनि
वृत्तिर्ध्वंसस्तात्यंतिकत्वंचस्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वंतथाच
स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसोमुक्तिरितिपर्य्यवसितार्थः॥

सा॰स
१

यस्य चरमत्वेनाभिमतमुक्त्यात्मकदुःखध्वंसस्य परं मुक्तमुक्तं दुःखानुत्पादेन दुःखध्वंसात्मकमुक्तौ
तथाविधप्रागभावासमानकालातीतपालक्षणागमनसंभवात्। अत्र संसारदशोत्पन्नदुः
खध्वंसेऽतिव्याप्तिवारणाय स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वं दुःखध्वंसवि
शेषणं मुक्त्यात्मकदुःखध्वंसानामपि पुरुषांतरीयदुःखप्रागभावसमानकालीनतया अव्या
प्तिवारणाय स्वसमानाधिकरणत्वं दुःखप्रागभावविशेषणं॥ अत्र च प्रागभावप्रवेशेनैव
चरमदुःखोत्पत्तिकालीनदुःखध्वंसेऽतिव्याप्त्या च स्वसमानाधिकरणदुःखासमानका
लीनदुःखध्वंसो मुक्तिरित्येव लक्षणमवशेषम्। न चात्रापि स्वत्वस्याननुगततया तन्मुक्ति
विश्रांतत्वेन मुक्तिलक्षणस्याननुगतत्वापत्तिरिति वाच्यम्। तथा सति स्वसामानाधिकरण्य
कालिकविशेषणतोभयसंबंधेन दुःखवद्भिन्नो यो दुःखध्वंसस्तत्त्वस्यैव मुक्तिलक्षणत्वा
त् अत्र च स्वत्वस्य पारिभाषिकत्वेन संबंधेऽनिवेशनानुपपत्त्यभावात्। केचित्तु चरमदुःखध्वंसो

एम
१

मुक्तिः चरमत्वं च चरमदुःखमात्रवृत्तिर्दुःखत्वव्याप्यसत्तात्वज्ञानकार्य्यतावच्छेदककोटिप्रविष्ट
तया सिद्धो जातिविशेषः स चोक्तः तदसत्त्वदुःखत्वहानिर्गोवधजन्यतावच्छेदकजात्यादिकमादाय सा
कर्य्यप्रसंगात् तथाहि गोवधजन्यतावच्छेदकजात्यभाववति चरमत्वं ब्रह्मवधजन्यचरमदुःखे च
रमत्वाभाववता हानीनां गोवधजन्यदुःखे गोवधजन्यतावच्छेदिका जातिः सामानाधिकरण्य
वतयोर्गोवधजन्यचरमदुःखे इति यदि गोवधजन्यतावच्छेदकजातिव्याप्यविरुद्धभेदेन च
मत्वस्यैव द्विविधमुपेत्य सांकर्य्याभाव उपपाद्यते ॥ तथापि तथाविधानेन तज्जात्यादिकल्पना गौरवे
णातन्मतस्यानतिहेयत्वादिति ॥ भाट्टास्तु नित्यसुखाभिव्यक्तिर्मुक्तिः अत्राभिव्यक्तिः साक्षात्कार
तथा च नित्यसुखविषयकसाक्षात्कारो मुक्तिरिति मुक्तिलक्षणमाहुः तेषामयमाशयः जीवात्म
नि नित्यसुखं स्वीकृत्य तद्विषयकज्ञानस्य मुक्तित्वस्वीकारेण त्वज्ञानकार्य्यतावच्छेदकं लघुर
तितयैव मुक्तिलक्षणान्तःप्रवेशितोऽप्यसंबन्धेन दुःखध्वंसत्वं तथा ॥ तथा स

सा॰सं॰ नितत्वज्ञानकार्यतावच्छेदकगौरवप्रसंगात्। न चैतन्मतेपि ध्वंसाप्रतियोगित्वादिरूपनित्यत्व
८ घटितत्वाद्दशावर्मस्य तत्कार्यतावच्छेदकत्वे गौरवात्। किंचिदेतद्दिति वाच्यम्। एतन्मतेव स्य
माणपुरुषानिरवच्छिन्नज्ञानत्वस्यैव तत्वज्ञानकार्यतावच्छेदकत्वेन लाघवस्यानपायात्। न च
मुक्तिदशायां शरीराभावेन नित्यसुखविषयकज्ञानस्याशक्यतया कथं तस्य मुक्तित्वमिति वा
च्यम्। अवच्छेदकतासंबंधेन ज्ञानं प्रति तादात्म्यसंबंधेन शरीरस्य हेतुतया शरीरं विना मुक्ति
दशायां निरवच्छिन्नस्य नित्यसुखविषयकज्ञानस्योत्पत्तौ बाधकाभावात्। न चैवं सति मुक्ति
दशायां सुखस्वीकारे अशरीरं वावसंतं न प्रियाप्रिये स्पृशत इति श्रुतिविरोधः। तादृश
श्रुत्या मुक्तिदशायां सुखाभावबोधनादिति वाच्यं। तत्र न स्पृशत इत्यस्य नोत्पद्येते इत्यर्थक
रणे नासामंजस्याभावात्। न च तथापि दुःखं विना संतति विमुक्तः प्रातातिति श्रुतिविरोधः तयात्यं राम
तदुःखध्वंसस्य मुक्तित्वप्रतिपादनादिति वाच्यम्। न हि तया नित्याविषयदुःखध्वंसस्य मुक्तित्वं प्र ८

निपात्यतेयेनानुपपत्तिःस्यात्। अपितुमुक्तिदशायांदुःखासत्वेपत्त्यापत्तेः। तथाचनतन्मते
पितथाविधश्रुतिविरोधइतिचेदपिमुक्तिदशायांदुःखासत्वाविवेकादितिसांख्यास्तु। आत्यंति
कदुःखनिवृत्तिर्मुक्तिः। तत्राविवादएव। परंतुदुःखंनात्मसमवेतम्। अपितुबुद्धितत्वापरप
र्यायमहत्तत्वसमवेतंसांख्यमते ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्याना
महत्तत्वएवसमवेतत्वाभ्युपगमात्। भावनाचतन्मतेगुणान्तरंनास्त्येव। अनुभवध्वंसेनैवतत्का
र्य्यस्मरणसंभवात् इतिध्येयम्। महत्तत्वंचसांख्याभ्युपेतानातिरिक्तंप्रकृतिजन्यमतिरिक्तंमहत्तत्वसा
ध्याहंकारः। अयमप्यतिरिक्तः। अहंकारात्पंचतन्मात्राणि। ताश्चातिरिक्ताः। शब्दतन्मात्रास्पर्शतन्मा
त्ररूपतन्मात्ररसतन्मात्रागंधतन्मात्राभेदेनभिन्नानि। तत्रशब्दतन्मात्रात्आकाशउत्पद्यते। सां
ख्यमतेनन्यायानित्यत्वात्। स्पर्शतन्मात्राद्वायोरुत्पत्तिः। रूपतन्मात्रात्तेजसउत्पत्तिः। रसतन्मा
त्राज्जलस्योत्पत्तिः। गंधतन्मात्रात्पृथिव्याउत्पत्तिरितिसांख्यमतसिद्धंपंचमहाभूतोत्पत्तिप्रक्रि

सास:
८
१

यात्प्रसंगाउक्तानि॥ एवं पंचविंशतितत्त्वानि अपि तन्मतसिद्धानि प्रसंगादुच्यंते॥ तथाहि॥ चक्षु
त्वक्श्रोत्ररसनाघ्राणरूपाणि पंच ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थरूपाणि पंच कर्मे
न्द्रियाणि पृथिव्यप्तेजोवाय्वाकाशरूपाणि पंच भूतानि। शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मा
त्ररसतन्मात्रगंधतन्मात्ररूपाणि पंच तन्मात्राणि पुरुषप्रकृतिमहत्तत्त्वाहंकाराः तत्त्वमनांसि
च तन्मतप्रसिद्धानि निष्ठातः ते मिलित्वा पंचविंशतिः तत्त्वानि इति। अत्र पुरुषस्तु तन्मते क
र्तृत्वे श्चैतन्यरूपः कूटस्थत्वं च जन्यधर्म्मानाश्रयत्वं पुरुषत्वं पुष्करपलाशवन्निर्विकार इति
तत्सिद्धांतात् पुरुषे निरुक्तं कूटस्थत्वमाविरुद्धं पुरुषस्तु पुष्करपलाशवन्निर्विकार इति सिद्धं
तथैस्तु पद्मपत्रं यथा जलादिलेपयुक्तं न भवति तथा पुरुषो जन्यधर्म्माश्रयो न भवतीति।
अयं पुरुषो नित्यो ऽकारणं चेति॥ न प्रकृतिर्न वा विकृतिः। प्रकृतिस्तु तन्मते जगदुपादानकारण एम
कारणमतिरिक्ता जन्या च। अत एव सा अविकृतिरिति गीयते॥ महत्तत्त्वाहंकारं च तन्मात्राः प्रकृ ८

निरूपाऽपादानकारणत्वात् विकृतिरूपाश्च कार्य्यत्वात् । पंचज्ञानेंद्रियादिरूपषोडशतत्वानि तु
विकृतिरूपाऽपेवऽपादानकारणभिन्नत्वे सति कार्य्यत्वात् । अत एव तेषां संग्रहश्लोकः । मूलप्र
कृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष
इत्यलमप्रस्तुताभिधानेन । वेदांतिनस्तु अहं ब्रह्म न जानामीति प्रतीतिसाक्षिकोऽविद्याप
रपर्यायोऽज्ञानाख्योऽनादिः कश्चित्पदार्थोऽस्ति स एव जगतां परिणाम्युपादानकारणं विवर्तोपा
दानं च ब्रह्म । एवं चाविद्यानिवृत्तिकाले सच्चिदानंदस्वरूपब्रह्मावाप्तिरेव मोक्षः अवाप्तिश्च
स्वरूपसंबंधः अत्र सच्चित्सदाद्यो नित्यज्ञानं आनंदपदार्थः । एवं नैर्नित्यस्य ब्रह्मणस्तदुभय
रूपतांगीक्रियते । अतो नानुपपत्तिः । न चैवं सति अहं सुखी अहं ज्ञानी सादिकासुखाद्यधिक
रणताविषयकप्रतीतीनामनुपपत्तिरिति वाच्यम् । तेषां मते तथाविधप्रतीतीनामंतःकरणे त
द्धर्मसुखाद्याकारकवृत्तिविषयकत्वेनानुपपत्त्यभावात् । तेषां मते ज्ञानसुखदुःखेच्छाद्वेषप्र

सा सं
१०
10

यत्न धर्माधर्माणां तत्तदाकारवृत्तिविषयकत्वरूपाणामंतःकरणधर्मत्वात् । अंतःक
रणं चात्मन एव । न चैवं सत्यपि सच्चिदानंदरूपब्रह्मणः स्वरूपसंबंधस्यानित्यत्वपापफलत्वा
भावेन दुःखानुदयात् । कथं मोक्षमुद्दिश्य पततत्त्वज्ञानोपायेप्रवृत्त्युपपत्तिः कथं वा मोक्षस्य पु
रुषार्थत्वम् न चेष्टानवाप्तिनिष्टाविघ्नपरिपूर्णपुरुषार्थपदार्थत्वादिति वाच्यम् ॥ स्वरूपसंबंध
नसर्वदासंबंधिनोपि ब्रह्मणो जीवेन तत्संबंधाभावभ्रमदशायां तत्संबंधेपि दुःखसत्त्वे । य
थाकंठे विद्यमानस्यापि चामीकरसंबंधस्याभावभ्रमदशायां कंठचामीकरसंबंधेष्टा
अतएव कंठे चामीकरस्यापि न स्वस्वरूपावाप्तिरेवं मोक्ष इति तत्प्रवादोपि संगच्छते । अत्र
स्वपदं सच्चिदानंदब्रह्मपरमित्यन्ये । को ह्यात्मा ज्ञानं द्विविधम् । आलयविज्ञानं प्रवृत्तिविज्ञा
नं चा । तत्रालयविज्ञानस्वरूपं आत्मा नातिरिक्तो विशेषोधिकाध्युपेतः । प्रवृत्तिविज्ञानं तु दुः एम
खादिजनकं तथा च दुःखाभाववीशिष्टालयविज्ञानप्रागभावव्याप्यध्वंसप्रतियोग्यालयवि १०

त्यानन्द्यौख्यमोक्षः॥ अतएवानुपप्लववच्चितसंततिमंतंनामपवर्ग इतिप्रवादोपि संगच्छते
॥ अत्रोपप्लवशब्दस्य दुःखार्थत्वात् चितशब्दस्यालयविज्ञानार्थत्वात्॥ अनंतशब्दस्य निरंत
ध्वंसप्रतियोग्यर्थत्वात् उक्त एवार्थः पर्यवस्यतीत्याहुः॥ ननु वैशेषिकादिनये आत्यंति
कदुःखनिवृत्तेर्मुक्तित्वं तदैवोपपद्यते। यदि तादृशदुःखनिवृत्तौ प्रमाणमस्ति तदेव न पश्याम
इति चेत्॥ अत्रोच्यते। दुःखसंततिः संतमुच्छिद्यते संततित्वात् प्रदीपसंततिवदित्यनुमान
मेवात्र प्रमाणं॥ तथाहि॥ अत्र पक्षे दुःखसंततिपदं दुःखत्वपरं॥ अत्यंतमुच्छिद्यत इत्यस्य स्व
समानाधिकरणदुःखप्रागभावाधिकरणक्षणवृत्त्यनुपपन्नउद्देश्यकूटवद्ध्वंसप्रतियोगिवृत्तित्व
मर्थः। संततित्वादित्यस्य कार्यवृत्तिधर्मत्वादित्यर्थः। प्रदीपसंततिवदित्यस्य प्रदीपत्ववदित्य
र्थः। तथा च दुःखत्वं स्वसमानाधिकरणदुःखप्रागभावाधिकरणक्षणवृत्त्यनुपपन्नउद्देश्यकूटवद्ध्वं
सप्रतियोगिवृत्तिकार्यवृत्तिधर्मत्वात्। प्रदीपत्ववदित्यनुमाने पर्यवसन्नं। अत्र च पक्षे

सा सं
११

र्थनाबलम्बतथाविधदुःखध्वंसप्रतियोगिवृत्तित्वशरीरापेक्षकतथानिरुक्तात्यंतिकदुःखध्व
ध्वंसासिद्धेः न चात्र तथाविधात्यंतिकदुःखध्वंससिद्ध्या बाधेन मुक्त्यात्मकदुःखध्वंसासिद्धिरि
ति वाच्यम् मुक्तिलक्षणेपि स्वसमानाधिकरणदुःखप्रागभावासमानकालीनेत्यत्र स्वस
मानाधिकरणदुःखप्रागभावाधिकरणक्षणावृत्तित्वपर्यन्तस्यैदकदवर्थकत्वेनानुपपत्त्यसंभा
वादिति । वस्तुतस्तु दुःखविनात्यंतविमुक्तश्चरतीत्यादिश्रुतेरेव तथाविधात्यंतदुःखध्वंसेप्र
माणे तथा नानुपपत्तिलेशोपीति ध्येयम् । ननु तथापि तथाविधदुःखध्वंसो मुक्तिरस्तु
मात्तथासति मोक्षस्यात्मशरीरादिभ्यो भिन्नस्य तथाकारकतत्त्वज्ञानजन्यत्वानुपपत्तेः शरी
रादिनाशरूपत्वे विमुसमवेततयापि विशेषगुणनाशत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नविशेष
गुणत्वेन हेतुताया अवश्यक्लृप्ततया तेनैव तथाविधदुःखनाशसंभवे तथाविधतत्त्वज्ञा
नस्य तत्रान्यथासिद्धत्वात् नाबाधितमर्थं वेदोपि न बोधयतीति वेदस्यापि तथाहेतुताबो राम ११

घकत्वासामर्थ्यादितिचेत्तत्राविहितत्वज्ञानेनसाक्षान्मुक्तिजनकम् । अपितुहेतूच्छेदपुरःस
र्व्यापारेणदुःखहेतुर्योहंगौरइत्यादिमिथ्याज्ञानजन्यसंस्कारोवासनापरपर्यायस्तन्नाशद्वारैव
जनकम् । एवंचतत्त्वज्ञानंमुक्तिप्रयोजकंनतुसाक्षाज्जनकमतोनोक्तानुपपत्तिरित्याश
यः । किंचित्तुपदर्शितानुपपत्त्यानिरुक्तासंतदुःखध्वंसोमुक्तिपदार्थः किंतुआसंतिकदु
रितध्वंसः । तत्रतुतत्त्वज्ञानजन्यत्वेनानुपपन्नंउपदर्शितपूर्वमतत्रकारणान्तरासंभवात्दु
रितध्वंसेआसंतिकत्वंचस्वसमानाधिकरणदुरितप्रागभावासमानकालीनत्वम् । अ
तोनानुपपत्तिः । नचदुरितध्वंसस्यपुरुषदुःखाभावान्यतरत्वाभावेनापुरुषार्थत्वापत्ते
वमितिवाच्यं । दुःखाभाववत्दुःखसाधनाभावस्यापिपुरुषार्थत्वात्दुःखवत्तत्सा
धनत्वेनतत्रापिद्वेषसंभवात् ॥ अतएवप्रायश्चित्तस्यदुरितध्वंसःफलमितिचिंताम
णिकारोक्तमपिसंगच्छतेत्याहुरित्यलमतिविस्तरेणेति ॥ अथपदार्थाद्वि

सा॰ सं॰
१२

द्विधो भावोऽभावश्चेति॥ तत्र भावपदार्थाः षड्विधाः। द्रव्यगुणकर्मसामान्यविशेषसमवाय
भेदात्॥ तत्र द्रव्याणि॥ पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि। पृथिवी द्रव्यमित्यादि
ना पृथिव्यादिरूपविशेषसंज्ञाभिर्द्रव्यरूपसामान्यसंज्ञासंज्ञापाचसूत्रकारोक्ता॥ न नवैवेत्य
त्रैवकारव्यवच्छेद्यं पृथिव्यादिनवातिरिक्तद्रव्यमानवाऽसिद्धसिद्धिभ्यां व्याघातः पृथिव्या
दिनवातिरिक्तद्रव्यानादौ तद्व्यवच्छेद्यस्य तदर्थत्वादित्युक्तमाचार्यैस्तन्न विचारसहं॥ पृथिव्या
दिनवातिरिक्तद्रव्यस्याप्रधकास्यैव प्रमाणासिद्धत्वात्॥ तत्र विप्रतिपन्नं प्रति पृथिव्यादिनवा
तिरिक्तं द्रव्यं न वा। द्रव्यं पृथिव्यादिनवातिरिक्तं न वेत्यादयः। अत्र विधिकोटिः परेषां निषेध
कोटिर्वैशेषिकादीनाम्॥ अत्राधिकरणतापृथिव्यादिनवातिरिक्तद्रव्यत्वं वादिनो माहुः। अ
धिकरणतावत्सर्वानुभवसिद्धेति न प्राचां धिकरणतावत्सामान्यविशेषसमवायान्यतमः
स्वाश्रयाविषयकलौकिकप्रत्यक्षाविषयत्वात्॥ वायोर्नानात्वं पकभागसमवेतगंधादिवत्॥ राम
१२

नकर्म्मसंयोगाच्चसमवायिकारणतावच्छेदकधर्म्माभावात्॥ असमवायिकारणत्वाभावाद्वा
घटादिवत्। न गुणत्वस्य समवेतत्वात्॥ गगनादिवदित्याद्यनुमानैः द्रव्यातिरिक्तपदार्थ-
भेदः साधनीयः। नचात्र हेतुः स्वरूपासिद्ध इति वाच्यं। अंधकारस्य द्रव्यासमवेतत्वासंभवात्। त-
थाहि॥ अंधकारो न दिक्कालमनःसु समवेतः। लौकिकप्रत्यक्षविषयत्वात् रूपवत्॥ नात्मसम-
वेतः। लौकिकचाक्षुषादिविषयत्वात् रूपादिवत्। अत एव न वायुसमवेतो गगनसमवेतो वा
नापि तेजःसमवेतस्तेजोऽविषयकलौकिकसाक्षात्कारविषयत्वात्। पीतादिवत्। नापि जलस-
मवेतः। आलोकाजन्यलौकिकचाक्षुषविषयत्वात्॥ अत एव न पृथिवीसमवेतोऽपीत्याद्य-
नुमानैः पृथिव्यादिनवद्रव्यासमवेतत्वसाधनात् तत्पन्नागृहवारोपितमञ्जनादिनीलरूपमेव
तमः। न चालोकाजन्यचाक्षुषविषयत्वान्नैवमिति वाच्यं॥ गृहादौ अंजनादिनीलरूपा-
रोप्यमानात्वेऽपि संभवेऽपि स्मर्यमाणत्वेऽपि बाधकाभावदिनिन्त त्रौ तत्थासनिगृहेतमरी

सा.सं.
१२
13

तमोविशेष्यकचाक्षुषानुपपत्तेः। बहिरिन्द्रियजन्यज्ञानोपनीतस्य विशेषणतया भाननियमा
दनुपनीतविशेषणतयैव भासते। मानसत्वनियम इति प्रवादात्। न च तथाविधप्रसक्तं चा
क्षुषं नाङ्गीक्रियत एव अपि तु मानसं स्यात्तेनानुपपत्तिरिति वाच्यं। तथा सति तत्र चाक्षुषत्वमनुभ
वस्यापलापापत्तेः। न च तत्र चाक्षुषत्वानुभवो भ्रम इति वाच्यं। तथा सति घटादेरपि चाक्षुष
त्वप्रसंगात्। एवमारोपितनीलरूपत्वमहत्त्वे नीलेन हानि त्वनिर्णयदशायां गृहे अन्धकारेण दे
तिसंशयानुपपत्तेरिष्टापत्तौ चानुभवविरोध इति। ननु मास्तु उपदर्शितरीत्या तस्या अन्धका
रस्य गुणस्तथापि गुणत्वं पृथिव्यादिनवांतर्भावे तस्य किं बाधकमिति चेन्न। पृथिव्यादिनव
विरुद्धधर्माध्यासात्। तथा हि। अन्धकारो न गगनादिविभुरूपः रूपवत्त्वात्। अत एव न म
नो न वायुः। नापि पृथिवी वा निरोधत्वात्। आलोकाजन्यचाक्षुषविषयत्वाद्वा। नापि जलं नीलं रूप
रूपवत्त्वाद्वा। अत एव न तेजः। तथा च संग्रहश्लोकः। नाभावो निरोधहीनत्वात् अस्पृश्यत्वाच्च नात्मकं १२

नतेजःकृष्णरूपत्वाद्रूपवत्त्वाच्चनेनरक्षिति॥ तस्मात्पृथिव्यादिनवद्रव्यातिरिक्तंद्रव्यमंधका
रमिति। ननुरूपमसमवेतंसमवेतंवा॥ नाद्यः। असमवेतरूपवद्द्रव्यस्याणुत्वनियमेनाप्रत्यक्षत्वा
पत्तेः। नद्वितीयः। जन्यद्रव्यत्वावच्छिन्नंप्रतिस्पर्शवत्त्वेनहेतुतयातथात्वासंभवात्। अंधका
रवत्द्रव्यावयवेपिस्पर्शाभावादितिचेन्न। आद्यनियमेमानाभावेनअंधकारेनिरवयवद्रव्यत्वाभ्यु
पगमेलाघवेनतथैवकल्पनात्। अतएवजन्यद्रव्यत्वावच्छिन्नंप्रतिस्पर्शवत्त्वेननहेतुता। अ
नुभूतस्पर्शेद्रव्येमानाभावेनप्रमाया। अनाप्यत्वापत्तेः। अपितुमूर्त्तत्वेनैवनतत्रतत्त्वमनसिद्र
व्यापत्तिकारणंतुविजातीयसंयोगरूपासमवायिकारणाविरहेणेत्योपपादनीयंतथाचांधका
रेद्रव्यासमवेतत्वाभ्युपगमेवाधकाभावइतिपरास्तम्। लाघवेनतस्यानित्यत्वाभ्युपगमात्।
अन्यथांधकारस्यध्वंसप्रागभावकल्पनेगौरवप्रसंगादिति। तस्मादंधकारमतिरिक्तं
द्रव्यंनित्यमवश्यमुपेयमिति। नैवंसति अंधकारस्यदिवसेपिप्रसक्तापत्तिरितिवाच्यं।

सा०सं०
१४
17

अंधकारस्वरूपद्रव्यस्यालोकाभावव्याप्यत्वाभ्युपगमादिति। न चैवं सति द्रव्यचाक्षुषं प्रति
आलोकस्य हेतुतायां व्यभिचार इति वाच्यं। तत्कार्यतावच्छेदककोटौ द्रव्यांशे अंधका-
रभिन्नत्वनिवेशादित्याहुः। अत्र वदंति। अंधकारव्यतिरिक्तद्रव्यांगीकारे आलोकापेतावं-
च्छेदककोटौ तदन्यत्वनिवेशे अंधकारचाक्षुषं प्रति आलोकाभावस्य हेतुत्वे च गौरवात् अं-
धकारो न द्रव्यमिति। ननु एवं संभवति। यदि द्रव्यचाक्षुषं प्रति आलोकादेर्हेतुत्वं। अंधकार-
चाक्षुषं प्रति आलोकाभावस्य हेतुत्वं कल्प्यते॥ तदेव न द्रव्यचाक्षुषं प्रति विजातीयसंयोग-
त्वेन चक्षुःसंयोगहेतुताकल्पनेनैव सर्वसामंजस्यात्। आलोकाभावकालीनचक्षुःसंयोगादि-
वसे अंधकारहत्ति च चक्षुःसंयोगे च वैजात्यानभ्युपगमेनानुपपत्त्यभावात् इति चेन्न। किमत्र
वैजात्यावच्छिन्ननियामकं न तावत् विजातीयाक्षिपाप्यत्रैकपेव चक्षुःक्षिपपा आलोक-
संयुक्तघटे आलोकासंपृक्तपरे च चक्षुःसंयोगद्वयमुत्पादितं तत्र घटचाक्षुषवत् परस्य

राम
१४

पि चाक्षुषापत्तेः । तत्र वैजात्यावच्छिन्नं नियामकं विजातीयक्षित्वपक्षे न परं चक्षुःसंयोगोऽपि वै
जात्याभ्युपगमस्यावश्यकत्वात् । न च तत्र तदुत्तरदेशस्यापि कारणतया तत्र विजातीयक्रि
यया विजातीयमेव चक्षुःसंयोगरूपफलं जननीयं घटरूपोत्तरदेशस्यैव सहकारित्वाभ्युपगम
न्नानुपपत्तिरिति वाच्यं पत्रालोकसहकृतचक्षुषा घटचाक्षुषमुत्पादितं अनंतरं चालो
कस्य नाशः तन्नालोकनाशानंतरमपि घटचाक्षुषापत्तिः पूर्वोक्तविजातीयचक्षुःसंयोगस्य
तदानीमपि सत्त्वात् । एवं मंदमतेनत्र अंधकारे चक्षुःसंयोगानंतरं तत्र चाक्षुषजनने आलोक
समवधाने सति पुनरंधकारे चाक्षुषापत्तेः । विजातीयचक्षुःसंयोगरूपकारणस्य तदानी
मपि सत्त्वात् । न च तत्र तत्र तदा विजातीयचक्षुःसंयोगस्यापि नाशाभ्युपगमेनानुपपत्तिभाव
इति वाच्यं चक्षुःसंयोगोत्पत्तिद्वितीयक्षणे आलोकसमवधानेन घटचाक्षुषापत्तेः । आ
लोकसमवधाने च अंधकारे चाक्षुषापत्तेः आलोकपदार्थेनागाकारणेन तत्र चक्षुःसंयोगना

शाभ्युपगमस्याशक्यत्वात्। तस्मात् द्रव्यलौकिकचाक्षुषं प्रति आलोकसंयोगकारणं वाक्षुषं
प्रति आलोकाभावस्य च हेतुत्वकल्पनायां आवश्यकत्वात् तत्र तत्रोपदर्शितगौरवपराहा। अस्या
शक्यत्वात्। अंधकारे न द्रव्यमिति सर्वथाभ्युपेयम्। पक्षे। अंधकारस्य द्रव्यत्वे ऽङ्गानुपपत्तिरिति दै
वपरिस्थितं अंधकारस्य चाक्षुषमुपेयते तदेव न। अपि तु तमोरूपातिरिक्तमिंद्रियमुपेयं तस्य तन्मा
मसप्रत्यक्षमेवाभ्युपगम्यते। न चाधिष्ठानाभावे न तथा कल्पनाशक्येति वाच्य
म्। चक्षुरधिष्ठानगोलकएव तमोरूपेंद्रियाधिष्ठानत्वाभ्युपगमात्। अतएव मंप्रत्यक्षे त
स्य चक्षुःत्वयानुविधानमपि उपपद्यते। न चैवं सत्यपि आलोकसमवधानकालेऽन्धकारे चं
क्षुत्वेन तमोरूपेंद्रियसंयोगसत्वे अंधकारस्य तामसप्रत्यक्षापत्तिर्दुर्वारैवेति वाच्यम्। अंधका
रस्य द्रव्यस्यानित्यत्वाभ्युपगमेन आलोकसमवधानकालेऽन्धकारनाशाभ्युपगमात् किन्तु एतम
दपि न विचारसहम्। न तथा सत्यंधकारेण तामसत्वावछिन्नं प्रति तमोरूपेन्द्रियसंयोगहे १५

तताकल्पनेतथ्याविघातीति । किं द्विपकल्पने अंधकारस्य द्रव्यस्य ध्वंसप्रागभावादिकल्प
नेचगौरवस्यदुष्यत्वात् । हि । त्वात् क्रियावतो रूपवतो महत्त्वस्यालोकजन्यचक्षुषविषयत्वानि
यमेनतथाकल्पनाया अशक्यत्वाच्च ॥ अत एव द्रव्यकिरणावल्यां आचार्यैर्वस्तुने
स्या क्रियावत्त्वरूपवत्त्वे अचाक्षुषत्वप्रसंगादित्यादिना बाधकमुक्तम् अंधकारस्यद्र
व्यत्ववादिनंप्रति इति तस्मादंधकारो न द्रव्यमपि तु भानाभिभूततद्रूपप्रकृष्टमहत्त्ववत्तेजः सा
मान्याभावः । अत एव भगवान् मनिरप्याह । द्रव्यगुणकर्म्मनिष्पत्तिवैधर्म्याद्भाभावस्त
म इति । अत्र निष्पत्तिशब्दार्थः । सामान्यविशेषसमवायाः भापदार्थो नेहत्युक्तविशिष्ट
तेजः वैधर्म्यं पदार्थो नेह । तथा च द्रव्यगुणकर्म्मसामान्यविशेषसमवायभेदसत्वात्
तथाविधविशिष्टतेजः सामान्याभाव एव अंधकार इति सूत्रार्थो । वसेयः । अत्र अंधका
रपि चालुकादिप्रविष्टविशिष्टरश्मिसत्वादव्याप्तिवारणाय अनभिभूतत्वानिवेशः । अनुभूत

सा॰ सं॰ पवच्छसः स्वरूपतेजसो । धकारोऽपि सत्वादव्याप्तिवारणाय प्रमूर्तत्वनिवेशः । नद्वात्तेजःपरमा
१६ ण्वादेः सत्वादव्याप्तिवारणाय प्रकृष्टमहत्वनिवेशः । तेजःसामान्याभाववस्तुसंयोगसंबंधाव
16 च्छिन्नप्रतियोगिताकोऽयमाद्यः अत्र तेन समवायसंबंधावच्छिन्नप्रतियोगिताकतेजःसामान्या
भावमादायातिव्याप्तिः । वस्तुतस्तु संयोगसंबंधावच्छिन्नप्रमात्वावच्छिन्नप्रतियोगिताकाभा
वोऽन्धकारः । न तु प्रदर्शिततेजःसामान्याभावो गौरवात् । प्रमात्वं च प्रभाप्रभेत्यनुगतप्रती
तिसाक्षिको जातिविशेषः । बाधकाभावे अनुगतप्रतीतिबलात्तज्जातिसिद्धेरिति । ननु तेजः
सामान्याभावादेरंधकारत्वाभ्युपगमेऽन्धकारचाक्षुषानुपपत्तिः । चक्षुषा चाक्षुषरूपप
लेजननापेक्षालोकस्य सहकारित्वात्तयाऽऽलोकाभावदशायां तस्य चाक्षुषासंभवादिति चेन्न ।
चक्षुषा तेजःसामान्याभावप्रतियोगिकस्य चाक्षुषजनने एवालोकस्य सहकारित्वाभ्युपगमा
तान चैवं सति ग्रहेऽशे लौकिकप्रत्यक्षात्मकांधकारचाक्षुषानुपपत्तिः आलोकसर्वैमेधाना । एम १६

मावेनतद्ग्राहकस्यलौकिकप्रसक्त्यासंभवादितिवाच्यमिष्टत्वात्तद्ग्राहकोपनीतमानात्मको
पकारस्यात्रापस्यैवांगीकारात् न चैवंसतितमसिग्राहकमितिप्रसक्त्यनुपपत्तिरितिवाच्यम्
तथाविधमानस्योपनीतभानांगीकारात् चाक्षुषात्मकतादृशप्रतीतेरनभ्युपगमेस्तादृशवि
रहात्एवमन्तुतिजः सामान्याभावप्रसक्त्यालोकानपेक्षत्वेऽभावप्रसक्तेर्योग्यानुपलब्धि
हेतुतानुपपत्तिः प्रतियोगितद्व्याप्येतरयावत्प्रतियोग्युपलंभकसमवहितप्रतियोग्यु
पलंभाभावरूपयोग्यानुपलब्धेस्तत्रासत्त्वेनव्यभिचारादितितन्नअप्रतियोगित्वादेरेकाभा
वेनविशेषाविरुद्धातितयाऽत्रालोकसंयोगाघटितप्रतियोग्युपलंभकसामग्र्याविशिष्टप्र
तियोग्युपलंभाभावहेतुत्वाभ्युपगमेनअन्यत्रचालोकसंयोगघटितप्रतियोग्युपलंभकसा
मग्र्याविशिष्टप्रतियोग्युपलंभाभावहेतुत्वाभ्युपगमेनव्यभिचारानवकाशात् न चैवंसत्य
पिनालोकतमसिइतिप्रतीत्यनुपपत्तिरितिवाच्यम् तादृशप्रतीतेर्भ्रमत्वाभ्युपगमेनानुपप

सा॰सं॰
१७
17

समभावात्॥ न चालोकाभावदशायां नीलं चाक्षुषसामग्र्यभावेन तथाविधानुभवप्रमा
नारोपानुपपत्तिरिति वाच्यम् तथा सत्यपि तथाविधस्मर्यमाणारोपे बाधकाभावात्तत्र
त एवं नभो नीलमिति प्रतीतेरपि नानुपपत्तिः तादृशप्रतीतेरपि भ्रमत्वेनोपपत्तेः
न चैवं सति किमपराद्धमारोपितं जन्यादिनाऽलक्ष्यं बाधकाभावे द्रव्यत्वेनातो वाच्यमन्यथा
सन्निनीलतम इति वाक्यात्॥ घटः कलश इति वाक्यादिव शाब्दबोधानुपपत्तेरिति त
स्मान्निरुक्ततेजःसामान्याभावः प्रमासामान्याभावे बाधक इत्यवश्यमुपेयमिति।
ननु तेजःसामान्याभावस्य बाधकत्वे तेजोज्ञानं विना कथमयं बाधकः प्रसक्तोपपाद्य इति चेन्न
यत एव तज्ज्ञानं विना तथा न चैवं सति रात्रौ कथमयं बाधकः प्रत्यय इति वाच्यं तज्ज्ञानतत्त्वस्य
यप्रमाणविषयकस्याप्युपगमेन रात्रेस्तानार्थमन्तर्लापितेजोज्ञानस्यावश्यकत्वात् नि रान
रस्तेन द्वीपवर्त्तिरथाग्निजालः कालविशेषो रात्रिरिति निरुक्तलक्षणत्वात्॥ अस्मार्थः॥ निरस्त १७

ध्वस्तमेतद्द्वीपवर्त्तिरश्मिजालं यस्मिन्कालविशेषे स कालविशेषोऽत्रिरिति। अस्यार्थः ध्व
स्तं ध्वस्तमेतद्द्वीपवर्त्तिरश्मिजालं यस्मिन्कालविशेषे स कालविशेषोऽत्रिरिति॥ अत्र
जालपदं यावदर्थकमेवद्वीपपदं जनकद्वीपादिपरं। तथा च जनकद्वीपवर्त्तिपावकरश्मिध्वंसाधि
करणकालविशेषो जम्बुद्वीपेऽत्रिः एवं द्वीपान्तरनिवेशद्वीपान्तरीयपरत्रिलक्षणं बोध्यम्।
न चात्रासंभवः एतद्द्वीपवर्त्तियावद्रश्म्यन्तःपातिनामनागतरश्मीनां ध्वंसानां क्वापि तत्रावभा
सिनिवासमा॥ एतद्द्वीपवर्त्तित्वात् तेन एतद्द्वीपोत्पत्त्यलविवक्षणात्। अनागतरश्मीनामेत
द्वीपोत्पत्स्यमानतया तत्रोत्पत्त्यवधिहेतुनानुपपत्त्यभावात्॥ अत्र क्वापि आत्मकाले द्वीपा
न्तरवर्त्तिरश्मिध्वंसासंभवेन यावद्रश्मिध्वंसाभावादसंभववारणाय एतद्द्वीपोत्पत्त्ये
ति दिवसे यदेतद्द्वीपवर्त्तिपावकीचिद्रश्मिध्वंससत्त्वेनातिव्याप्तिवारणाय यावत्त्वं एवं वि
रश्मिविशेषणं। एतद्द्वीपवर्त्तिरश्मिध्वंसानां प्रलये सत्त्वादतिव्याप्तिवारणाय विशेषपदं

सा स: १८ 18

प्रलयान्यपरमाणं च प्रलयस्थापिलस्पत्वात्तथैतदुपादानमिति वाच्यं नाद्यं न रात्रिविरिति
श्रुत्याप्रलयस्य रात्रित्वाभावासिद्धाल स्पत्वाभावात्तदुपादानस्यावश्यकत्वात् । न चैवं सत्यपि म
हाकाले घटपराद्यात्मकस्थूलकालोपाधौ चातिव्याप्तिः तत्रापि तथाविधपावकविरश्मिध्वं
ससत्वादिति वाच्यं मा ।। न तथाविधध्वंसविशिष्टप्रलयान्यजन्यकालत्वस्याविवक्षणात् । घटप
टादेस्तथाविधध्वंसविशिष्टतादृशायां रात्रित्वमिष्टत्वात् ।। तथा च एतद्द्वीपोत्पन्नपावकविरश्मि
ध्वंसविशिष्टप्रलयान्यजन्यकालत्वं रात्रित्वमिति एतल्लक्षणं पर्यवसन्नम् । न चैतस्मिन्पक्षे
सुमेरोरुत्तरभागे रम्यकान्तर्भारतवर्षे एव त्रिरिति पुराणादिसिद्धतया एतत्रावपि सुमेरोरुत्तरदिग
वच्छेदेन रविरश्मिसत्वेन जम्बूद्वीपात्मक एतद्द्वीपवर्तिपावकविरश्मिध्वंसाधिकरणत्व
स्य रात्राव भावात् असंभवापत्तेरिति वाच्यम् । एतद्द्वीपपदस्य भारतवर्षपरत्वात् । न चैवं राम
सति भारतवर्षातिरिक्तवर्षीयरात्राव व्याप्तिरिति वाच्यं मा ।। एतल्लक्षणस्य भारतवर्षीयरा १८

त्रैविलक्षत्वात्स्वर्णातपात्। त्रिलक्षणस्य वर्णातपघटितत्वेनादोषात्। नचैवमप्यसंभवोस्ति
यश्चिमसमुद्भूतो। एकं द्रव्यं त्रिसत्त्व एवकामहापादोगसूर्प्पोदयस्य ज्योतिःशास्त्रसिद्धत्वपाभा
तत्वस्वीपयावद्भूविरश्मिध्वंसस्याभावात्नववर्षीयप्यत्रावसन्वादितिवाच्यं। एवं सति। एतद्बीप
पदेनतत्तद्देशस्थेवावच्छिन्नानां तथाच तत्तद्देशोत्पन्नपावद्भूविरश्मिध्वंसाधिकरणत्वस्य ति
प्रत्ययान्यतत्तद्देशीयपाकालत्वं तत्तद्देशीयरात्रित्वमिति। त्रिलक्षणापर्य्यवसन्नं। नचैवं सत्य
पितत्तद्देशोत्पन्नानवह्निवालुकाप्रविष्ट। विरश्मानादपासंभवः। अत्रावपितेषासत्वादिति
वाच्यमः स्वपरप्रकाशकत्वस्य। विरश्मोविशेषणत्वात्। तपदिचवह्निवालुकाप्रविष्टविर
श्मिव्यावृत्तस्वपरप्रकाशकत्वं द्रव्यंचामिति विभाव्यते। तदा एव विरश्मिपदेन रविरश्मिसंयोगवि
वक्षणात्। वह्निवालुकावृत्तिरविरश्मिसंयोगस्यतत्तद्देशावृत्तित्वाभावेनानुपपत्त्यभावात्
किंचितु। वह्निवालुकप्रविष्ट। विरश्मानतत्तद्देशोत्पन्नत्वनासुपपन्नस्यते। अपितुतेजस्त्वे

भा म
१८
19

शृङ्गविनाशेनपातत्तद्देशवृत्तित्वविशिष्टविनाशानंतरंतत्सतांभकपरमाणुभिर्वेन्द्रिवात्तकादौतेजो
तत्त्वस्यात्रित्यतिनकोपिदोष इत्याहुः। ननु तत्तद्देशोत्पन्नपाकवद्भिर्विशिष्टसंयोगनाशाधिकरण
त्वसत्ति प्रत्यपान्यतत्तद्देशीयजन्यकालत्वनतत्तद्देशीयपरत्वमित्यापिलक्षणमशुद्धमात्रम
प्योत्पन्नविनष्टदेशविशेषीयपरत्वावसंभवात्तत्तद्देशवृत्तित्वविशिष्टसंयोगस्याप्रसिद्ध्यात्तत्र
तद्घटितलक्षणाकरणासंभवादिति चेत्तएवं सति तत्तद्देशवृत्तिर्योयोविशिष्टसामान्याभावाधि
करणत्वानत्वघटककप्रत्यपल्यपान्यकालत्वस्यतत्तद्देशापरत्वलक्षणत्वेनानुपपत्त्यभावा
दिति गुणाश्चतुर्विंशतिः। रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाप
रत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहधर्माधर्मसंस्कारशब्दभेदात्तानचै
वसति रूपरसगंधस्पर्शसंख्यापरिमाणानिपृथक्त्वसंयोगविभागौपरत्वापरत्वबुद्धयः सुख राम
दुःखेच्छाद्वेषप्रयत्नाश्चेति कणादमहर्षिसूत्रविरोधः तेनसप्तदशगुणानामेवप्रतिपादनादि १८

णतिवाच्यमाणेन तत्तत्रस्थ्यचकारणगुरुत्वादिसप्रगुणसमुच्चपातात् अन्यथा तेषां गुणत्वेनोत्का
र्येनाविरोधात् न चात्रयथा संस्कारत्वं भावनादिसंस्कारत्रयविभाजकमतथा अदृष्टत्वमपिध
र्माधर्म्मविभाजकं संभवतीति कथं तदुद्धृतं धर्म्मत्वाधर्म्मत्वयोस्तु हि भाजकोपाधित्वमुक्त
मितिवाच्यम् अदृष्टत्वस्यैकाभावेन विभाजकोपाधित्वासंभवात् न चादृष्टत्वं जातिः प्रमाणा
भावात् तद्बाहुल्ये चार्थ्यः कार्य्यकारणालतरानोजातित्वव्यवस्थापकानामत्राभावादिति अ
त्र कार्यकारणपदे कार्यत्वकारणत्वपरे लक्षणापदं व्यञ्जकपरमिति ध्येयं अत्रेदं विचार्यते का
र्यमात्रं प्रति अदृष्टस्य हेतुतया कार्य्यसामान्यजनकतावच्छेदकतया लाघवाददृष्टत्वं जाति
र्यापाद्यमानेन च धर्म्मत्वाधर्म्मत्वयोरेव तथात्वमस्त्विति वाच्यम् अनयोः सति कार्य्यकारणभाव
द्वयकल्पनागौरवस्य दुरुद्धरत्वादिति यदि च तथाविधसामान्यकार्य्यकारणभावेन मानाभावाति
विभाव्यमानेन थापद्यदृष्टपदशक्यतावच्छेदकतया सिद्धायास्त्वदृष्टत्वजातेः कोकारपितानव

माम
१०
४०

शक्यतावच्छेदकत्वेन जातिसिद्धौ विभुपदशक्यतावच्छेदकतयापि विभुत्वाख्यजातिसिद्धा
पत्तिरिति वाच्यम् । तुल्यपुरस्काराभूतपदशक्यतावच्छेदकतया सिद्धस्य भूतत्वजातेसांकर्य
प्रसंगेन तथात्वानुभवशक्यत्वात् । अथ अदृष्टपदार्थत्वधर्मित्वाधर्मित्वपुरस्कारेणैव शाब्दबो
धस्यानुभवसिद्धतया तयोर्वादृष्टपदशक्यतावच्छेदकत्वमः अन्यथा हर्यादिनानार्थवा
चकपदस्यापि शक्यतावच्छेदकतया सिंहाविष्वादिसाधारणहरित्वादिरूपजातिसिद्ध्याप
त्तौ नानार्थोच्छेदप्रसंगः । हर्यादिपदानां विषयत्वासिंहत्वप्रकारेणैव बोधानुभवसिद्धः इति हरि
पदस्य विष्णुत्वासिंहत्वादेरेव शक्यतावच्छेदकत्वमिति युक्तिस्तु प्रकृतेन तुल्यैति चेन्न
तथापि पुरस्कृतत्वज्ञानिनावाह्वितानि पिंडकर्माचारेण धर्माधर्मानुत्पत्त्या अदृष्ट
ति वासनायाहेतुत्वस्यावश्यकतया तज्जन्यतावच्छेदकत्वेनादृष्टत्वजातिसिद्धेः न च वा
सनात्वस्यैकाभावाननुगतत्वाविधकार्यकारणभावएवासिद्धः इति वाच्यम् । वासनात्वस्य

राम
१०

स्वार्थव्याप्यजातित्वात् । न चात्र जातौ प्रमाणाभावः । अहं गौरोऽहं सुखीत्यादिभिः व्याप्तानकार्य-
तावच्छेदकतापाततः श्रवस्य जातित्वसिद्धेः तथा चात्मत्वव्याप्यजातिविशेषो नास्तीति
ग्रन्थकारैस्तेन रूपेण विभागो न कृत इति न वाच्यम् ॥ अपि त्वेवं तत्र छद्मस्य निपत्तु
मशकत्वादिजातिव्याप्ये नैव कर्मत्वा धर्मत्वाभ्यां तथा विभागः कृत इति । अत एव वेगत्वभा-
वनात्वादिजातिसत्त्वेऽपि संस्कारत्वेन तेषां विभागोऽपि संगच्छत इति ध्येयम् । ननु तथापि चतुर्वि-
शतिर्गुणा इत्यसंगतम् । चतुर्विंशतित्वस्य संख्यारूपस्य गुणे अभावात् । गुणे गुणानङ्गीकारादि-
ति चेत् । सम्भवत्येव पादप्रकृते चतुर्विंशतित्वसंख्या तदेव न । अपि तु तावद्गुणमात्रविषयक-
समूहालम्बनात्मकज्ञानविशेषः । स च विशेष्यतासम्बन्धेन तावद्गुणवृत्तिरिति नानुपपत्तिः ।
कर्माणि पञ्च उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् ॥ न च भ्रमणादीनाम-
पि कर्मत्वे कथं कर्मणः पञ्चविधत्वमात्रमिति वाच्यम् भ्रमणादीनां गमनमध्ये निवेशात् ।

सा॰सं नानंदाहमाघ्यकाणः भ्रमणरेचनसंस्पन्दनोर्द्धज्वलनतिर्य्यग्गमननमनोन्नमनादयो गमनशेषा
२१ इति। सामान्यं तावत् द्विविधं परमपरं चेति। ननु किं नाम सामान्यत्वं न तावदनेकवृत्तित्वं। अ
२१ भावादावतिव्याप्तेर्नापि समवेतत्वं अनित्यत्वादावतिव्याप्तेरिति चेन्न। नित्यानेकसमवेतत्वस्यैव सा
मान्यत्वरूपत्वात्। तदाहुरेवाप्यर्थाः। स्वाभाविकीनां तु कोऽधर्म्मैः सामान्यमिति। अत्र स्वाभा
विकत्वमनेकसामवेतत्वं। अनानां तु कहानित्यत्वं तथा चोक्तं एवार्थः पर्प्पवस्यति। एतच्च सामा
न्यत्वं जातित्वापरनामकं नैकव्यक्तिमात्रवृत्तिधर्म्मे यथा आकाशत्वादौ। न वा न्यूनानतिरि
क्तधर्म्मे यथा घटत्वकलशत्वादौ। न वा परस्परव्यभिचारित्वे सति समानाधिकरणधर्म्मद्व
ये यथा भूतत्वमूर्त्तत्वोभयत्र नावा जातित्वेन तुल्यपुद्धग तत्रापि जातिसंतरसाधारणत्वे जातिसं
तांगीकरणात् तत्रापि तथाविधवैजात्यानंगीकारेणानवस्थानात्। अतएव न समवा
ये सामान्यांगीकारः। तथा सति तत्रापि समवायाख्याकारावश्यकत्वेनानवस्थानात्। नवा राम २१

विशेषपदार्थे सामान्यं तथ्यासति सामान्यवद्भिन्नत्वे सति समवेतत्वं विशेषत्वमिति प्राची
नकृतविशेषलक्षणव्याघातप्रसंगात् । न च्यासति तस्यापि सामान्यवत्वे सामान्यवद्भिन्नत्वाभ
वात् । केचित्तु । जातिरूपत्वेन विशेषपदार्थसाधकप्रमाणाबाधात् विशेषेन जातिः न तु त
ल्लक्षणव्याघातात् तत्र जातिसंगीकारेपि गुणकर्मभिन्नत्वे सति अनेकासमवेतत्वे सति सम
वेतत्वं विशेषत्वमिति विशेषलक्षणसंभवादित्याहुः । नाप्यभाववत्वं सामान्यं तस्य समवायाभ
वात् । न च्याच संग्रहश्लोकः । व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः । रूपहानिरसंबंधो जाति
बाधकसंग्रह इति । अत्र रूपहानिरित्यस्य विशेषपदार्थलक्षणहानिरित्यर्थः । जातिरूपत्वेन
विशेषसाधकप्रमाणबाध इत्यर्थो वा । न च्याचैवं क्रमेणाव्यवस्थितं सामान्यं परापरभेदेन
द्विविधमित्युक्तं । परं सामान्यं सत्ता द्रव्यगुणकर्मत्रितयवृत्तित्वात् । अपरं सामान्यं द्रव्यत्वा
दि द्रव्यादिकेकमात्रवृत्तित्वेन सत्तापेक्षयान्यूनवृत्तित्वात् । अनत एव घघदपे [illegible] आ

सा.सं.
११

क्वाश्रयकं तत्र द्रव्ये रूपपरंपराघद्रव्ये रूपपाकरूपनाश्रयकं तत्र द्रव्ये रूपान्तरमिति गीयते इति। ननु
सत्तारूपसामान्ये किं प्रमाणमिति चेत् द्रव्यं सत् गुणः सन् कर्म सदित्याद्यनुगताकारप्रतीतिब
लात् सत्तासिद्धिरित्यवेहि। न चैवं सति सामान्यं सदिति प्रतीतिबलात् सामान्येपि सत्तासिद्धिप्रसंग
इति वाच्यं। बाधकाभावे सति अनुगतप्रतीत्या तत्र जातिसिद्धिः प्रकृते तु बाधकस्य सत्त्वात्
तत्र विद्यमानत्वरूपसत्त्वविषयकत्वेनैव प्रतीत्युपपत्तेः। किंचः समवायसंबंधेन नीलादिकं प्र
ति स्वाश्रयसमवेतत्वसंबंधेन कुम्भे हि ठनाकस्पंनीलादेस्तस्मिन्नपि सत्त्वेनातत्र समवायेन नी
लापत्तिवारणाय जन्यसत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यस्य हेतुत्वमवश्यं कल्पनीयम्। तथा
च द्रव्यजन्यतावच्छेदककोटिप्रविष्टत्वेन सत्ताजातिरिति हि इति अधिकं मत्कृतपदार्थखंडनटिप्प
णे सत्तायाजातित्वविचारप्रसंगे अवधेयम्। द्रव्यत्वमपि द्रव्यं द्रव्यमित्यनुगतप्रतीतिबलात् राम
सिद्धमिति बोध्यं। अत्र सत्तासामान्यसंज्ञिका द्रव्यगुणकर्मणां त्रितयविशेष्यकसत्त्वप्रकार ११

कप्रतीतिप्रकारत्वात्। न तु विशेषसत्तिकापि जातिमत्प्रतीतियोगिकभेदासाधकत्वात्। द्रव्यत्वा
श्रिकं तु द्रव्यत्वादिप्रकारकानुगतप्रतीतिप्रकारत्वात् जात्याश्रयगुणादिप्रतियोगिकभेदसाध
कत्वाच्च सामान्यविशेषसंज्ञकं इत्यनुसंधेयम्। संज्ञाकथनप्रयोजनं च साधर्म्यादिप्रदर्शनेन
न व्युत्क्रमं भविष्यतीति विशेषास्तु नित्यद्रव्यमात्रवृत्तयो बहुविधा एव। प्रमाणं तु तत्र अयं परमाणु
स्तत्परमाण्वसमवेतसमवेतव्यन्यधर्मासमवायी नित्यद्रव्यत्वे सति तत्परमाण्वसमवेतधर्म्मि
वृत्तो घटात्मादिवदित्यनुमानम्। अत्र द्रव्यत्वादिभिः सिद्धसाधनवारणाय असमवेतान्तं साध्य
धर्म्मिविशेषणं। एकत्वादिकमादाय सिद्धसाधनवारणाय समवेतान्यत्वमपि धर्म्मिविशेष
णम्। अभावमादाय सिद्धसाधनवारणाय तथाविधधर्म्मवत्त्वं विहाय तत्समवायित्वं निवे
शः। द्व्यणुकादौ व्यभिचारवारणाय हेतौ नित्यद्रव्यत्वनिवेशः। तत्रापि अभावे व्यभिचारवारणा
य द्रव्यत्वनिवेशः। तत्परमाणौ व्यभिचारवारणाय तत्परमाण्वसमवेतत्वनिवेशः। न तु विशेष

सास
२३
२३

संत्तकाएवात्रत्यंतव्यावृत्तबुद्धिहेतुत्वात्।अत्यंतव्यावृत्तबुद्धिहेतुत्वंचसमवायेनानुगतध
र्म्मप्रकारिकायाबुद्धेः।तदप्रकारत्वेसतिहेतुविधयाश्रयमेतत्स्मान्भिन्नेइत्याकारकानुमि
तिप्रयोजकत्वंतदपितेषांतद्व्यक्तित्वेनैवाननुविशेषत्वेन।इममद्रव्यासमवेतत्वेसतिसमवेत
त्वरूपत्वेसतिसमवेतत्वरूपविशेषत्वविशिष्टस्यसर्वत्रनित्यद्रव्यत्वेनव्यभिचारात्।अतए
वविशेषःस्वरूपतोव्यावर्त्तकइतिप्रवादोपिसंगच्छते।तद्व्यक्तित्वेनैवव्यावर्त्तकत्वस्यस्वरूप
तोव्यावर्त्तकत्वपदार्थत्वादिति।नचैतदनुमानमप्रयोजकं।तत्तत्परमाणोःपरमाणवंतरएव
रूपाभेदासिद्धेरेवानुकूलतर्कत्वात्।नचतत्तदेकत्वादिनैवतथाविधभेदासिद्धिरितिवाच्य
म्।सामान्याश्रयस्यसामान्यरूपेणैवभेदसाधकत्वनियमेनतत्तद्व्यक्तित्वादिनाएकत्वादे
र्भेदासाधकत्वादिति।एतेविशेषाअंत्यसंत्तका।अंत्येऽवसानेव्यावर्त्तकास्तएभाववंतोविप राम
तइतिव्युत्पत्तेः।दीधितिकृत्मतेतुविशेषाख्यपदार्थेमानाभावः।नचोपदर्शितानुमा २३

नमेवमानं तस्याप्रयोजकत्वात्। न चैतत्प्रमाणवादौ तत्प्रमाणवादिभेदसाधनस्यान्यथा
नुपपत्तिरेव तत्रानुकूलतर्क इति वाच्यम् विशेषपदार्थानंगीकारेपि तत्तदेकत्वादीनामे
व तद्व्यक्तित्वेन तथाविधभेदानुमापकत्वात्। अनुपपत्तिविरहात्। सामान्याश्रयस्य साम
न्यरूपेणैव भेदकत्वनियमे मानाभावादित्यास्याङ्कः। समवायस्तु वैशेषिकमते नित्य एक ए
व तल्लक्षणं च अयुतसिद्धानामाधार्याधारभूतानामिहेतिप्रत्ययहेतुः समवाय इति। अ
त्र अयुतसिद्धानामित्यस्यैव विवरणम्। आधार्याधारभूतानामिहेतिप्रत्ययहेतुः समवा
य इति। अत्र अयुतसिद्धानामित्यस्यैव विवरणम्। आधार्याधारभूतानामिति। संबंधर
तिशेषः तथा च सर्वदा आधार्याधारभावापन्नानां कालिकदैशिकविशेषणतातिरिक्तः
संबंधः समवाय इत्यर्थः कथमयुतसिद्धपदात्तथाविधार्थलाभ इति चेत्तत्रैवाह। प्रमिश्र
णामिश्रणयोरप्यनुशासनबलात्। अत्र युधातोः प्राप्तिरर्थः। तेन प्राप्त्यंशे अभावः नञ्यो

तासं:
२४

मेदः। तथा चायुतसिद्धस्याप्याश्रयपर्य्यवसन्नो प्राप्त्याश्रयमित्त्रोर्यः प्राप्तिः संबन्धः सिद्ध
त्वमत्र सा वैकालिकत्वम्। एवं च सर्वदा संबन्धाश्रयार्थक्यात्युतसिद्धशब्दस्य सर्वदाश्रिताधार्य्या
धारभावापन्नार्थ एव पर्य्यवसानात्। न चात्र घटकपालयोः समवायेऽव्याप्तिः कपालोत्पत्ति
कालावच्छेदेन कपाले घटस्याविद्यमानतयानयोः सर्वदाश्रिताधाराधेयभावविरहादिति वा
च्यम्। समवायस्यैकत्ववादिनां वैशेषिकाणां मतमते दैकत्वसमवायलक्षणासमर्थनादेव स
र्वत्र लक्षणागमनसंभवादिति न चैवसति इहेति प्रत्ययहेतुरित्यंशो व्यर्थ इति वाच्यं। तस्य स
मवायप्रमाणसूचकत्वेन लक्षणघटकतया वैयर्थ्याभावात्। अनेन समवाये किं प्रमाणमित्य
तामिति चेदनुमानमेव। तथाहि। इह तन्तुषु पट इति प्रतीतिः संबन्धविषयणा विशिष्टबुद्धि
त्वादित्यनुमानात्संयोगादिसंबन्धविषयकत्वबाधसहकृतात्संबन्धविषयकत्वसिद्धिः स राम
मवायसंबन्धविषयकत्वमादाय पर्य्यवस्यतीत्यनुमानात्समवायसिद्धिरिति निवोपदर्शि २४

तरां त्वासमवायसिद्धावपि तस्यैकत्वनित्यत्वयोः सिद्धिरिति वाच्यं लाघवादेव तस्य तत्कल्प
नात्। अत एव नित्यः संबंधः समवाय इति लक्षणं नरमपि संगच्छत इति। अत्र दीधितिकारा एव
मतयः। समवायस्यैकत्वे वाय्वादावपि रूपवत्त्वप्रतीतिप्रसंगः। भवन्मते तत्र संख्यादिसमवा
यसत्वेन रूपसमवायस्यापि सत्वात्। न च रूपनिरूपितत्वविशिष्टसमवायस्यैव रूपसंबंधतया
नोक्तापत्तिः। बाधादिति तत्र विशिष्टसंबंधासत्वादिति वाच्यम विशिष्टस्य विशेष्यादनतिरिक्त
यातत्रापि तत्संबंधसत्वात्। न च विशिष्टनिरूपिताधिकरणतायाः अतिरिक्तत्वेन तादृ
शाधिकरणतायाः एतत्संबंधत्वांगीकारेण नानुपपत्तिरिति वाच्यं तयाविधानंतातिरिक्ता
धिकरणताकल्पनापेक्षया समवायानंत्यकल्पनायाः एवोचितत्वात् अत्र मत्पानत्यावच्चा
नेनातिरिक्ताधिकरणताकल्पनेनातिरिक्तैकसमवायकल्पने न च गौरवादिति। अत एव
यपाद्ययोरेकतरोऽविनश्यदवस्थोत्पत्संबद्धं एवं तिष्ठतीति तद्द्वयमयुतसिद्धं तयोः कालिके

सा०सं०
१५

शिकाद्यतिरिक्तः संबंधः संबंधश्च समवाय इति समवायत्वलक्षणमाहुः ॥ प्राचीनाः ॥ अन्यथा सम
वायस्यैकत्वे सर्वदा आधाराधेयभावापत्त्यनंतसंबंधस्वीकारो त्वालक्षणसत्वेन तल्लक्षणं
तरप्रणापनस्यानुचितत्वापत्तेरित्याहुः ॥ उपदर्शितरीत्या निरूपितानां षट्पदार्थानामिदानीं
साधर्म्याण्युच्यंते ॥ तत्राद्यमभिधेयत्वं च अत्र तद्वृत्तिधर्म्मिमात्रमानतरेतरभेदानुमापकम् ॥ अ
त्रावच्छ्यमाणस्य साधर्म्यातिमभावपदार्थस्याप्यन्यत्वापेन वृत्तिः ॥ तथा च द्रव्यादिषट्पदार्था
नामस्तित्वं साधर्म्यमस्तित्वं च वर्त्तमानत्वम् ॥ यत्तु ॥ अस्तित्वं प्रतियोगिनिरूपणानधीननि
रूपणाविषयत्वं तदपि प्रतियोगिविषयकज्ञानविषयकं पघटत्वं तद्भिन्नत्वं भावत्वमिति
यावत् ॥ भावत्वं च समवायेकार्थसमवायान्यतरसंबंधेन सत्तावत्त्वमनुवर्त्तमानत्वं तथा
सति अभावस्याधाराप्रायपत्तिरितिपदार्थैरुक्तं तन्न विचाराहम् ॥ अभावस्याप्यधिकरणधर्म्मि राम
स्य भावस्य धर्म्मित्वविशेषाभावात् ॥ तद्वृत्तिधर्म्मिस्यैव तस्य साधर्म्यपदार्थत्वमित्युक्तत्व १५

ना। अतएव ज्ञेयत्वाभिधेयत्वप्रमेयत्वादिसाधारणधर्माणामपि न ज्ञातिः। न हि नाम भिद्यानुमापकधर्म्म
कथनमिदमयुक्तम् इति धर्म्मस्वरूपतत्साधर्म्यकथनमिदमक्रमाचार्य्यैरिति। आचार्य्यप
दैर्न्नयं पर्यवसितो धात्वर्थं किंचित एवं द्रव्यादिषट्पदार्थानां ज्ञेयत्वाभिधेयत्वं साधर्म्यं। ज्ञेय
त्वं ज्ञानविषयत्वं ज्ञापकत्वं च ज्ञप्यमानलिङ्गकारणतावादिनां वैशेषिकाणां चावस्तुमा
त्रस्यैवानुमित्यात्मकज्ञानकारणतया ज्ञापकत्वोपपत्तेः। अभिधेयत्वं शक्तिविषयत्वं अ
भिधायाः शक्तेः पर्यायत्वात्। शक्तिश्च अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छा। द
व्यानित्यद्रव्यभिन्नानां द्रव्यादिपञ्चानामाश्रितत्वं।। साधर्म्यमाश्रितत्वं च त्रिसमवा
येन वर्त्तमानत्वं समवायस्य विसमवायात्मकस्वस्वरूपसंबंधेन वर्त्तमानतयाऽप्रदर्शितत्वसा
धर्म्यसमवायसाधारणमिति ध्येयम्। मूर्त्तभिन्नानां द्रव्यादिपञ्चानां निष्क्रियत्वं साधर्म्य
निष्क्रियत्वं च समवायेन क्रियाभाववत्त्वं मानाभावाद्गुणादौ कालिकसंबंधेन क्रियाया

सा॰सं॰ १६ 26

सत्वेपिवृत्तिः।नवाअभावसाधारण्यम्।नचतत्पापिनिष्क्रियावितष्टमत्रैअतिव्याप्ति
वास्तांक्रियावद्वृत्तिद्रव्यत्वव्याप्यजातिशून्यत्वेसतिभावत्वस्यैवतदर्थत्वात्।समवायाभि
न्नानांद्रव्यादीनांचानांसमवायित्वानेकत्वसमवायान्यत्ववत्त्वभाववत्वान्निसाधर्म्यो
त्तिसमवायित्वंचात्रसमवायभिन्नत्वेसतिअनुयोगिताप्रतियोगितान्यतरसंबंधे
नसमवायवत्त्वम्।नातःसमवायसाधारण्यापत्तिः।नवाजातिसाधारण्यानुपपत्तिः।
अनेकत्वंचात्रतत्तद्व्यक्तिविशेषगुणादौतदभावात्।अपितुस्ववृत्त्यभावविभाज
कोपाधिमत्प्रतियोगिकप्रतियोग्यवृत्तिभेदवत्त्वप्रतियोग्यवृत्तित्वंनिवेश्यात्
समवायघटितमप्यभेदमादायनसमवायसाधारण्यापत्तिः।द्रव्यभिन्नानांपंचानां
निर्गुणत्वनिष्क्रियत्वेसाधर्म्येनिर्गुणत्वंचात्रगुणगणाभाववद्विशिष्टभावत्व राम
म्।नातोभावसाधारण्यापत्तिःनिष्क्रियत्वंचघटितसमवायसंबंधेनक्रिया १६

भावववत्त्वं गगनादिसाधारण्यापत्तेः तथापि कर्म्मवद्वृत्तिसत्ताख्यजातिमत्त्वमभाव
त्वं तद्वद्वस्तूनामपि द्रव्यादित्रयाणां सत्तासंबंधः सामान्यविशेषार्थशब्दाभिधेयत्वध
र्म्मो धर्म्मा घटमक्रू तत्वानि सा धर्म्म्याणां सत्तासंबंधश्चात्र सत्तासमवायः नानाः सत्त्वप
एकार्थसमवायमादाय जात्यादावतिव्याप्तिः सामान्यविशेषो द्रव्यत्वादिः अर्थशब्दा
भिधेयत्वं चात्र वैशेषिकसंकेतसंबंधेनार्थशब्दवत्त्वं वैशेषिकैः स्वशास्त्रे द्रव्यादित्रया
णामनुगतरूपेणाव्यवहारार्थमर्थशब्दस्य द्रव्यादित्रिषु संकेतितत्वात् धारणाध्यानस
माधित्रयाणामनुगतधर्म्मेणायोगशास्त्रे व्यवहारार्थं संयमशब्दस्य तत्र संकेतितत्वा
दिव परं तु संयमशब्दात् धारणात्वादिरूपधर्म्मत्रयप्रकारकोऽपि बोधः अर्थशब्दात्तु
कदाचिद् द्रव्यादित्रयाणां प्रत्येकं कदाचित् समुदितानां तेषां सत्तावत्त्वस्य तत्र शब्दे
नावच्छेदकत्वादिति विशेषोऽवधार्य्यः कथं संयमशब्दादेकदा धारणात्वादिरूपधर्म्म

सा.सं. त्रयपुरस्कारेण बोध इति चेन्न द्वेधा हि यथा पुष्पवंतपदादेकदा दिवाकरत्वनिशाकरत्वोभय
११ प्रकारकबोधः तथा संयमपदादपि एकदा धारणात्वादिरूपधर्म्मत्रयप्रकारकबोध इति
27 स्तुल्यत्वात् तत्र यथा हि पुष्पवंतपदस्य शक्यतावच्छेदकता दिवाकरत्वनिशाकरत्वोभयत्र
पर्य्याप्ताऽभयावच्छिन्नविशेष्यकपुष्पवंतपदशक्तिज्ञानं समूहालंबनं दिवाकरत्वनि
शाकरत्वोभयप्रकारकसमूहालंबनशाब्दबोधकारणमिति मतम् यदि तदा संयमपद
स्यापि शक्यतावच्छेदकता तथाविधधारणात्वादिरूपधर्म्मत्रये पर्य्याप्ता तथाविधधर्म्म
त्रयावच्छिन्नविशेष्यकसंयमपदशक्तिज्ञानं तथाविधधर्म्मत्रयप्रकारकशाब्दबोधप्र
तिहेतुः। यदि दिवाकरत्वं निशाकरत्वं प्रत्येकमेव पुष्पवंतपदशक्यतावच्छेदकं दिवाक
रत्वावच्छिन्नविशेष्यकपुष्पवंतपदशक्तिज्ञानं निशाकरत्वावच्छिन्नविशेष्यकं तथा राम
विधशक्तिज्ञानयोरुत्पन्नत्वे द्विधर्म्मप्रकारकशाब्दबोधहेतुत्वे यौगपद्यतात्पर्येण दिवाकरत्वनिशा ११

कत्वोभयप्रकारकशाब्दबोधजननायेत्तथाविधशक्तिज्ञानद्वयस्यैवसहकारित्वाभ्युप
गमः। अतोननानार्थाविशेषः। तत्रप्रत्येकशक्तिज्ञानादपिफलोत्पत्तेरेवविशेषत्वात्। त
थापिनक्षतिः। स्वयमपदेपितादृशत्वेनहेतुत्वापिहितत्वाभावादिति। धर्म्मकर्तृत्वंधर्म्मज
नकत्वम्। यद्वंतु अधर्म्मजनकेदुःखादित्रयंविहायसाधर्म्म्यमुक्तम्। अधर्म्मकर्तृत्व
मधर्म्मजनकत्वम्। दुःखमपिधर्म्मजनकंदुःखादित्रयंविहायसाधर्म्म्यंह्येपमित्या चापि
स्तत्रमनोरमायाम्। तथासतिधर्म्माधर्म्मोभयजनकेऽभयोरव्याप्त्यापत्तेः। नचाधर्म्मज
नकान्यत्वेसतिधर्म्मजनकवृत्तिभावविभाजकोपाधिमत्त्वंधर्म्मजनकत्वम्। धर्म्मजन
कान्यत्वेसतिअधर्म्मजनकवृत्तिभावविभाजकोपाधिमत्त्वमधर्म्मजनकत्वमित्येयमतोनो
क्तानुपपत्तिरितिवाच्यम्। एवंसतिसत्यंतवैयर्थ्यापत्तेः तद्घटितेतथाविधधर्म्मद्वयस्य
धर्म्मजनकाधर्म्मजनकोभयसाधारणस्यधर्म्मत्वोपपत्तेः तयोःपरस्परबहिर्भावेन

सा.सं. तथा विसा।धर्म्मप्रदीपोक्तोऽन्याप्यत्वादिति। ननु द्रव्यादित्रयाणां धर्म्माधर्म्मजनकत्वे मा
२८ नाभावात्कथं तत्रयाणां तथात्वं धर्म्मप्रमित्युक्तौ मितिचेन्न। भूमिरापूमाना धर्म्मजन
28 यति। अपङ्क्तिपमानात्र धर्म्मजनयति। गंगाजलसंयोगो धर्म्मजनयति। चंडालादिसं
योगोऽधर्म्मजनयति॥ तीर्थसंयोगानुकूला क्रिया धर्म्मजनयति। म्लेच्छदेशसंयोगानु
कूला साऽधर्म्मजनयतीत्यादेर्धर्म्मशास्त्रे तत्रतत्र सुप्रसिद्धत्वात् द्रव्यादित्रयाणां धर्म्मा
दिजनकत्वस्य सुलभत्वात्। अथ सामान्यादित्रयस्य कथं तद्धर्म्माधर्म्मजनकत्वमिति चेन्न
इष्टेहि। भावनाया साध्यत्वात्स्वविषयताऽपादानत्वात्स्वाविषयतावायत्रात् त्र धर्म्माधर्म्म
जनकत्वनियमेन सामान्यादित्रये तथाविधविषयतयोरन्यतराभावेन धर्म्मादिजनक
त्वाभावः। सामान्यादित्रये तथाविधविषयतयोरन्यतराभावश्च भावनाजन्यत्वाभाव
ता भावनाजन्यव्यापाराभावात्। अत एव व्यापारव्यापारिणोरन्यतरस्त्र भावनाविषयत्व राम २८

मितिप्राचीनप्रवादोपि संगच्छत इति। द्व्यादित्रयाणां कारणवतामेव कार्य्यत्वानित्यत्वे
साधर्म्यम् इति। अत्र कार्य्यत्वं यदि प्रागभावप्रतियोगित्वं तदा ध्वंसेति व्याप्तेः। अतः प्रा
गभावप्रतियोगित्वे सति सत्वं अत्र कार्यत्वं रूपं। एवमनित्यत्वपदि ध्वंसप्रतियोगित्वं तदा
प्रागभावेति व्याप्तेः ध्वंसप्रतियोगित्वे सति सत्वं तद्रूपं वाच्यम्। कारणत्वं पारिमाण्डल्या
दिभिन्नद्व्यादित्रयाणामेव साधर्म्यम्। पारिमाण्डल्यं चात्र परमाणुपरिमाणम्। न च सा
यमानलिंगकरणतावादिना वैशेषिकाणां परमाणुपरिमाणलिंगकानुमितेनोपरमा
णुपरिमाणस्यापि हेतुतया कथमेतदिति वाच्यम्। कारणत्वेनात्रात्मधर्म्मातिरिक्तभा
वकार्य्यप्रतिकारणत्वस्य विवक्षितत्वात्। पारिमाण्डल्यादाख्योदिपदेन परममहत्वमन्त्या
वयविरूपरसगंधस्पर्शसंख्यापरिमाणानि। द्विपृथक्त्वपरत्वापरत्वानि विनश्यदवस्थद्रव्य
संयोगविभागाः कर्म्माणि अन्त्यशब्दश्चरमः संस्कारो ज्ञानानवगत्वेन। ज्ञानपदं चात्रयोग्य

सा०सं०
१८
२५

त्वानोपादानाविषयकप्रत्यक्षादिमत्त्वं। अतदुपादानप्रत्यक्षस्यात्मधर्मेतरभावकार्य
जनकत्वेपि न क्षतिः। उपलक्षणं चेतनत्वस्य खंडः विछिन्नबुद्धिबाधकोपि द्रष्टव्याः। द्रव्यादित्रया
णां नित्यभिन्नानां द्रव्याश्रितत्वं साधर्म्यं। द्रव्याश्रितत्वं चान्यद्रव्यसमवायिकारणकत्व
मा द्रव्यपदोत्कीर्तनं च स्वरूपकथनं समवायिकारणत्वमात्रं साधर्म्यम्। कर्मजसंयो
गाविभागानित्यवर्गातिरिक्तानां द्रव्यादित्रयाणां गुणासमवायिकारणकत्वं साधर्म्यम्।
असमवायिकारणकत्वं चासमवायिकारणजन्यत्वम्। सामान्यादीनां त्रयाणां स्वात्म
सत्त्वबुद्धिलक्षणत्वाकार्यत्वाकारणत्वासामान्यविशेषवत्त्वानित्यत्वार्थशब्दानभिधे
यत्वकारणानपेक्षत्वानि साधर्म्याणि। स्वात्मसत्त्वमत्र सत्ताभावाद्विशिष्टभावत्वम्। बु
द्धिलक्षणत्वं बुद्धिमात्रप्रमाणकत्वम्। सदित्यादिबुद्धिः समवायेनानुगतधर्मविष
यिणी। तादात्म्यसंबन्धेन सदित्यादिबुद्धेस्त्ववधानमानस्यैव सत्त्वादिसामान्यप्रमाणे राम
१८

नयाबुद्धेरेवसामान्यादिप्रमाणत्वात् । उपमानलिंगकरणतावादिनां वैशेषिकानां
हेतोरेवानुमानप्रसक्तस्य गोत्वजातिविषयकतया च स्तुत्यादेरपि सामान्यप्रमाणत्वात्
बुद्धिविशेष्यत्वमित्यर्थो बुद्धिपदस्य बुद्धिविशेषपरतया लक्षणपदस्य विशेष्यपरत
योपपादनायेति न दोषः । ननु कार्यत्वं न प्रागभावप्रतियोगित्वं नित्यद्रव्यादावति
व्याप्तेः । अपि तु प्रागभावप्रतियोग्यवृत्तिभावविभाजकोपाधिमत्त्वं तदिति घटपटा
नुसामान्यादीनां त्रयाणामकार्यत्वे किं प्रमाणमिति चेदत्र आचार्याः सामान्यस्य
कार्यत्वे प्रतिव्यक्तिभेदेन भिन्नतया नित्यानेकसमवेतत्वरूपजातिलक्षणस्य तत्र बा
धात् प्रसंगात् सामान्यमकार्यमेव । न च सर्गाद्यकालीनव्यक्तिबलादेव सामान्यमु
त्पद्यते न त्वेवं सर्वे घटे संबन्धस्याकारणानुपपत्तिभाव इति वाच्यम् । अतएव तथा
विधसामान्यलक्षणाभावात् सामान्यलक्षणघटकनित्यत्वस्य ध्वंसप्रागभावाप्र

सा॰ सं॰ तियोगित्वरूपस्य तत्राभावात् । न च नित्यत्वं तत्र ध्वंसाप्रतियोगित्वमात्रं तच्च सामान्येना
३० नुपपन्नमुपदर्शितं । तिरोत्पन्नस्य सामान्यस्य ध्वंसवदनंतताभ्युपगमादिति वाच्यम् ।
उत्पन्नभावस्य विनाशित्वनियमभंगात् तथा वक्तुमशक्यत्वात् । यदि च तादृशनियमे
30 प्रमाणाभाव इति विभाव्यते तेन व्याप्तिसामान्यस्य कार्य्यत्वमवश्यमभ्युपेयं । तत्प्राग
भावादिकल्पने गौरवादिति । एतेन विशेषसमवाययोरप्यकार्य्यत्वं व्याख्यातम् । आचा
र्य्यास्तु विशेषस्य कार्य्यत्वे विशेषोत्पत्तिपूर्वकाले अवश्यमेकनित्यद्रव्ये अपरनित्यद्र
व्यभेदाभावापत्तिः । विशेषस्य स्वोपपादनीयभेदसमानकालीनत्वनियमात् । व्याप
काभावेन व्याप्याभावापत्तेः । न चात्रेष्टापत्तिः । तथा सति एकनित्यद्रव्ये अपरनित्यद्रव्य
भेदाभावस्य सर्वदा सत्त्वापत्तेः अन्योन्याभावस्य व्याप्यवृत्तित्वनियमादिति विशेषः अका
र्य्य आवश्यकः । एवं समवायस्य कार्य्यत्वे समवायिकारणजन्यत्वे भावकार्य्यस्य सम एम ३०

वायिकारणजन्यत्वनियमानुपपत्तिः। न जन्यत्वे तु समवायस्यापि समवायांगीकारेणा
नवस्थानापत्तेः। एवं समवायस्य कार्य्यतयाभ्युपगमे पूर्ववत्कृततया संयोगलक्षणाक्रांते
त्वप्रसंगात्। एवं लक्षणव्याघातान्नित्यसंबंधस्यैव समवायत्वादित्यादिकमाहुस्त
द्विचारासहं तथा हि तार्किकैरुपपत्तणीयं। अकारणपदेनात्र आत्मधर्म्मेतरकार्य्यनिरूपि
ताकारणत्वं विवक्षणीयं। नातो ज्ञानेच्छादिसामान्यादेः कारणत्वापत्तिः। न चैवमपि
परमाणुपरिमाणादावतिव्याप्तिरिति वाच्यम्। आत्मधर्म्मेतरकार्य्यकारणवृत्तिभा
वविभाजकोपाधिमत्त्वस्य तदर्थत्वात्। असामान्यविशेषवत्त्वमपास्यान्याभाववत्त्वं त
दपि समवेतवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकसामान्यविरहवत्त्वे सति भा
वत्त्वं ध्येयमतो नाभावसाधारण्यापत्तिः। ननु अत्र तथाविधसामान्यविरहवत्त्वे किं
प्रमाणमिति चेन्न द्रव्ये हि सामान्ये जात्यंतरसाधारणसामान्यांगीकारेऽत्रापि सामा

सा॰सं॰ ३१

31

न्यांतर्गणाकारेऽनवस्थाप्रसंगः विशेषे सामान्यांगीकारे विशेषस्य गुणत्वापत्तिः निर्गुणत्वे
सति कर्मभिन्नत्वे सति सामान्यवत्त्वमेव गुणत्वात् तान्यपाचेसमानगुणकनिसङ्ख्यापोभे
दसाधनानुपपत्तिः समवाये समवायांतरांगीकारेनवस्थापत्तिः एतत्सामान्यादिषुत्रि
षु सामान्यानंगीकारे बीजमावश्यकस्साचाप्यौः वस्तुतस्तु सामान्यादित्रये समवायेन सा
मान्यांगीकारे प्रमाणाभावस्तत्र सामान्यादावनुगतव्यवहारस्य तत्तदुपाधिरेवोपपा
दनायत्वात् न चैवं सति द्रव्यादित्रयेपि सामान्यानंगीकारापत्तिः तत्रापि तत्तदुपाधि
नैवानुगतव्यवहारोपपत्तेरिति वाच्यं तत्र कार्यकारणभावबलादेव सामान्यसिद्धेरा
वश्यकत्वादिति नित्यत्वमत्र ध्वंसाप्रतियोगित्वविशिष्टभावत्वं तेयमापियपेतदवि
निसङ्ख्यगुणयोरतिव्याप्तेः तथापि ध्वंसप्रतियोगपदंत्तिसास्तामभावविभाजकोपाधि राम
मत्वंतत्वमिति सस्याविषसत्त्वीयत्वानानत्र एतेषु ध्वंसाप्रतियोगित्वे किं प्रमाणमिति ३१

चेल्लाघवतर्कसहकृतानुमानमेवात्रावेहि।तल्लाघवंचतेषांध्वंसाकल्पनेस्फुटमेव।
श्राचार्य्यास्तु।सामान्याद्दित्रपाणांध्वंसकल्पने अनित्यभावत्वस्यकार्य्यत्वव्याप्यत्वभं
गप्रसंगादित्याहुः।तन्नाहृशब्दास्यनंगाकारे।शिथिलतरंमंतव्यम्।अर्थशब्दानभिधेय
त्ववैशेषिकसंकेतसंबंधावच्छिन्नप्रतियोगिताकार्थशब्दाभाववत्वविशिष्टभावत्वं
नानो।भावसाधारणपायच्छिः।कारणानपेक्षत्वस्यकारणकभिन्नत्वाव्याप्यत्वेततानित्यद्रव्या
दिसाधारणतयापिसकारणकाद्वृत्तिभावविभाजकोपाधिमत्वंतत्वमित्यस्यविवक्षि
तत्वात्तविशेषभिन्नानांपचानामनित्यसमवेतत्वसाधर्म्यमायथापादृनित्यद्रव्येत्र
सप्रसक्तयापि अनित्यसमवेतवृत्तिभावविभाजकोपाधिमत्वमित्यस्यविवक्षितत्वात्।
द्रव्यादीनांचतुर्णामयोगिप्रसक्तत्वसाधर्म्यमायंथापीरमापिविशेषाद्यावत्तिव्या
प्तेतेषामपि अयोगिनामुपनीतभानात्मकप्रसक्तविषयत्वात्तथापिलौकिकप्र

सा॰सं॰ त्यस्तुविषयवृत्तिभावविभाजकोपाधिमत्त्वंतत्त्वमित्यस्याविवक्षितत्वातनातोतोद्वि
३१ यद्व्यादावव्याप्तिरिति ध्येयं। गुणकर्मणोः समवायिकारणत्वंसाधर्म्यम। असमवा
यिकारणत्वंतुसमवायपदघटितसामानाधिकरण्यप्रत्यासत्याकारणत्वमापद्यप
३४ ह्नसकलगुणसाधारणतयापितादृशकारणवृत्तिभावविभाजकोपाधिमत्त्वंतत्त्वमि
त्यस्यविवक्षणीयत्वात्नित्यद्रव्यसमवायियोः समवेतत्वंसाधर्म्यम्। असमवेतत्वंतुस्व
विभिन्नसमवायसंबंधेनावृत्तित्वंबोध्यमसामानतःसमवायस्यस्वात्मकसंबंधेनवृत्तिम
त्त्वेपिस्वानिरूपितत्वादिवस्तुतरमहनापमाद्व्यतदितरसाधारणसाधर्म्याभिधानात्ननुपृ
थिव्यादीनांनवद्रव्याणांसाधर्म्यवैधर्म्ये वाभिधीयतेतेनपृथिव्यादीनांनव
द्रव्याणांद्रव्यत्वंसाधर्म्यंवैधर्म्यमपिनतुसमवायेनकतमपाद्रव्यत्वसमवायस्यग एम
तोविविद्यमानतयाकथंपृथिव्यादीनांनवानांतद्वैधर्म्यमितिचेदत्रावहिाद्रव्यत्व ३१

समवायस्य गुणे सत्त्वेपि समवायसंबंधावच्छिन्नद्रव्यत्वाधिकरणतायास्तत्रानंगीका
रस्तत्र द्रव्यत्वप्रतीत्यभावात्। तथा च समवायसंबंधावच्छिन्नाधिकरणतासंबंधेन द्र
व्यत्वस्य पृथिव्यादीनां नवानां वैधर्म्यमिति सुपपदमेव। वैधर्म्यशेषार्थः प्रकृते। इतरभेदा
नुमापको द्रव्यं न न्यूनद्रव्यत्वस्य जातित्वे सत्ता द्रव्यमुपपद्यत एव नास्ति प्रमाणाभावादिति
चेत्। अत्राचोच्यते। जन्यसत्त्वावच्छिन्नसमवायिकारणतावच्छेदकतया द्रव्यत्वस्य जाति
त्वसिद्धेः। न च गुणत्वमेव तदस्तु किं द्रव्यत्वजात्येति वाच्यम्। जातेः कारणतावच्छे
दकत्वे संभवति उपाधेः कारणतावच्छेदकत्वकल्पनायां अन्याय्यत्वात्। तादृशका
र्यकारणभावस्तु आवश्यकः। अन्यथा घटादेः अपसमवेतत्वसंबंधेन कपालनालादौ तन्त्र
लादिसत्त्वे समवायेन तत्र नीलाद्यापत्तेः। द्रव्यत्वादिसाधकं बहुतरमनुसंधेयमिति। ए
वं पृथिव्यादीनां नवानां स्वात्मसमवायिकारणत्वगुणवत्त्वे कार्याकारणाविरोधित्वसविशे

सामं
२२

षवत्त्वानि साधर्म्याणि वैधर्म्याणि च स्वात्मन्यारंभकत्वं स्वघटत्वं कार्य्यकारणाविरोधि
त्वंसाविशेषवत्त्वानि साधर्म्याणि वैधर्म्याणि समवेतकार्य्यारंभकत्वं समवायिकारणत्व
मिति यावत् गुणवत्त्वं समवायेन गुणवत्त्वं । अनेनैकार्थसमवायसंबंधेन जात्यादेर्गुणा
33 दे च गुणसत्त्वेपि क्षतिः । अत्र समवायिकारणत्वं गुणासमवायवत्त्वं च द्रव्यत्वानुमाप
कं द्रव्यत्वं तु द्रव्यपदप्रवृत्तिनिमित्तं द्रव्यपदशक्यतावच्छेदकापरपर्य्यायजातित्वेन लघु
त्वादित्यवधेयम् । कार्य्यकारणाविरोधित्वं कार्य्यकारणान्यतरानाश्यत्वम् । मथास्व
जन्यशेद्धनाश्यशद्धः । यथा वा उपांत्यशद्धरूपकारणनाश्यो ऽसशद्धः न तथा । किमपि द्र
व्यं न कार्य्यकारणान्यतरनाश्यमिति । नत्र द्रव्यस्यैव साधर्म्यत्वोक्तेः । नन्विदमशुद्ध
घटादिद्रव्यनाशस्य घटादिजनकादृष्टजन्यत्वात् । शरीरनाशस्य शरीरजन्यादृष्ट राम
प्रयत्नादिजन्यत्वादिति चेन्न । कार्य्यकारणान्यतरपदेनात्र स्वानिमित्तकारणकत्व २२

कार्यत्वं वा निमित्तकारणातिरिक्तकारणान्यत्वस्याविवक्षितत्वात्। न च तथापि नित्य
गुणादावतिव्याप्तिः नैतत् संगच्छत इति वाच्यम्। तथाविधान्यत्वेनाश्रयाहत्तिसत्तासाक्षा
द्व्याप्यजातिमत्त्वस्य विवक्षितत्वेनानुपपत्त्यभावात्। अत्र संविशेषवत्त्वमत्र संत्तकविशेष
वत्त्वं। न चैवं जन्यद्रव्येष्वव्याप्तिः विशेषस्य नित्यद्रव्यमात्रवृत्तित्वादिति वाच्यम्। अत्र सत्तकवि
शेषवद्वृत्तिसत्त्वेन जातिमत्त्वस्य तदर्थत्वात्। अवयविद्रव्याभिन्नानां द्रव्याणामनाश्रित
त्वे नित्यत्वे साधर्म्ये वैधर्म्ये च। अनाश्रितत्वमत्र असमवेतत्वं सा तिसमवायसंबन्धावच्छि
न्नाधिकरणताऽवत्त्वम्। नातोऽभावादावतिव्याप्तिः। नित्यत्वमत्र ध्वंसाप्रतियोगित्वविशि
ष्टद्रव्यत्वम्। अतो न नित्यगुणादावतिव्याप्तिः। निरवयवद्रव्याभिन्नानां द्रव्याणां विशेषाभाव
वद्द्रव्यत्वानित्यद्रव्यत्वे साधर्म्ये वैधर्म्ये च। इत्येषा पृथिव्युदकज्वलनपवनात्ममनसामनेक
त्वापरजातिमत्त्वसंस्कारवत्त्वानि साधर्म्याणि वैधर्म्याणि च। अत्रानेकत्ववत्त्वसंख्याव

ता॰स॰ ३४ 34

त्वम् । अयं च परिमाणाकाशादावतिव्यापकं तत्रापि घटपटादिकमादाय बहुत्वसंख्यापर्याप्तत्वा
त् । तथापि स्वसमानाधिकरणोह्यविभाजकोपाधिमत्त्वमाह त्रिबहुत्वसंख्यावत्त्वं ताहृव
णीयम् । अतो नानुपपत्तिः । स्वपदमत्र बहुत्वपरं । अपरजातिमत्त्वमपरसत्ताकजातिमत्त्व
म् । अयं च परादद्रव्यत्वापरजातिमत्त्वादाकाशादिसाधारणं तथापि द्रव्यतिष्ठान्योन्याभा
वप्रतियोगितावच्छेदकस्य हृत्तिजातिमत्त्वं तदिति विवक्षणीयम् । अतो नानुपपत्तिरि
ति क्षिति जलज्योतिरनिलमनसां क्रियावत्त्वं मूर्त्तत्वं परत्वापरत्ववेगवत्त्वानि साधर्म्या
णीति धार्य्याणि । चात्र क्रियावत्त्वं समवायेन कर्म्मपदार्थवत्त्वम् । मूर्त्तत्वमवच्छिन्नप
रिमाणवत्त्वम् । अवच्छिन्नत्वं चापकर्षाश्रयत्वम् । वेगवत्त्वं वेगाख्यसंस्कारवत्त्वम् । अ
तो नानिरंतरगतिसंतानो वेग इति मतं कर्म्मवत्त्वेन सह पौनरुक्त्यापत्तिरिति चात्रानिर्वा
विनष्टक्रियादावव्याप्तेर्वेगवद्वृत्तिद्रव्यनिष्ठान्योन्याभावप्रतियोगितावच्छेदकजा ता॰म॰ ३४

त्रिमत्त्वस्य तदर्थत्वात्। आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमा
नदेशत्वं निष्क्रियत्वं परत्वापरत्वाभावेन गवत्वाभिसाधर्म्यं। त्रि वैधर्म्यमात्ति चात्र त्रसर्वगत
त्वं सर्वमूर्त्तसंयोगित्वं तत्र इपि मूर्त्तत्वव्यापकतावच्छेदकत्वं संयोगित्वावच्छिन्नकत्वम्। अतो
न सर्वमूर्त्तप्रतियोगिकसंयोगाप्रसिद्ध्यासंभवः। परममहत्त्वमपकर्षानाश्रयमहत्त्वम्। न
तु हस्तवितस्तित्वादेः परिमाणत्वव्याप्यतया आकाशादौ हस्तत्वाद्यभावेन परिमाणमेव नास्ति
स्ति तन्मपकर्षानाश्रयपरिमाणसत्त्वमिति वाच्यम्। हस्तत्ववितस्तित्वाद्यभावेपि यथा परमा
णोरुत्कर्षानाश्रयपरिमाणसत्त्वात् परिमाणसत्त्वं तथा गगनादावपि अपकर्षानाश्रयप
त्वसत्त्वेन परिमाणसत्त्वे बाधकाभावात् द्व्यणुकत्वस्य परिमाणव्याप्यत्वं पुरस्कृत्य स्यादिति सर्व
संयोगिसमानदेशत्वं संयोगेन सर्वमूर्त्तवत्त्वम्। अतो न सर्वगतत्वेन सहैक्यं न हत्त्वमनि
ष्क्रियत्वं क्रियावद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वम्। अतो नाभावादावतिव्याप्तिः। अपरत्वा

सासं परत्वेपरत्ववदूरत्वत्रिद्रव्यविभाजकोपाधिमत्त्वापरत्ववदूरत्वत्रिद्रव्यविभाजकोपाधिमत्त्वे
३५ तानवच्छेअतीतविनष्टतत्तद्भूतपरापिव्यादावतिव्याप्तिः। अवेगवत्त्ववेगवद्दूरत्वत्रिद्रव्यवि
भाजकोपाधिमत्त्वं। अतीताननिर्वेगीविनष्टपृथिव्यादावतिव्याप्तिरिति। पृथिव्यप्तेजो
वाय्वाकाशान्ताभूतत्वेन्द्रियप्रकृतित्वबाह्यैकेन्द्रियग्राह्यविशेषगुणवत्त्वानिसाध
र्म्याणिवैधर्म्याणि च। भूतत्वमात्मभिन्नविशेषगुणवत्त्वं न तु जातिविशेषः तुल्ययुना
र्तत्वस्यापि जातित्वेन तद्वाहापभूतत्वस्यसंकर्याप्रत्वात्। तथाहि। भूतत्वं विहायमूर्त
त्वं मनसि मूर्तत्वं विहाय भूतत्वमाकाशे तयोः सामानाधिकरण्यं पृथिव्यादिचतुष्क
टयकल्प्यमानतया च विनिगमनाविरहात् भूतत्वमूर्त्तत्वोभयमेव न जातिरूपंपरस्याचापेपाः
तन्त्रविचारसहं भूतत्वजातौ प्रत्यक्षाभावेपि मूर्त्तत्वजातौ पुंक्तिसद्भावेन तस्य जातित्वा राम
वश्यकत्वात्। तथाहि स्पंदसमवायिकारणतावच्छेदकत्वेन मूर्त्तत्वजातिरावश्यकी। अ ३५

न्यथा अवच्छिन्नपरिमाणवत्त्वेन तत्कल्पने कारणतावच्छेदकगौरवप्रसंगात् तान्न च द्रव्य
त्वेनैव तद्दस्तु इति वाच्यम् । मनस्त्वचक्षुष्ट्वापेक्षया तस्य व्यापकधर्मत्वेन तेन रूपेण तत्र हेतु
त्वस्य अन्यथासिद्धापराहतत्वादित्याशंकं वकुं तत्समकूनायमिति । इंद्रियकृतित्वमिंद्रि
यसमवायीकारणत्वम् । न च श्रोत्रेंद्रियस्य कर्णशष्कुल्यवच्छिन्ननभोरूपस्य तत्समवायीका
रणाभावेन आकाशेंद्रियसमवायिकारणत्वानुपपत्तिरिति वाच्यम् विशेष्यातिरिक्तेस्व
मते आकाशस्यानित्यत्वोपपत्त्या विधविशिष्टाकाशस्यानित्यत्वेन तथाविधविशिष्टाका
शरूपश्रोत्रेंद्रियं प्रति नभसः समवायीकारणत्वसंभवेनानुपपत्त्यभावात् । अथवा इंद्रिय
प्रकृतित्वमित्यस्य बाह्येंद्रियस्वरूपत्वमित्यर्थः । न चैवं सति घटादावव्याप्तिः । बाह्येंद्रि
यग्राह्यत्वविभाजकोपाधिमत्त्वस्य तदर्थत्वेनानुपपत्त्यभावात् । इंद्रियसमवायि
कारणत्वस्य तदर्थत्वेपि घटादावव्याप्तिवारणाय इंद्रियसमवायिकारणग्राह्यत्वद्व

सा.स.
३६
38

विभाजकोपाधिमत्त्वरूपतदर्थाविवक्षापात्रेऽवश्यपवत्त्वादिति वाह्यैकैकेन्द्रियग्राह्याव
शेषगुणत्वमितस्य वाह्यैकैकेन्द्रियग्राह्यगुणत्वं वाह्येन्द्रियग्राह्यविशेषगुणत्व
त्वं वार्थः। अतो नेन साधर्म्यहेतुमवगंतव्यमा। बाह्यैकैकेन्द्रियग्राह्यगुणत्वम्
बाह्योभयेन्द्रियाग्राह्यबाह्येन्द्रियग्राह्यगुणत्वं न चैवं ससंभवः। चद्वापरूपादे
र्नानापुरुषीयबाह्येन्द्रियग्राह्यत्वेनापावास्योभयेन्द्रियाग्राह्यत्वाभावसत्त्वेन तत्रते
व्याविप्याविशिष्टस्य सत्वादिति वाच्यं। वाह्योभयेन्द्रियग्राह्यवाह्येन्द्रियग्राह्यत्वेन
स्वाजातीयवाहिरिन्द्रियाग्राह्यबहिरिन्द्रियग्राह्यत्वस्याविवक्षितत्वात्। न चैवमप्ययपर
माणवाद्यावव्याप्तिः। तद्गुणस्यातीन्द्रियत्वात् बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्व
स्य बहिरिन्द्रियग्राह्यत्वस्य तत्राभावादिति वाच्यम्। तथा च बहिरिन्द्रियग्राह्यगुणत्व राम
व्याप्यजातिमद्गुणत्वस्य तदर्थत्वेनानुपपत्त्यभावात्। बाह्येन्द्रियग्राह्यविशेषगुणप ३६

त्वस्याश्रयसमं नाधिकरणद्रव्यविभाजकोपाध्यवच्छिन्नेतरभेदव्याप्यतावच्छेदकजा
तिमद्वायव्यन्यद्रव्यगुणवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वम्। अतो न विशेषणत्वस्य दुर्वचत
यानुपपत्तिः। पृथिव्यप्तेजोवायवन्यद्रव्यारंभकत्वस्पर्शवत्त्वजन्याणुत्वजन्यमहत्त्वस्थि
तिस्थापकात्ययसंस्कारवत्त्वशरीरारम्भकत्वानि साधर्म्याणि वैधर्म्याणि च। द्रव्यार
म्भकत्वं द्रव्यसमवायिकारणत्वं तद्वति द्रव्यसमवायिकारणवद्वृत्तिद्रव्यविभाजकोपा
धिमत्त्वम्। अतो न घटादावव्याप्तिः। स्पर्शवत्त्वं समवायेन स्पर्शवत्त्वम्। अतो नै
कार्थसमवायमादाय गुणादावतिव्याप्तिः। जन्याणुत्वं जन्याणुत्ववद्वृत्तिद्रव्यविभा
जकोपाधिमत्त्वम्। अतो न पार्थिवत्रसरेण्वादावव्याप्तिः। जन्यमहत्त्वमपि जन्यमहत्त्व
वद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वम्। न पार्थिवपरमाण्वादावव्याप्तिः। स्थितिस्थाप
कात्ययसंस्कारवत्त्वं स्थितिस्थापकात्ययसंस्कारवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वमतो

सा सं
३१
37

नान्तत्वन्नास्थितिस्थापकान्यसंस्कारवद्वृत्ति न पार्थिवादावव्याप्तिः। शरीरं भवतु त्वं
शरीरसमवायिकारणवृत्ति द्रव्यविभाजकोपाधिमत्त्वम्। अतो न घटादावव्याप्ति
रिति पृथिव्यप्तेजसां सत्त्वं रूपवत्त्वद्रवत्वानि साधर्म्याणि वैधर्म्याणि च प्रसक्ते
त्वम्बाह्येन्द्रियग्राह्यवृत्ति द्रव्यविभाजकोपाधिमत्त्वम्।। अतो न पार्थिवपरमाणवा
दावव्याप्तिः। रूपवत्त्वं समवायेन रूपवत्त्वम्। अतो न कालिकादिसंबंधमादाय पवनात्मा
दावतिव्याप्तिः। द्रवत्वं समवायेन द्रवत्ववद्वृत्ति द्रव्यत्वव्याप्यजातिमत्त्वम्। अतो न प
टादावव्याप्तिः। पृथिव्युदकयोर्गुरुत्वन्तत्कार्यपतनं रसवत्त्वालोकप्रकाशरूपत्वाभाव
ररूपवत्त्वानि साधर्म्याणि वैधर्म्याणि च गुरुत्वं समवायेन गुरुत्ववत्त्वम्। अतो न कालि
कादिसंबंधमादाय पतनानुपपत्तिः। पतनं पतनसमानाधिकरणद्रव्यत्वव्याप्यजातिम एम
त्वम्। अतो नानाजातपतने घटादावव्याप्तिः। रसवत्त्वं समवायेन मधुराद्यन्यतमवत्त्व ३१

म॥ आलोकप्रकाशपत्वम्। आलोकजन्यप्रसक्तविषयत्वे सति तेजोभिन्नं प्रत्यक्षवृत्तिद्र
व्यत्वव्याप्यजातिमत्त्वम्। अतो न पार्थिवपरमाणवादावव्याप्तिः। न वा तेजसि अति
व्याप्तिः। अभास्वररूपवत्त्वं भास्वररूपभिन्नरूपवत्त्वम्॥ भास्वरत्वं च तेजोरूपमात्रवृ
त्तिजातिविशेषः। एवं विप्यादीनां पञ्चानाम् आत्मनां च वैशेषिकगुणवत्त्वं प्रसक्त
गुणवत्त्वे साधर्म्यं वैधर्म्यं च। वैशेषिकगुणवत्त्वं वा अप्रसमानाधिकरणद्रव्यवि
भाजकोपाध्यवच्छिन्नेतरभेदव्याप्यतावच्छेदकजातिमद्गुणवत्त्वम्। आत्मपदमितरभे
दव्याप्यतावच्छेदकत्वेनाभिमतजातिपरम्। भेदव्याप्यतावच्छेदकजातिमद्गुणवत्त्वम्। आ
त्मपदमितरभेदव्याप्यतावच्छेदकत्वेनाभिमतजातिपरम्। प्रसक्तगुणवत्त्वं प्रस
क्तगुणवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वं नातः परमाणवादावव्याप्तिः। क्षित्युदका
त्मनां चतुर्दशगुणवत्त्वं साधर्म्यं वैधर्म्यं वा। चतुर्दशगुणवत्त्वं स्वाधिकरणवृत्तिचतु

सा॰सं॰
३८
38

ईशगुणाविभाजकोपाधिकचतुर्दशत्वपर्य्याप्त्यधिकरणगुणावृत्तिद्रव्यविभाजको
पाधिमत्त्वं स्वपदं चतुर्दशत्वपदं। अतो नात्मादिषु त्रिषु एकजातीयचतुर्दशगु
णाभाववत्त्वेपि अनुपपत्तिः। न वा घटादौ द्रव्यत्वाभावेन चतुर्दशगुणाभावेप्यव्याप्ति
ः नन्वात्मेश्वरात्मनि अव्याप्तिः। आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम्।
साधर्म्यं वैधर्म्यं च क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वेन क्षणिकगुणवत्त्वमेव दे
शवृत्तिविशेषगुणवत्त्वं विवक्षणीयम्। अतः साधर्म्यद्वयमत्र बोध्यम्॥ क्षणिकगुण
वत्त्वं चतुर्थक्षणोत्पन्नध्वंसप्रतियोगिवृत्तिजातिमद्गुणावृत्तिद्रव्यविभाजकोपाधिम
त्त्वम्। अतो नश्योसन्नित्वतापत्तणाविनष्टरूपादिकमादाय घटादावतिव्याप्तिः नवा
तत्त्वाविषयगुणास्य सर्वत्रात्मन्यसत्त्वेपि क्षतिः। एकदेशवृत्तिविशेषगुणवत्त्वं चाश्र राम
यसमानाधिकरणद्रव्यविभाजकोपाध्यवच्छिन्नतरभेदसामान्यतावच्छेदकजाति ३८

मद्व्याप्यवृत्तिगुणावृत्तिद्रव्यविभाजकोपाधिमत्त्वम् । स्वपदमिताभेदव्याप्यताव
च्छेदकत्वेनाभिमतजातिपरम् । अतो नैकत्वाणुत्वमव्याप्तिः । अव्याप्यवृत्तित्वं च देशानिय
तविलक्षणावच्छेदकतानिरूपकत्वम् । अतो न कालिकाव्याप्यवृत्तिरूपादिकमादाय
दोषः अव्याप्यवृत्तिव्याप्तिरिति दिक् । स्वरूपोः पंचगुणवत्त्वसर्वोत्पत्तिमन्मात्रनिमित्तकारणत्वे
साधर्म्ये वैधर्म्यं च सर्वोऽपि विभागान्तःपंचगुणमात्रवृत्तिद्रव्यविभाजकोपाधिम
त्त्वं पंचगुणवत्त्वम् । नातः एकसंयोगादिमत्यव्याप्तिः । सर्वोत्पत्तिमन्मात्रनिमित्तका
रणत्वं कार्यसामान्यनिमित्तकारणवृत्तिद्रव्यविभाजकोपाधिमत्त्वम् । नात ईश्वरादा
नातोऽतिव्याप्तिः । कार्यसामान्यपदेनात्र दिक्कालसमवेतत्वे हृष्टपर्यन्तो हि संयोगवि
भागादिः । किं कार्यसामान्यविवक्षणीयमतो न प्रतिनयतः समवायिकारणत्वादि

सा॰सं॰
३८
३९

साचार्थः तन्नमनोरसमवायिकारणस्यनिमित्तकारणत्वेबाधकाभावात्।न
हिसमवाय्यसमवायिकारणभिन्नकारणत्वंनिमित्तकारणत्वंगौरवात्।अपितुका
रणत्वान्यवत्तनिमित्तकारणत्वंस्वरूपसंबंधविशेषः।समन्यत्रविस्तरः।एवंदिक्काल
योः परत्वापरत्वासमवायिकारणत्वंबुद्धिमत्त्वमपिसाधर्म्यंमा।दैशिकपरत्वापरत्वेष
निदिक्पिंडसंयोगस्यकालिकपरत्वापरत्वेप्रतिकालपिंडसंयोगस्यासमवायिका
रणत्वेनतत्तत्पाविवासमवायिकारणत्वसम्भवात्।इतितादृशासमवायिका
रणत्वंचापरत्वापरत्वाधिकारणावृत्तित्वविशिष्टसमवायसंबंधेनबोध्यं।तेनावि
ऽनातिप्रसक्तिरिति।तैजससोनैमित्तिकद्रवत्ववत्त्वंसाधर्म्यंवैधर्म्यंचापार्थिवघ राम
तारंभकपरमाणवावृत्तेतेजसिसुवर्णारंभकपरमाणवादौच।अग्निसंयोगा ३८

त्मकनिमित्तकोनद्रवत्वोसादाहितैनैमित्तिकद्रवत्ववत्त्वमग्निसंयोगजद्रवत्ववद्वृ
त्तिद्रव्यविभाजकोपाधिमत्त्वम्। अत्रैतेन घटादौ सौ तेजःप्रभृतिषु चाव्याप्तिरिति। एवं
जीवात्मभिन्नानां सर्वेषां द्रव्याणां भोगमात्रासमवायिद्रव्यत्वाचेतनत्वसाधर्म्यं वै
धर्म्यं च ज्ञेयं। भोगापदेन सुखदुःखसाक्षात्कारो बोध्यः। अचेतनत्वपदेन जन्यज्ञानव
द्भिन्नद्रव्यत्वं बोध्यम्। मनोभिन्नानां सर्वेषां द्रव्याणामन्तःकरणेन्द्रियभिन्नद्रव्यत्वा
एवंद्रियभिन्नद्रव्यत्वसाधर्म्यं वैधर्म्यं च ज्ञेयं। अन्तःकरणेन्द्रियं मनः। अत्रैवंद्रियम
णुत्वपरिमाणविशिष्टेन्द्रियं बोध्यम्। जलभिन्नानां सर्वेषां द्रव्याणां स्नेहाभाववद्द्रव्य
त्वसांसिद्धिकद्रवत्वाभाववद्द्रव्यत्वसाधर्म्यं वैधर्म्यं च ज्ञेयं। तेजोभिन्नानां सर्वेषां
द्रव्याणामश्वेन्धनद्रव्यत्वदाहकद्रव्यत्वसाधर्म्यं वैधर्म्यं च ज्ञेयं। अत्र अनुष्णोद्रव्य
त्वमनुष्णस्पर्शाभावविशिष्टद्रव्यत्वमदाहकद्रव्यत्वं स्वसंयोगसंबन्धावच्छिन्नरूपाहिन

सा.स.
४०
40

शजनकत्वाभाववविशिष्ट इत्यत्वं जलज्योतिरनिलानामपाकजस्पर्शवत्त्वं साधर्म्यं
वैधर्म्यं च। अपाकजस्पर्शवत्त्वं पाकजस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिशून्यत्वे सति स्प
र्शवत्त्वं बोध्यम्। अतो न घटादावतिव्याप्तिः। जलज्योतिषोरपाकजरूपवत्त्वं साधर्म्यं
वैधर्म्यं च बोध्यम्। अपाकजरूपवत्त्वमग्निसंयोगजन्यरूपवद्वृत्तिद्रव्यत्वव्याप्यजाति
शून्यत्वे सति रूपवत्त्वं बोध्यम्। अतो न घटादावतिव्याप्तिः। दिक्कालमनसां विशेषगु
णाभाववद्द्रव्यत्वं साधर्म्यं वैधर्म्यं च तत्पदं विशेषगुणाभाववद्द्रव्यत्वस्य समानाधि
करणद्रव्यविभाजकोपाध्यवच्छिन्नतामेरुव्याप्यायेणात्तद्भाववद्द्रव्यत्वं बोध्यम्।
वाय्वाकाशदिक्कालमनसामनाद्दिपत्वं साधर्म्यं वैधर्म्यं च। अनाद्दिपत्वं लौकिकप्र
त्यक्षविषयावृत्तिद्रव्यविभाजकोपाधिमत्त्वम्। अतो न पार्थिवपरमाण्वादावतिव्या
प्तिः। आत्ममनसोः शरीरावच्छिन्नज्ञानजनकत्वं साधर्म्यं वैधर्म्यं च। वाय्वादीनाम

राम
४०

रूपवत्त्वं तथा । अरूपवत्त्वं रूपवद्भिन्नद्रव्यत्वम् । अतो न गगनादावतिव्याप्तिः । आकाशादी
नामस्पर्शवत्त्वं साधर्म्यं वैधर्म्यं चास्पर्शवत्त्वं स्पर्शवद्भिन्नद्रव्यत्वं कालादीनाम
मूर्तत्वं साधर्म्यं वैधर्म्यं च । अमूर्तत्वं मूर्तभिन्नद्रव्यत्वम् । अतो न गगनादावतिव्याप्ति
रिति पदार्थधर्मावच्छिन्नस्य यत्साधर्म्यं तद्धर्मावच्छिन्नेतरभेदसमव्याप्तं तद्धर्मावच्छिन्न
स्य वैधर्म्यम् । यथा जलपृथिव्यन्यतरत्वावच्छिन्नसाधर्म्यं मांसवत्त्वं गुरुत्ववत्त्वं च त
थाविधान्यतरत्वावच्छिन्नेतरभेदसमव्याप्यत्वात् तदन्यतरत्वावच्छिन्नवैधर्म्यम् । एवं
पदार्थधर्मावच्छिन्नवैधर्म्यं यत्तद्धर्मसमव्याप्यत्वात् तद्धर्मावच्छिन्नसाधर्म्यमपि यथा
पृथिवीवैधर्म्यमगन्धवत्त्वं पृथिवीतरसमव्याप्यत्वात् पृथिवीत्वावच्छिन्नसाधर्म्य
मिति । रासासर्वत्वं साधर्म्यं वैधर्म्यं च सत्त्वमतिभिन्नभावत्वापमितारूपसाम
न्यस्य साधर्म्यं वैधर्म्यं चा ॥ क्रमानवद्व्याप्यणां प्रसेकं वैधर्म्याण्याह । अंते वैधर्म्य

सासं ४१ 41
चरत्नएमेदानुमापकापरपर्य्यायंलक्षणासेपमानत्रपृथिवीवैधर्म्यं पृथिवीत्वंपृ
थिव्यांपृथिवीत्वेनरतएप्रेदसाधनंसंभवात् । ननु पृथिवीत्वेनपृथिवीसामान्यवै
धर्म्यंसर्वपृथिवीषुपृथिवीत्वस्यैकस्याभावात् । नचतत्रपृथिवीत्वंजातिरेव
मानाभावात् । नचपृथिवीपृथिवीत्यनुगतप्रत्यक्षबलात् पृथिवीत्वजातिसिद्धिरि
तिवाच्यम् । अप्रतीतिद्विमपृथिव्यांतादृशप्रसत्ताभावेनतत्साधारणपृथिवीत्वजा
तिसिद्धिप्रसंगात्कार्य्यतावच्छेदकत्वकारणतावच्छेदकत्वान्यतरस्यैवजातिसा
धकत्वेनकेवलानुगतपृथिवीपृथिवीतिप्रतीतिबलात्जातिसिद्धेश्च । अन्यथा
चैत्रश्चैत्रइत्यनुगतप्रतीतिबलात्सर्वचैत्रसाधारणैकचैत्रत्वजातिसिद्धिप्रसं
गात् । अप्ययगधत्वावच्छिन्नप्रतिपृथिवीत्वेनसमवायिकारणतयातदवच्छेदक राम
त्वात्पृथिवीत्वजातिसिद्धिरिति । नचैतादृशकार्य्यकारणभावेमानाभावःभाव ४१

कार्यस्यसमवायिकारणजन्यत्वानियमस्तु जन्यसत्त्वावच्छिन्नंप्रतिद्रव्यत्वेनावश्यकत्वम्
या:समवायिकारणतापानिर्वाहरसतिवाचम् गंधत्वावच्छिन्नंप्रतिपृथिवीत्वेना
हेतुत्वेनजलस्यापिगंधोत्पत्तिप्रसंगान्नतेजसिगंधोत्पादकविजातीयतेज:संयोग
सत्त्वात् । संयोगस्य द्विष्ठत्वात् ॥ तेजस्त्वेनतत्प्रतिबंधकत्वकल्पनेतुकिमपराद्धम्
एक्षपात्वेनतत्र हेतुतयाप्रतिबंधकाभावहेतुत्वकल्पनापेक्षयालाघवादितस्यै
वोचितत्वादितिचेन्नयतनस्तत्रव्यक्तिसमवेतत्वावच्छिन्नंप्रतितत्तद्व्यक्तित्वेनविशि
ष्यपृथिव्यादिरूपसमवायिकारणतासमवायिकारणतावश्यंकल्पनीयाअन्यथा
एकपृथिवीसमवेतरूपादेरन्यत्रोत्पादप्रसंगात्तथाचयावद्विशेषकारणबाधादे
वतेजसिगंधोत्पत्तिस्यापत्तिवारणासमवेकिंगंधत्वावच्छिन्नंप्रतिपृथिवीत्वेनहेतुता

येतानचयद्विशेषयोः कार्य्यकारणभावः बाधकं विना तत्सामान्ययोरपीति नियमब
सासं लात्तादृशकार्य्यकारणभावश्चावश्यक इति वाच्यम् तादृशनियमे मानाभावात्तान्त
४२ र्याचनोपदर्शितयुक्त्या पृथिवीत्वजातिसिद्धिः अत एव जलादौ पृथिव्याद्युत्पत्तिवा
रणाय जन्यपृथिवीत्वावच्छिन्नं प्रति पृथिवीत्वेन हेतुतापश्चावश्यकी पात्ते जन्यपृ
42 थिवीजनकतावच्छेदकत्वेन पृथिवीत्वजातिसिद्धिः न च तादृशजातेर्घटादिसाध
रणयमानाभावः घटादेः पृथिव्यनात्मकत्वादिति वाच्यम् तादृशजातेर्घटादिसाधा
रण्यानभ्युपगमे जन्यपृथिवीमात्रवृत्तिजातिविशेषमपृथिवीजन्यतावच्छेदकको
टिप्रविष्टतयासिद्धमादायकारणतावच्छेदकतयासिद्धस्य पृथिवीत्वस्य सांकर्य्यापा एम
तात्तथा हि कार्य्यतावच्छेदकीभूतजन्यपृथिवीमात्रवृत्तिजातिविशेषाभावव ४२

निपार्थिवपरमाणौ कारणतावच्छेदकीभूतपृथिवीत्वमस्त्यन्यथा परमाणुतः पार्थि
वद्यणुकानुत्पत्तिप्रसंगात् कारणतावच्छेदकीभूतपृथिवीत्वाभाववति घटादौ हि ज
न्यपृथिवीमात्रवृत्तिजातित्वमन्यथा कपालादितो घटादावुत्पत्तिप्रसंगात् तयोः समाना
धिकरणत्वं च कपालादावितिसांकर्यापत्तिः अतः सा जातिरेव घटत्वं घटादौ तेनावयविन
पि स्वीकर्तव्या अतएव पदर्शितात्तासर्वपृथिवीसाधारणपृथिवीत्वजातिरस्त्येवे
त्यपि परास्तमडपदर्शितविशेषकार्यकारणभावबलादेव जलादौ प्राप्यव्यापि
कारणासंभवे जन्यपृथिवीप्रतिपृथिवीत्वेन हेतुताकल्पनस्यानिर्युक्तिकत्वादिति चे
न्नैवमात्र पृथिवीरूपादिनाशकतावच्छेदककारणाव्यघटनया पृथिवीत्वजातिसिद्धे
न पार्थिवविशेषगुणनाशविशेषसंबन्धेन रूपादिनाशं प्रति तेजःसंयोगस्य समवायेन
हेतुत्वे तेजस्यापि पृथिवीरूपनाशापत्तिः संयोगस्य हि घटतया तेजस्यापि तत्संयोगस्य

स्वात्तदन्वेत द्रोषवारणाय्यतत्वे तेजोभिन्नत्वविशिष्टतेजःसंयोगत्वेनैव हेतुत्वं कल्प्य
नीयमिति वाच्यमानं यां सति तेजोभिन्नत्वसंयोगत्वयोर्विशेष्यविशेषणभावविनि
निगमनाविरहेण कार्य्यकारणभावद्वयकल्पनगौरवात् अवच्छेदकगौरवाच्चेति न त
द्रूपे तद्रूपापृथिवीवृत्तिविशेषणतासंबंधेन नाशं प्रति पृथिवीत्वेनातिरिक्तहेतुत्व
कल्पनापा आवश्यकत्वात् नाशकतावच्छेदकत्वेनैव पृथिवीत्वजातिसिद्धिरिति
परास्तं एतस्य मानवीनामस्तु तत्तद्व्यक्तिसमवेतत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन पृथि
वीनां हेतुत्वेपि पृथिवीसमवेतत्वावच्छिन्नं प्रति पृथिवीत्वेन हेतुत्वमावश्यकं
मास्त्वनुत्पन्नजलादौ पृथिवीसमवेतानुत्पादस्य प्रयोजकतास्तु तत्तद्व्यक्ति
त्वावच्छिन्नं प्रतियोगिताकभेदकूटकल्पनापत्तेः मरुद्वीरे वाप्यत्रेरूपदर्शनात्

त्सापृथिवीत्वेन हेतुत्वे तु पृथिवीत्वावच्छिन्नप्रतियोगिताकैकभेदस्यैव
तथाविधस्यापि जनकत्वकल्पने तेन लाघवान्न पृथिवीसमवेतत्वावच्छिन्नप्रतिपृथिवीत्वेन
पि हेतुत्वमावश्यकमिति पृथिवीसमवेतसमवायिकारणतावच्छेदकतयैव पृथिवीत्व
जातिसिद्धिरिति प्राहुः ननु पृथिवीत्वेन पृथिवीत्वावच्छिन्नेतरभेदः साधयितुं शक्यतां न तु पृ
थिवीत्वं पृथिवीत्वावच्छिन्नवैधर्म्यं तद्धर्म्मावच्छिन्नेतरभेदसाधनस्यैव तद्धर्म्मावच्छिन्न
वैधर्म्यपदार्थत्वादित्युक्तमनुपपन्नं साध्याप्रसिद्ध्या पृथिवीत्वेन पृथिवीत्वावच्छिन्ने
तरभेदसाधनासम्भवात् घटादौ प्रसक्तत एव पृथिवीत्वावच्छिन्नेतरभेदरूपसा
ध्याप्रसिद्धिसम्भवः खलु व्यतिरेकानुमानेन तत्र तत्साधनानुपपत्तिः अनुमितिं प्रति सिद्धेः
प्रतिबंधकत्वादिति चेन्न घटपटादौ प्रसक्तत्वतः पृथिवीत्वावच्छिन्नेतरभेदसिद्ध्या वा पृ
पृथिवीत्वावच्छेदेन पार्थिवपरमाणुप्रमितिरूपपृथिवीत्वेन पृथिवीत्वावच्छिन्नेतरभेद

सा० सं० साधनेनानुपपन्नमापन्नतावच्छेदकावच्छेदेनानुमितिं प्रतिपन्नतावच्छेदकसामानाधि
४४ करण्येन सिद्धविरोधित्वादिति पृथिवीत्वस्य पृथिवीलक्षणामित्युक्तं तत्र किंवच्छिन्ने
तरभेदसाधनत्वसंभवादुपपन्नं तत्र पृथिवी वैधर्म्यत्वमिति । ननु पृथिवीत्वं पृथिवील
45 क्षणमित्युक्तं तत्र किं नाम लक्षणत्वमिति चेदत्राव हि व्यतिरेकि लक्षणत्वं व्यतिरेकि
त्वं व्यतिरेकव्याप्त्या इतरभेदानुमापकत्वं तथा च साध्याभावव्यापकीभूताभावप्रति
योगित्वरूपव्यतिरेकव्याप्त्या तद्धर्मावच्छिन्ने इतरभेदानुमापकत्वमेव तद्धर्मावच्छिन्नल
क्षणत्वमिति निष्कर्षः । तदाहुराचार्याः । समानासमानजातीयव्यवच्छेदो लक्षणमिति ।
अत्र समानेन तद्धर्मावच्छिन्ने असमानजातीयस्य तद्धर्मावच्छिन्नेतरस्य व्यवच्छेदो व्यति
रेकव्याप्त्या भेदसाधनमस्मादिति बहुव्रीहिसमासात् व्यतिरेकव्याप्त्या तद्धर्मावच्छिन्ने त राम
रभेदसाधकत्वं तद्धर्मावच्छिन्नलक्षणत्वमित्यर्थ एव पर्यवसानमिति नानुपपत्तिः । ननु पृ ४४

दिघटादौ पृथिवीतरभेदासिद्धेस्तं पृथिव्यामितरभेदः साध्यते तदा घटमंतर्भाव्य पृथिवी
तरभेदे पृथिवीत्वपक्षान्वयसहचारज्ञानजन्यात् पृथिवीत्वपृथिवीतरभेदनिरूपितान्वयव्या
प्तिज्ञानादेव पृथिव्यां पृथिवीतरभेदानुमितिर्भविष्यतीति ऽपदर्शितलक्षणमसंभवग्रस्तम् । पृ
थिवीत्वादौ व्यतिरेकव्याप्त्या पृथिवीतरभेदानुमापकत्वाभावादिति चेन्न । यदा किंचित्स्मृति
बंधकसमवधानबलात्तन्नैयायिकान्वयव्याप्तिग्रहः । अपि तु ऽपदर्शितव्याप्तिग्रह एवा
दाव्यतिरेकव्याप्त्यैव पृथिवीत्वादौ पृथिवीतरभेदानुमापकत्वमिति सुपदर्शितलक्षणस्यादो
षत्वात् । तानदाहुराचार्याः । आस्तां तावदयमसहृदयप्रदेशः । केवलव्यतिरेकिलक्षणं तावदन्वय
टमिति । अत्र यत्तद्धर्मावच्छिन्नतद्धर्मावच्छिन्नेतरभेदानुमापकत्वस्यैव लक्षणत्वरूपत्वे कथं
क्रियावद्द्रव्यमित्यनेन क्रियावत्त्वेन द्रव्यलक्षणत्वाभिधानं मागात् । सिद्धान्ते द्रव्यत्वस्यावच्छिन्नक्रि
यावत्त्वेन द्रव्येतरभेदानुमानासंभवादिति चेत् । न हि क्रियावद्द्रव्यमित्यनेन द्रव्यलक्षणं क्रि

सासं
४५
45

पावकत्वमित्यभिहितम्। अपि तु इदमस्तीति धर्मः क्रियावत्त्वमित्यभिहितम्। न चैतत्कथं न निश्च-
योजनमिति वाच्यम्। इदमितरेभ्योऽभिधत्ते इदमत्वादित्यनुमाने वाधको दो क्रियावत्त्वेन इद-
मत्त्वसाधनदूषणाभागासिद्धिवारणस्यैव तत्प्रयोजनत्वादिति। अपि तु प्रमाणमितरभेदव्यव-
स्थापकं लक्षणं तु न प्रमाणम्। तथा सति तत्र प्रमाणाकांक्षायां तल्लक्षणस्यैव प्रमाणत्वे-
नोपन्यसनीयतया अनवस्थापत्तेः। तथा च लक्षणस्य तथाविधलक्षणासंभवग्रस्तामि-
ति तदसत् ज्ञायमानलिंगकरणतावादिमते लक्षणस्य प्रमाणत्वे बाधकाभावात्। न चै-
वमनवस्थेति वाच्यम्। न हि लक्षणमेव प्रमाणमित्युच्यते अपि तु शब्दादिकं तथा च लक्ष-
णप्रमाणजिज्ञासायां शब्दादेरपि प्रमाणत्वेनोपन्यसनीयतया अनुपपत्त्यभाव इति।
अपि च लक्षणं न प्रमाणमिति वदतां स्वाप्यग्रन्थेषु इतरभेदानुमापकस्य प्रमाणत्वो- राम
पन्यासेन हेतोः काञ्जिकपायमानाहतः काञ्जिकपायिनां तथाप्येनां स्वगोत्रघ्नो निरासमिवापि ४५

वामिचेत्तिन्मायावत्ता॥ तद्दक्षिण चार्याः तेषांनिरासमिपृथिवीमिचेत्तिन्मापतो अव्याप्त्यतिव्या
प्तिपरिहारेणतत्त्वदर्थस्यवस्थापकंप्रमाणमुपादर्शनेनदेवतल्लक्षणमितितत्समात्पृथिवी
त्वस्यपृथिवीतरभेदानुमाकत्वेनतस्पृथिवीलक्षणमित्यत्रकिमनुपपन्नम॥ एवंगंधव
त्त्वमेपिपृथिवीनिष्ठवैधर्म्यतल्लक्षणंचेत्तनापिपृथिव्याःपृथिवीतरभेदानुमानसंभवात॥
नन्वत्रस्वरूपासिद्धानेनतत्संभवतीतिवाच्यम॥पृथिवीचतुर्दशगुणमध्येगंधस्यांतर्भावे
ननस्मासिद्धतद्दुक्तिलात॥ तदाहुराचार्याः॥रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग
विभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराःपृथिव्याश्चतुर्दशगुणाइतिननुपृथिव्या
एतादृशचतुर्दशगुणवत्त्वे किंप्रमाणमितिचेतत्राहपृथिव्यांरूपरसगंधस्पर्शाःसू
त्रकारवचनादेवसिद्धाःतथाचसूत्रेरूपरसगंधस्पर्शवतीपृथिवीतिएवंसंख्यादयःपरस्प
रसूत्रकारवचनादेवसिद्धाःतथाचसूत्रेसंख्यापरिमाणानिपृथक्त्वसंयोगविभागौपरत्वे

सास
४६
46

परत्वे कर्म च रूपादिद्रव्यसमवेतत्वापातं चापत्तेरिति। एवं सूत्रकारवचनात् गुरुत्वमपि सिद्धम्।
तथा च सूत्रं संयोगाभावे गुरुत्वात्पतनमिति। एवं सूत्रकारवचनात् द्रवत्वमपि सिद्धम्। तथा
च सूत्रं सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगात् द्रवत्वमद्भिः सामान्यं द्रवत्वमि
ति। संस्कारोपि सूत्रकारवचनात् सिद्धः। तथा च सूत्रं नोदनादाद्यमिषोः कर्म तत्कर्मकारिता
च संस्कारादुत्तरं तथोत्तरमुत्तरं चेति। एते च तुर्दश गुणा न केवलं सूत्रकारवचनादेव सिद्धाः
प्रत्युत प्रमाणान्तरतोपि। तथा हि रूपादिरपरत्वान्तः प्रत्यक्षतः सिद्धः। पतनलिंग
कानुमानेनातीन्द्रियगुरुत्वं सिद्धम्। द्रवत्वमप्यग्निसंयोगव्यतिरेकानुविधायिप्रस्यन्द
तः सिद्धम्। संस्कारः क्रियालिंगानुमानात् सिद्ध इति। तस्मादेवं क्रमेण सिद्धेषु एषु पृथिव्यां च
तुर्दश गुणेषु मध्ये गन्धस्यापि परिगणितत्वात् गन्धवत्त्वेन पृथिवीतरभेदसाधने स्वरूपासि राम
द्ध्यभावेन नासिद्धं गन्धवत्त्वेन पृथिवीवैधर्म्यलक्षणं तल्लक्षणत्वमपि नानुरूढमशुद्धं सांगधि ४६

सलिलसुगंधःसमीरणइतिप्रतीतिबलाज्ज्वालवायोरपिगंधवत्त्वात्तेनपृथिव्यामितर
भेदानुमानासंभवादितिचेन्नतादृशप्रतीतीनांजलादिसंपृक्तपार्थिवभागवृत्तिगंध
स्यैवस्वाश्रयपसंपृक्तेत्वेरूपपापरासंबंधेनविषयत्वकल्पनात्।नचैवमप्युपदर्शितभे
दानुमानमनुपपन्नंप्रमाणाबलाज्जलादिषुगंधसत्त्वेमानाभावादेवभागासिद्धेः।तथाचकर्पूरगं
धवत्त्वेपृथिवीत्वाधौवैधर्म्यमित्तिवाच्यम्।तत्रापिपाकजरूपादिनाऽनुभूतगंधवत्त्वा
नुमानादिति।सचगंधोद्विविधः।सुरभिरसुरभिश्चेति।एवंशुक्लनीलपीतरक्तादिषुरु
पवत्त्वमपिपृथिवीवैधर्म्येणतल्लक्षणांचातिनापितत्रेतरभेदानुमानसंभवात्।ननुरसप
सैकवैधर्म्यवासमुदितमानाघः।मधुररूपस्यजलादावपिविद्यमानत्वात्तेनपृथिव्या
मितरभेदानुमानासंभवात्।नचद्वितीयः।क्वापिपृथिव्यांतथाविधनानारूपासत्त्वेनव
रूपासिद्धात्तथाविधसमुदितेनापितत्रेतरभेदानुमानासंभवात्।नचनीलपीतादिना

नानारूपवदवयवपवयवारब्धे घटे तथाविधनानारूपसंख्यान्नेन तद्भेदानुमानेन तथाविधहेतुःस्व
रूपासिद्ध इति वाच्यम् । यतस्तथाविधघटे तथाविधनानारूपालिङ्गनायां वृत्तित्वस्याप
वृत्तित्वाव्यवस्तरस्य धर्मस्य कीर्तितानित्यसंभवं विनानासंविषयावृत्तिताव्यापवृत्तिवृत्तित्वाजातिस्या
व्यवृत्तिवृत्तित्वाभावनियमेन तत्र व्याप्यवृत्तित्वे वृत्तिरूपत्वाद्यनुपपत्तेः । नीलावयवावय
वेन सन्निकर्षे दशायां पीतरूपग्रसत्तापत्तेश्चाव्याप्यसमवेतचाक्षुषप्रतिचक्षुःसंयुक्त
समवायत्वेन हेतुतया तदानीं तत्र तथाविधकारणसत्वात् । किं तु चित्ररूपमेव तत्रा
नीकार्य्यमिति नो पदर्शितरीत्या स्वतद्भेदानुमाने स्वरूपासिद्धिपरिहारः इति चेन्नपा
कुपाकवादि वैशेषिकमते एकस्मिन्नेवपरमाणौ कालभेदेन पाकोत्पत्त्यादिनाना
रूपोत्पत्त्याभ्युपगमाद्यनेकरूपाणां समुदितानामेव पृथिवीवैधर्म्यत्वप्रसंगात् तान्वेचापर एम
र्शितप्रकारस्यापरमाणौ अभ्युपगमाद्यनेकरूपसंभवेऽपि घटादौ तेन तदसंभवात् कथं पश्चक्याद्यनेक ४१

रूपवत्त्वंपृथिवीसामान्यवैधर्म्यमितिवाच्यम्।शुक्लाद्यनेकरूपात्मनेनशुक्लाद्यने
करूपवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यैवविवक्षणात्।तथाविधपृथिवीत्वजातेःस
र्वत्रपृथिव्यांसम्भवेनानुपपत्त्यभावात्।यद्वाशुक्लेतरतमाद्यनेकरूपवत्त्वंप्रत्येकमेव
पृथिवीवैधर्म्यमिष्टेयम्।जलादौशुक्लेतरादिरूपानभ्युपगमेनानुपपत्त्यभावात्।नन्व
पिशुक्लेतरवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वादिकंवाच्यम्।अतोनसर्वपृथिव्यांशुक्ले
तरादिरूपाभावविरहितिः।मीमांसकानांतुएकैकाएवशुक्लनीलारूपादिव्यक्तयोनित्या
स्तथाचशुक्लेतरत्वमादिभेदेननानाशुक्लनीलाद्यभावात्कथंशुक्लेतरत्वत्वादिकंप्रत्ये
कवैधर्म्यम्।नचैवमपिशुक्लनीलादिजातित्वापत्तिः।नित्यानेकसमवेतत्वरूपजातित्व
लक्षणस्यतत्रसत्त्वादितिवाच्यम्।अगुणगतजातिस्वीकर्तृमीमांसकमतेसंख्यानवच्छिन्नविशेष्य
पाकनिबन्धनत्वस्यैवजातित्वलक्षणत्वेनानुपपत्त्यभावादित्याहुः।तद्वसत्।शुक्लरूपने

सा सं
४८

ष्टमित्यादिप्रतीतेर्बाधकं विना भ्रमत्वासंभवेन शुक्लनीलादेरनित्यत्वांगीकार आव
श्यकत्वात् तानचनानां शुक्लनीलादिकस्य नैकत्वमेव तत्र बाधकमिति वाच्यम् अप
दर्शितबाधकेन घटेन ... इत्यादिप्रतीतेरपि भ्रमत्वकल्पनापत्त्या स्मदादेरपि नित्य
त्वांगीकारापत्तेः प्रतीतेः ... प्रमात्वकल्पनोपपत्तौ भ्रमत्वकल्पनाया अन्याय्यत्व
मित्यवश्यमुपेयं तथाऽपदार्थत्वेनाशविषयकप्रतीतेः शुक्लनीलादेरनित्यत्वांगी
कारस्यावश्यकत्वादिति एवं तिक्तकटुकषायाम्ललवणमधुरभेदेन षड्विधरसव
त्त्वमपि पृथिव्यां वैधर्म्यं हेयमानचात्रापि मधुरादिरससमुदितस्य पृथिवीवैधर्म्य
त्वानुपपत्तिः क्वापि पृथिव्यां तथाविधषड्रसवत्त्वाभावात् प्रत्येकं मधुरादिषट्सा पृ
थिवीवैधर्म्यत्वं तु मधुरादिरसवत्त्वस्य जलसाधारणतया सुदृढमेवाहतमिति वाच्यम् पृ एम
थिवीरसस्य पाकजतया एकत्र परमाणौ मधुरादिषड्रससंभवेन समुदितमधुरादिषड्र ४८

सर्ववृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यैव पृथिवीवायोर्धर्म्मत्वाभ्युपगमात् पृथ्व्याम
धुरत्वत्वादिकं प्रत्येकमेव वैधर्म्यं पृथिव्याम् जलादिमधुरेतरत्तमाभावेन मधुरत्व
त्वादेर्जलस्य साधारण्याभावेनानुपपत्त्यभावात् । न चैवमपि सर्वपृथिव्याम् मधुरत्वासम्भ
वान्नैवमिति वाच्यम् । मधुरत्वासर्ववृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यैव पृथिवीवैधर्म्य
त्वाभ्युपगमादिति । अत एव मण्यादिषु मधुरिमाद्यनुपलब्ध्या तदभावेन कथं म
धुरत्वादिषट्कं सर्वत्व पृथिव्या वैधर्म्यमित्यपि परास्तम् । तत्रापि पाकजरूपवत्त्वमेवा
रूपत्वेनांशवत्त्वमुपदर्शितं षड्विधास्पतमानुभूतास्ताम्भ्युपगमात् । वस्तुतस्तु उपदर्शितं
त्वजातिघटितनिरुक्तधर्मस्यैव पृथिवीवैधर्म्यत्वाभ्युपगमेन मण्यादौ रसाद्यनुपल
म्भेपि क्षतिविरहः । अत एवान्नेनैरसादौ प्रमाणं नास्तीति दीधितिकृद्भिरपि सङ्गच्छ
ता एवं पाकजानुष्णाशीतस्पर्शवत्त्वमपि पृथिव्या वैधर्म्यं ज्ञेयम् । न चात्र पाकज

सा.सं. ५८

त्वविशेषणोपादानं व्यर्थं मनुष्याशीतस्पर्शवत्त्वमात्रस्य वायुसाधारणत्वेन पृथिवीत्वे
च मर्भीत्वाभावात् तत्र पाकजत्वविशेषणोपादानस्यावश्यकत्वात् न च पृथिव्याः पाक
जस्पर्शमात्राभावान्नैवमिति वाच्यम् यतस्तत्र पाकजस्पर्शेनाकारजलादिस्पर्शव
त्सर्वत्र पृथिव्यामेकजातीयस्पर्शप्रसंगः तथा चाशीतविषयादिस्पर्शत्वेनानुभवसिद्ध
दुःखविशेषप्रति आशीविषादिस्पर्शत्वेनानानां विलक्षणस्पर्शत्वानत्वेन हेतुतोपपत्ते
भवन्मते सर्वपृथिवीस्पर्शानामेकजातीयतया आशीविषानतिरेकपृथिवीस्पर्शग्रहे
तादृशदुःखविशेषस्यासम्भवापत्तेः न च दुःखविशेषजनकतावच्छेदकवैलक्षण्यपि न वैजा
त्यमापि तु आशीविषवृत्तित्वमेवेति नोक्तानुपपत्तिरिति वाच्यम् आतपातिकारणता
वच्छेदकगौरवप्रसंगात् आशीविषवृत्तित्वस्पर्शत्वयोर्विशेष्यविशेषणभावे विनिगम
नाविरहेण कारणतापाप्यधिकप्रसंगाच्चान्यच दुःखविशेषप्रति आशीविषस्पर्शत्वे

एम ५८

नेन हेतुः अपि तु आश्रयविषयकस्पार्शनत्वानमतो नोक्तानुपपत्तिरिति वाच्यम्। दोषविशे
षेणाश्राश्रयविषयविषयकस्पर्शग्रहे अन्यस्पर्शविषयकाश्रयविषयविषयकस्पार्शनेनत्वप
विषयः त्वविशेषापत्तेः तस्मादाश्रयविषयवृत्तिस्पर्शज्ञाना नानात्र विलक्षणस्पर्शत्वेन त्वेने
वहेतुतावाच्या। तच्च वैलक्षण्यं पृथिवीस्पर्शस्य पाकजत्वं विना अनुपपन्नं तादृशवैलक्ष
ण्यावच्छिन्नं प्रति विलक्षणतेजःसंयोगत्वेन हेतुतायाः संभवादिति। न चाश्रयविषयारंभकाव
यवविलक्षणानुष्णाशीतस्पर्शस्वीकारेणाश्रयविषयविलक्षणस्पर्शो विलक्षणस्पर्शजन्य
एवाभ्युपेयतामिति वाच्यम्। अनपत्तारंभमतेन तथाविधविलक्षणस्पर्शाभावात् पाकमा
णुभिरेवाश्रयविषयविशेषारंभेन तथोक्तेरसंभवादिति विलक्षणतेजःसंयोगजन्यतया वि
धविलक्षणस्पर्शस्वीकारे इति सिद्धं पृथिवीस्पर्शस्य पाकजत्वेनेति। अत एव शीतोष्ण
स्पर्शातिरिक्तस्पर्शमानाभावात् पार्थिवाः पाकजानुष्णाशीतस्पर्शवत्त्वे धर्म्ममिसाक्षि

सा०सं०
५०
50

रसेनानैवानं चैवं सति पृथिव्यामनुष्णाशीतस्पर्शविषयकस्पर्शोपलंभोऽनुपपन्न इति वाच्यम
।पनस्तादृशोपलंभो नातिरिक्तानुष्णाशीतस्पर्शविषयकः। अपि तु शीतस्पर्शेनाभिभवात्
विलक्षणं गृह्यत इति उष्णत्वेनागृह्यमाणोऽस्ति जो नूनमुष्णस्पर्श एव पाकपाकसंबंधेन तद्विषयः किंचि
न्नुष्णस्पर्शेनाभिभवात् शीतत्वेनागृह्यमाणो जलवृत्तिशीतस्पर्श एव तद्विषय इत्यपि परास्त
म् उपदर्शितानुपपत्तेः तेजोगाहकत्वात् तादृशप्रतीतेः पाकपाकसंबंधेन शीतस्पर्शादि विषयकत्वे
गोचरत्वात् बलवत्सजातीयग्रहणाकृतमग्रहणमभिभव इत्यभिभवलक्षणाक्रान्ताभिभवस्य
शैत्योष्ण्यमतग्रहकालेऽप्यतत्रासंभवेन अबाधकौ शुष्कधनाहेरनुष्णाशीतस्पर्शप्रतीत
रुपपत्तेश्च। सेयं पृथिव्यां वातावह्निविधा विरसानि समेतेति। परमाणुरूपा पृथिवी नित्या। न चात्र नै
यायिकानां सत्वे मानाभाव इति वाच्यम्। परमाणोर्नित्यत्वानंगीकारे मेरुसर्षपयोस्तुल्यपरिमा
णकत्वापत्तेः। तथाहि परमाणोरनित्यत्वानंगीकारे नदवपवनदवपवपरंपराकल्पनापत्ती

एग
५०

युक्तेस्तैल्यानान्तप्याच्च महत्सर्षपारंभकाणामवयवपरंपराणां न्यूनाधिकभावस्य सर्वत्राय
ऽविशिष्टे घनतयाऽतुल्यत्वेन महत्परिमाणजनकतदवयववृत्तिसंख्यासमानजातीयसंख्यायाः
सर्षपारंभकावयवेषु विद्यमानत्वात्सर्षपेपि महत्परिमाणतुल्यपरिमाणापत्तिर्दुर्वारैवा न च
महत्सर्षपयोरवयवगतसंख्याया अविशेषेपि अवयवगतपरिमाणप्रचयाख्यसंयोगयो
परिमाणजनकयोर्विशेषान्महत्परिमाणयोर्विशेष इति वाच्यम् तयोरवयवगतसंख्याया
अविशेषेपि अवयवगतपरिमाणप्रचयाख्यसंयोगविशेषयोरप्यनुपपन्नत्वात्तद्विशेषस्या
पि संख्याविशेषनियम्यत्वादिति । वस्तुतस्तु परमाणोरवयवांगीकारे तत्प्रयुक्तात्तदव
यवाद्यपि कल्पनीयतया अनवस्थाप्रसंगोऽतो य इति परमाणोर्निरवयवत्वमावश्यप
कः । अत एव च तन्नित्यत्वं द्रव्यनाशकयोरवयवनाशतत्संयोगनाशयोरसत्वात् । तत्रा
संभवादिति । अनित्यानुकार्यैकदेशपृथिव्यादितस्यावयवधर्म्यतातिरिक्तत्वविशिष्टभकत्वम

सा॰सं नादिद्रव्यवृत्तिविरोधित्वावयवसन्निवेशत्वपर्याप्तत्वानि ते यानि। अत्रास्थिरत्वं चिरकालस्था
५१ यित्वं तदपि परमाणुभिन्नत्वे सति निबिडसंयोगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं कार्यपर्य्यवसि
वेयधर्म्ममिति परमाणुसाधारण्येवारणाय परमाणुभिन्नत्वे सतीति जलादावतिव्याप्ति
51 वारणाय निबिडेति निबिडत्वं च पृथिवीमात्रवृत्तिसंयोगमात्रवृत्तिजातिविशेषः घृत
द्रावत्प्यातिव्याप्तिवारणाय जातिविशेषणाभिन्ताविष्टंभकत्वं तु परमाणुभिन्नत्वे सति स्ववृत्तिगुरु
त्वाधिकगुरुत्वाश्रयप्रतियोगिकउत्तरदेशसंयोगप्रतिबंधकवृत्तिद्रव्यत्वव्याप्यजातिम
त्वं। इदं च स्वल्पगुरुत्वाश्रयपालवालादेरधिकगुरुत्वाश्रयजलगमनप्रतिबंधात्। पिंडसं
संगमनादौ। अत्रापि परमाणावतिव्याप्तिवारणाय परमाणुभिन्नत्वनिवेशः। वाय्वादा
वतिव्याप्तिवारणाय प्रतियोगिकत्वान्तं संयोगविशेषणं। एतद्दाने तु तत्र नातिव्याप्तिः राम
वायोर्गुरुत्वाभावात् जले गुरुत्वमस्ति पि तादृशसंयोगप्रतिबंधकत्वान्नातिव्याप्तिः। तैला ५१

द्रवत्वव्याप्तिर्वाऽप्यजातिगर्भतया जलादिव्यावृत्तविरोधित्वं च स्ववृत्तिगुरुत्वाधिकगुरुत्वा
श्रयपतनप्रतिबंधकसंयोगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वात् इदं तु स्वसमगुरुत्वाश्रयसमद्र
व्यावधिकगुरुत्वाश्रयजलस्थापनेन तज्जलस्याधोदेशे पतनानापत्तेः प्रान्त्यावयवसंगमनापि
अवयवसन्निवेशत्वं तु सामान्यव्यंजकसंस्थानविशेषवत्वं तद्धि परमाणुभिन्नत्वे सति
स्वव्याप्यजातिव्यंजकतावच्छेदकसंस्थानवृत्तिनानाजातिकद्रव्यत्वव्याप्यजातिमत्वं अ
त्र स्वपदं पृथिवीत्वादिपरं तथा च तद्व्याप्यघटत्वादिव्यंजकतावच्छेदककंबुग्रीवादिरूपसंस्था
नवृत्तिकंबुत्वादिरूपनानाजातिमत्वात् अत्र स्वपदं लक्षणैतामिमतपार्थिवशरीरादिरूप
कार्यपृथिवीपरं तथा च तत्सजातापेतरात्समवृत्तीच्छाविषयोपपत्तस्त्वादि कार्य्यतज्जन
कत्वगतं तत्र लक्षणसमन्वयः सा कार्य्यलक्षणा पृथिवी त्रिविधा शरीरेन्द्रियविषयभेदात्
अत्र शरीरत्वं न जातिः पृथिवीत्वादिना सांकर्य्यात् तथाहि पृथिवीत्वमस्ति घटादौ न तु

सा॰सं॰ नशरीरत्वं शरीरत्ववृत्ति जलीयशरीरादौ तत्र नपृथिवीत्वसामानाधिकरण्यं चातपो:
५२ पार्थिवशरीरे इति किं तु भोगावच्छेदकोसावयवित्वं शरीरत्वं तत्र घटपटादौ सावयवविध्व
तिव्याप्तिवारणाय भोगावच्छेदकत्वनिवेशः हस्तपदादिरूपशरीरावयवे तिव्याप्तिवा
रणायांत्यावयवित्वनिवेशः न च भोगपदस्य सुखदुःखान्यतरसाक्षात्कारार्थकतया
सुषुप्तिकालीनसत्त्वविनष्टसुखदुःखशरीरेऽव्याप्तिः तदानीं तादृशानुदयेन तत्र तथाविधसाक्षा
त्कारात्मकभोगावच्छेदकत्वविरहादितिवाच्यम्। भोगावच्छेदकवृत्त्यंत्यावयविमा
त्रवृत्तिजातिमत्त्वस्य प्रकृते विवक्षितत्वात्। तदानीमपि तत्र तथाविधदेवत्वादिजाते:
सत्त्वेनानुपपत्त्यभावात्। अत एव न मनुष्यशरीरादावव्याप्तिस्तदानीमपि तथाविधम
नुष्यत्वादिजाते: सत्त्वात्। न चैवमपि भ्रष्टाकुष्ठादिशरीरेऽव्याप्तिः भोगपदार्थस्य तथा राम
विधसाक्षात्कारस्यानिसतया तत्र शरीरे तदवच्छेदकत्वविरहादितिवाच्यम्। तत्रापि ५२

ध्यायित्थंविधमनुष्यत्वजातेरभ्युपगमेनानुपपत्त्यभावात् अथ योगपदमत्रवेष्टा
परमेतेन न कोपि दोष इति ध्येयम्। न चैवमपि नरसिंहादिशरीरेऽव्याप्तिस्तत्र सांकर्य्यभिया न
रत्वसिंहत्वादिजातीनामनभ्युपगमेन तथाविधजातिघटितलक्षणासंभवादिति वा
च्यम्। तत्रापि नरसिंहत्वजातेरभ्युपगमेन लक्षणसंभवादिति। तच्च शरीरं द्विविधं यो
निजमयोनिजं च। तत्र शुक्रशोणितसन्निपातजं योनिजं शुक्रशोणितसन्निपातानपे
क्षं शरीरमयोनिजं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। एवं मशकादी
नामपि तस्य नारकित्वात्। अयोनिजमपि द्विविधं। जरायुजमण्डजं च मानुषादिपशुमृगा
णां शरीरं जरायुजं पक्षिसरीसृपादीनां शरीरमण्डजं। एतदुभयविधमपि योनिजं गर्भवासा
दिदुःखजनकं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। तदन्येभ्यस्तु शरीरं नारमित्यवधेयम्।
ननु अयोनिजमध्ये वृक्षादिशरीरं कथं नोदाहृतं गौरवा। वदिधातुद्वयालापनेन नमस्य

सास:
५३

क्षतसंरोहणादीनां मूलावसिक्तोदकात् पुष्टिदर्शनेन च वृक्षादेरपि शरीरस्य प्रमित
त्वात्। अन्यथा शरीरं धर्मपुष्पादिहेतुत्वासंभवापत्तेः। एवमधर्मविशेषकृते वृक्षे ह
न्तशरीरपरिग्रहे हणात्मनो भोगस्य प्रणश्रवणात्। साम्यत्वेनापि वृक्षादेः शरीरत्वमा
वश्यकमिति चेन्न। वृक्षशरीरसत्वेपि न तत्र शरीरप्रसिद्ध्यभावेन प्रकृते तदनुदाहृतत्वात्। अ
पि तु तस्य विषयत्वेन प्रसिद्धत्वात् विषयमध्य एवोदाहरिष्यमाणत्वापि सर्वांगतत्वम्।
ननु तथापि मनुष्यादिशरीरं पार्थिवमेवेति कथमुच्यते गंधक्लेदसत्वकंपावकाश
दानेभ्यः पांचभौतिकत्वेन प्रसिद्धत्वात्। अन्यथा पार्थिवाधर्मो गंधस्य जलधर्मद्रवत्वस्य
क्लेदस्य तेजोधर्मोष्णस्पर्शरूपोष्मत्वस्य वायुधर्मकंपस्य मुखमध्ये वाद्यादिगतस्य प्रतिबंधकं
पावकाशदानात्मकाकाशधर्मस्य वासंभवादिति चेन्न। मनुष्यादिशरीरं प्रति जलादिकं पा एम
र्थिवशरीरावयवसंपृक्तं सन्निमित्तकारणमेव न तूपादानकारणं विजातीयावष्टम्भाव ५३

यद्यनुपगमात् तथा हि पादिशरीरे पार्थिवावयवजलावयवाद्युपादानकारणकत्वं स्या
त् तदा स्नेहादिसामर्थ्यं स्यादुपादानगतगुणेनोपादेये स्वसमानजातीयगुणारम्भनियमात्
तथा च शरीरे पार्थिवत्वजलत्वादिरूपनानाधर्मोपपत्तेः न चेष्टापत्तिरिति वाच्यम् तथा सति
पार्थिवत्वजलत्वादीनां साङ्कर्येण जातित्वानुपपत्तेरिति। एवं मनुष्यशरीरस्य जलाद्यु
पादानकारणत्वे तेजःसंयोगेन जलनाशे पि तत्र शरीरनाशापत्तेः उपादाननाशस्योपादे
यनाशे हेतुत्वात् तच्चेन्द्रियं पार्थिवं घ्राणं स एव कान च घ्राणे प्रमाणाभाव इति वाच्यम् गं
धसाक्षात्कारो मनोभिन्नेन्द्रियजन्यः मानसेतरसाक्षात्कारत्वात् स्पार्शवदित्यनुमाना
त्तत्सिद्धेः न चैवमपि पार्थिवत्वासिद्धिरिति वाच्यम् घ्राणेन्द्रियं पार्थिवं परकीयरूपाद्यव्यं
जकत्वे सति गन्धव्यञ्जकद्रव्यत्वात् कुङ्कुमगन्धव्यञ्जकतैलवदित्यनुमानात् तत्र पार्थिव
त्वसिद्धेः अत्रानुमाने मनसि व्यभिचारवारणाय पदं तोयसत्यन्तनिवेशः तत्रापि रसनासि

सा सं
५४
54

द्धिपरिहाराय र्थपरकायपत्वनिवेशः। संनिकर्षादौ व्यभिचारवारणाय पदद्वयत्वनिवेशः। न
चैतथापि नवशरावगंधव्यंजकजले व्यभिचारवारणाय एवेति वाच्यम। जलस्वरूपस्यात्मेघा
नालरूपव्यंजकत्वेन संसंगच्छते न हेतोरभावेन व्यभिचारासंभवादिति। न चैतथापि तथा
विधतीलाख्यंजकेन वशरावगंधव्यंजके जले व्यभिचारोऽवीरणाय एवेतिवाच्यम। अत्रपरकीयरूप
व्यंजकत्वे सतीति नपरकीयरूपविषयकसाक्षात्कारस्वरूपयोग्यत्वे सतीति विवक्षणात्।
तथाविधमघीनालरूपसाक्षात्कारं प्रति जलत्वेन हेतुतया जलसामान्यस्य परकीयसाक्षा
त्कारस्वरूपयोग्यत्वेनानुपपन्नभावात्। न च घ्राणेन्द्रियस्पर्शाभावात्तदुपदर्शितानुमाने
न तत्र पृथिवीत्वसाधने बाध इति वाच्यम। तथाविधहेतुना तत्र गन्धवत्त्वस्यापि साधनात्
अपवादगंधसाध्यकोपदर्शितहेतुकानुमानात्। तत्र गंधसिद्धौ पश्चात्तद्गंधहेतुना तत्र पा राम
र्थिवत्वसाधनापामिति नानुपपत्तिः। न च घ्राणेन्द्रियसंयोगाश्रयपरसंबंधसत्तगंधसा ५४

हकं घ्राणेन सह गंधाश्रयासंयोगे गंधानुपलंभस्यानुभवसिद्धत्वादिति न च घ्राणेंद्रिय
स्य गंधग्राहकत्वे श्लेष्मादिदूषितघ्राणकपुरुषस्यापि गंधग्रहणप्रसंग इति वाच्यम् । तत्र श्ले
ष्मादिदोषस्य प्रतिबंधकत्वाभ्युपगमेन न तद्ग्रहापत्तिसंभवादिति एवं इंद्रियत्वमपि न जाति
नेजेजस्त्वादिना संकरप्रसंगात् । किंतु शरीरसंयुक्तसाक्षात्कारसाधनातींद्रियत्वं तद्विधे
यम् । अत्र विषयचक्षुःसंयोगादावतिव्याप्तिवारणाय शरीरसंयुक्तत्वं मतींद्रियविशेषणम् ।
गगनादिशरीरसंयोगमादाय गगनादावतिव्याप्तिवारणाय साक्षात्कारसाधनत्वमतीं
द्रियविशेषणं । आत्मन्यतिव्याप्तिवारणायातींद्रियत्वनिवेशः । न चैवमपि कालादावति
व्याप्तिंडवीरेवेति वाच्यम् । साक्षात्कारणशरीरसंयोगवदतींद्रियत्वमिंद्रियत्वमित्यस्य
प्रकृते विवक्षितत्वात् । इंद्रियविषयसंयोगवदिंद्रियशरीरसंयोगस्यापि साक्षात्कारहेतु
त्वेन सर्वत्र लक्षणगमनसंभवात् । न चैवमपि शरीरकालसंयोगमादाय कालेऽतिव्याप्तिः

५५

सा सं
५५
55

तस्यापि कालोपाधितया सांस्कारकारणत्वादिति वाच्यम् । क्रियामात्रस्य कालो-
पाधित्वाभ्युपगमे एतल्लक्षणाभिधानात् । न चैवमपि स्पर्शग्राहकवायवीयवायवीय-
शरीरत्वक्संयोगमादाय वायवीयशरीरेऽतिव्याप्तिरिति वाच्यम् । शरीरभिन्नत्वस्या-
पि अन्तरिन्द्रिये विशेषणोपादानात् । शरीरसंयोगस्तत्र शरीरपदं तु स्पर्शात्मकवायव-
यवयववृत्तित्वक्संयोगमादाय वायवीयावयवेऽतिव्याप्तिवारणाय बोध्यम् । इन्द्रियावयवशरीरसं-
योगस्तु न सांस्कारजनकः अतो नेन्द्रियावयवेऽतिव्याप्तिरिति एवं विषयत्वम-
पि न जातिः सामान्यादिषु तत्सत्वात् । अपि तु प्रतीयमानत्वेन भोगसाधनत्वम-
वच्छेद्यम् । एतन्निष्कर्षोपि इन्द्रियाभिन्नत्वे सति मनुष्यादिशरीरभिन्नत्वं द्रष्टव्यम् ।
अत एव घणुकादेः प्रतीयमानत्वेन भोगहेतुत्वे मानाभावेपि न क्षतिरिति अवधेय- रा म
म् । एतादृशविषयास्तु परमाणुघणुकादिक्रमेणावगन्तव्या इति ज्ञेया इति । ननु परमाणु ५५

एणुकयोर्मानाभावेन तद्विषयत्वानुपपन्नमिति चेद् त्र्यणुकं द्व्यणुकारमतानुयायिनः परिमाण
त्वस्याश्रयजातेरुत्कर्षाश्रयपरत्वनियमोऽवश्यमभ्युपेयः । अपकर्षस्त्र्यणुकमहत्त्वोत्कर्ष
घटादिमहत्त्ववृत्तिमहत्त्वत्वादेस्तथा दर्शनात् । तथा चाणुत्वस्यापि परिमाणत्वसाध्यजा
तितया तत्राप्यपकृष्टाणुत्ववृत्तित्वोत्कृष्टाणुत्ववृत्तित्वोपगमस्यावश्यकत्वेऽपकृष्टाणु
त्वोत्कृष्टाणुत्वसिद्धौ अपकृष्टाणुत्वाश्रयत्वेन परमाणुसिद्धिः एतन्मते परमाणोरणुत्व
स्य मनदेशवृत्तित्वेनापकृष्टत्वात् उत्कृष्टाणुत्वाश्रयत्वेन द्व्यणुकसिद्धिः एतन्मतेऽ
णुकानामणुत्वस्यापकर्षवृत्तित्वेऽपि उत्कृष्टत्वादिस्याऽऽः । तन्नानात्वदर्शनियममानाभा
वात् अन्योन्याश्रयत्वाच्च । तथा हि तथाविधाणुत्वद्वयसिद्धौ तदाश्रयत्वेन परमाणु
द्व्यणुकसिद्धिः परमाणुद्व्यणुकसिद्धौ च तदाश्रितत्वेन तथाविधाणुत्वद्वयसिद्धिः । अन
यान्याश्रयाभावेनाणुत्वस्यासिद्धाऽणुत्वस्याप्यभावेनोक्तनियमबलेनापकर्षोत्क

सा सं ष्टाणुत्वासिद्ध्याऽपदर्शिततराणेरेवं समवद्दुक्तिकत्वादिति । सांप्रदायिकास्तु त्र्यणुकस्य चा
५६ क्षुषत्वात् महत्त्ववत्त्वमावश्यकं द्रव्यप्रत्यक्षं प्रति महत्त्वस्य हेतुत्वात् । तच्च महत्त्वं जन्यं अ
56 पकृष्टमहत्त्वात् घटादिमहत्त्ववदित्यनुमानात् तत्र जन्यमहत्त्वसिद्धिः तच्च जन्यमहत्त्वम
वयवगतबहुत्वसंख्यां विनाऽनुपपन्नं जन्यमहत्त्वं प्रति अवयवगतबहुत्वसंख्यायाः स्वा
श्रयसमवेतत्वसंबंधेन हेतुत्वस्य क्लृप्तत्वादिति त्र्यणुकावयवत्वेन द्व्यणुकत्रयंगीकार
आवश्यकः न च नानैव तदवयवोऽस्तु किं द्व्यणुकांगीकारेणेति वाच्यं मानात् तथा सति तदव
यवस्य प्रत्यक्षत्वापत्तेऽमहत्तदवयवतो महतः प्रत्यक्षत्वनियमात् एवं सिद्धे द्व्यणुके तदवयव
त्वेन परमाणुस्वीकारोऽप्यावश्यकः महदारंभावयवावयवस्य सावयवत्वनियमात् कपाला
दौ तथा दृष्टत्वात् । अथ परमाणोरावश्यकत्वे द्व्यणुकांगीकारो निरर्थकः त्रिभिः परमा एम
णुभिरेव त्र्यणुकारंभाभ्युपगमेनावयवगतबहुत्वसंख्यया तत्र महत्त्वनिर्वाहात् न च चो ५६

घटद्रव्यस्य जन्यावयवारभ्यत्वनियमेन द्व्यणुकस्वीकार आवश्यकः। अन्यथा परमाणो
रेवणुकारंभकत्वे तस्य जन्यत्वापत्तेरिति वाच्यम्। तादृशनियमे मानाभावादिति चेन्न।
महत्वप्रतिसाह्यात्परंपरयाऽनेकावयवसवेतद्रव्यस्यापि हेतुत्वात्परमाणुजन्यद्व्यणुका
नंगीकारे त्र्यणुके महत्त्वानुत्पत्तेः। एवं द्व्यणुकमनंगीकृत्य परमाणुत एव महद्द्रव्याङ्गीका
रे त्र्यणुकमारभ्य कपालादिरूपकार्येषु महत्त्वविलोपप्रसंगश्च। अनेकपरमाणुभिरेव
घटजननोपपत्तेस्तस्मात्परमाणुर्न महद्द्रव्यारंभकः। अपि तु अणुद्रव्यारंभक इत्यस्या
वश्यमभ्युपेयतया द्व्यणुकसिद्धिस्सुहैवेति। यदि च द्व्यणुकाभ्युपगमेऽप्युक्तानुपप
त्तिः। द्व्यणुकेऽप्येव घटादिरूपकार्योपपत्तेः। यदि च द्व्यणुकेन त्र्यणुकमेवारभ्यत इति
नियममभ्युपेत्योक्तानुपपत्तिः पारिहृपत्तेन न द्वापरमाणुभिः अणुकाभ्युपगमेऽपि क्षतिर्वि
रहरति विभाव्यते। तथापि वक्ष्यमाणयुक्त्या द्व्यणुकसिद्धेरावश्यकत्वात्। तथाहि। सं

एासं। ख्यात्वं परिमाणासमवायिकारणानामुत्कर्षानाश्रयत्वे सति त्रित्वभिन्नपरिमाणा
५१ समवायिकारणवृत्तिः उत्कृष्टापकृष्टपरिमाणासमवायिकारणवृत्तिजातित्वात् महत्
त्ववदित्यनुमानान्न हि द्वित्वजन्याणुत्वपरिमाणसिद्धिपर्यवसन्नं तथा तदाश्रयतया
57. द्व्यणुकसिद्धिः। न चोपदर्शितानुमानाच्चेत् द्वित्वजन्याणुत्वासिद्धिस्तदेवं संगच्छते
न हेवं न द्वित्वजन्यमहत्त्वासिद्धौ च तथाविधानुमानतादवस्थ्योपपत्तेरिति वाच्यम् म
हत्त्वे द्वित्वजन्यत्वस्य बाधनिर्णयेन तथाविधानुमशक्यतयाऽपदर्शितानुमानात् द्वित्व
जन्याणुत्वासिद्धेरावश्यकतया तदाश्रयत्वेन द्व्यणुकसिद्धेरावश्यकत्वादिति। अत्र साध्ये
त्रित्वभिन्नत्वनिवेशात् अणुत्वे द्वित्वजन्यत्वासिद्धिर्दृष्टान्ते न त्रित्वमादाय सिद्धसा
धनावकाशः। न च तथाविधोत्कर्षानाश्रयत्वनिवेशात् तेन च त्रुट्यादिकमादाय सिद्धसा एम
धनावकाशः। न च तथाविधचतुष्टयत्वस्य परिमाणासमवायिकारणावधिके ५१

त्कर्षमत्वेनचतुष्टमारापतामहशसाध्यासिद्धेः द्वितीयपरिमाणासमवायिकारणत्वल
निवेशान्नैकमात्रापसिद्धसाधनावकाशः हेतौ उत्कर्षापकर्षत्वे च उत्कर्षपदवाच्य
वत्वस्यसपकर्षपदवाच्यवत्वमात्र नो नाणुत्वहत्पत्कर्षादिमहत्वहत्पुत्कर्षापोवि
भिन्नत्वेनतयोरकतरोपादानेनस्वरूपासिद्धिर्दृष्टान्तासिद्धिश्च साध्यः। अन्नन बीनाःऽप
द्दर्शितानुमानस्याप्रयोजकतयातस्मान्न हि त्वजन्यापाणुत्वासिद्धिरिति घणुके माना
भावः। पद्यणुकं महत्वं प्रतिबद्धत्वं संख्यापाःसाक्षस्तपापायावान्नैनैकद्रव्यसमवेतत्व
स्यहेतुतयाविनाऽणुकावयवतन्नमहत्वानुपपत्तिरिति तन्तदपि त्र्यणुकमहत्वस्यानित्य
त्वाभ्युपगमेनासंभवदुक्तिकमेव अतएव परमाणुरप्यपास्तः। अणुक एवावयवत्ववि
श्रान्तत्वाभ्युपगमादित्याहुः। अधिकमस्मत्कृतपदार्थस्वरूपनिरूपणेऽन्वेषणी
यं इह तन्त्रयोरेवमपान्नाकमिति नास्तिकोक्तः। परमाणवभ्युपगमे परमाणुपुंजए

सा सं
५८
58

वावयवीत्रसरेणुविश्रांतत्वमभ्युपगमे तु त्रसरेणुपुंज एव न त्वतीरिक्तप्रमाणाभावात्
अवांतरानेकद्व्यणुकाद्यतिरिक्तावयविकल्पने गौरवाच्च। न चातिरिक्तावयव्यनभ्यु
पगमे परस्परसंयुक्तपरमाणुपुंजस्यैवावयवित्वमते घटो महानिति महत्वविषय
कप्रतीत्यनुपपत्तिः परमाणोर्महत्वाभावादिति वाच्यम्। नास्तिकमते महत्वस्य संयो
गरूपतया परमाणुवृत्तिसंयोगमादायैव महत्वप्रतीत्युपपत्तेः। न चैवं सर्षपे घटो ध्व
स्त इति प्रतीत्यनुपपत्तिः परमाणोर्नित्यतया नष्टजन्यघटस्य ध्वंसो नासम्भवादिति वाच्य
म्। नास्तिकमते पदार्थमात्रस्य क्षणिकत्वात् परमाणोरपि नाशाभ्युपगमेनानुपप
त्त्यभावात्। अत एव घटोत्पन्न इति प्रतीतिरपि समाहिता पदार्थमात्रस्यैव तन्मते उत्प
न्नतयाऽनुपपत्त्यभावात्। अन्ये के विश्रांतत्वमते त्रसरेणुपुंज एव घटः स त्वाक्षुषप्रदर्शे एम
तीनुपपत्तिरुक्तरीत्या परिहरणीया। न च परमाणुपुंजादो घटध्वंसो को रकपालात घटः ५८

सत्त्वादिति प्रतीत्यनुपपत्तिरिति वाच्यम्। नास्तिकमते परमाणुपुंजविशेषस्यैककपा-
लतया घटरूपपरमाणुपुंजे तज्ज्ञानसत्त्वाभ्युपगमेनानुपपत्त्यभावात्। अत एव पुंजात्मको
सन्निरिति तेषां सिद्धान्तः। न चैवं तस्यापि तेषां मते घटादेः परमाणुपुंजत्वाभ्युपगमे घटस्य
सत्त्वेन स्पार्शनात्। परमाणोरतीन्द्रियत्वादिति वाच्यम्। यतस्तन्मते परमाणोरविभक्तपरमा-
णूनामेवातीन्द्रियत्वं न तु परस्परसंयुक्तपरमाणूनाम्। अतः परमाणुपुंजात्मककपा-
लगतसंयोगविशेषस्यैव प्रत्यक्षत्वं जनकत्वाभ्युपगमादिति नानुपपत्तिरित्याहुस्तद्-
सत्। परमाणुपुंजादेर्घटत्वाभ्युपगमे। घटपटस्तम्भादिप्रत्यक्षविषयता। अनन्तपरमा-
णुकल्पनापात इति महद्गौरवम्। अतिरिक्तघटादिरूपावयव्यंगीकारे तु एकघटादे-
व नत्या किंचित्प्रतीतिविषयताकल्पनालाघवेनातिरिक्तावयविकल्पनस्यानिर्बाधत्वा-
दिति। न च नैयायिकमते अतिरिक्तोऽस्त्ववयविकल्पने गौरवमिति वाच्यम्। नास्ति

सास
५८
59

कमतेपरमाणुपुंजरूपकपालादिभ्यः परमाणुपुंजरूपघटस्वीकारेण गोत्वसंभ
वादिसलमसद्भावे शेनैतात्। इदानीं जलनिष्ठमितरवैधर्म्यमुच्यते। तत्र जलत्वं जनिष्ठ
मितरवैधर्म्यं तेन जले जलेतरभेदानुमानसंभवात्। ननु जलत्वजातौ चेन्मानमस्ति
तदैव तत्र वैधर्म्यत्वमुपपद्येत। तदेव तु न पश्याम इति चेत्। अत्र केचित् जन्यजलत्वावच्छि
न्नप्रतिजलत्वेन समवायिकारणतावच्छेदकतया जन्यजलसमवायिकारणतावच्छेदक
त्वेन जलीयपरमाण्वादिसाधारणजलत्वजातिसिद्धिः। अन्यथा जलीयपरमाणुतो जलस
द्व्यणुकानारंभापत्तेः। न चैवमपि तादृशजलत्वं सावयवविसाधारण्ये मानाभाव इति वाच्यं
जलस्य असावयवत्वानुपगमेन अनुपपत्त्यभावात्। न च सर्वेमिदं संभवति तादृशकार्य
कारणभावावश्यकत्वेन देवनप्रमाणाभावादिति वाच्यं। तादृशकार्यकारणभावान
भ्युपगमे पार्थिवावयवतोऽपि जलारंभापत्तेः। न च जन्यजलत्वावच्छिन्नप्रतिविजाती

राम
५८

यसंयोगत्वेन असमवायिकारणताकल्पने नैवमनुपपत्तिवारणसंभवेऽप्यर्थतत्रजलत्वे
न हेतुतेति वाच्यं तथापि विनिगमनाविरहेण तत्र जलत्वेन हेतुतापादकत्वात् । जन्यद्रव्य
त्वावच्छिन्नप्रति विजातीयसंयोगत्वेन असमवायिकारणत्वेक हेतुत्वकल्पनेन न तथावि
धकार्ये कारणभावस्य अनावश्यकत्वादिति । न च एकजलसमवेतस्यादेरन्यजले अप
त्तिवारणाय तत्तद्व्यक्तिसमवेतत्वावच्छिन्नप्रति तादात्म्यसंबंधेन तत्तद्व्यक्तित्वेन जलव्य
क्तीनां हेतुत्वकल्पनस्य आवश्यकतया तत एव सर्वानुपपत्तिवारणसंभवेन अलं जलत्वे
न तत्र हेतुतयेति वाच्यं यतो जलत्वावच्छिन्नप्रति जलत्वेन हेतुताया अकल्पने पृथिव्यादे
जलत्वावच्छिन्नानुत्पत्तिप्रयोजकत्वं अनंततत्तद्व्यक्तित्वावच्छिन्नभेदकूटे कल्पनीयं तत्क
ल्पने तु एवं तत्र जलत्वावच्छिन्नप्रतियोगिताकभेद एव तथा कल्प्यत इति लाघवस्य अति
स्फुटतया तादृशकार्यकारणभावस्य आवश्यकतयाऽप्रदर्शितयुक्त्या जलत्वजातिसि

सासं स्पर्हेत्वाकुः तद्रसनजलत्वावच्छिन्नंप्रतिस्नेहत्वेनहेतुतयैवसर्वसामंजस्येनतत्रजलत्वेनहेतु
६० तायाः निष्प्रामाणिकत्वात् । ननुजलत्वावच्छिन्नंप्रतिस्नेहत्वेनहेतुत्वनसंभवति । अनुभू
60 तस्नेहमानाभावेननिःस्नेहजलावयवतोऽसनाद्युं भाद्यभिचाराऽऽपत्तेः । अतएवसांसिद्धि
कद्रवत्वमेवहेतुरित्यपिपरास्तं । अनुभूतसांसिद्धिकद्रवत्वमानाभावेनउपदर्शितव्य
भिचारस्फुरणात्वात् । इतिचेत्न । यतःस्नेहासमवायिकारणतावच्छेदकतयाक्लृप्ता
याःस्नेहत्वजातेर्जलत्वजनकतावच्छेदकत्वेलाघवात् जलत्वावच्छिन्नंप्रतिस्नेहत्वेनहे
तुता । स्नेहोफलबलात् । असनावयवेपिअननुभूतस्नेहकल्पनसफलमुखत्वे गौरवेणादोष
त्वादिति । नचास्तुजलत्वावच्छिन्नंप्रतिस्नेहत्वेनहेतुता । तथापिजन्यतावच्छेदकतयाज
लत्वजातिरसिद्धावेतिवाच्यं । जन्यतावच्छेदकत्वेनासिद्धावपिजलत्वजातेःजलीयपरमा राम
णुसाधारणत्वमानाभावेनजलीयपरमाणुसाधारणजलत्वजातासिद्धिरितिनवी । ६०

नास्तु। असतिबाधके शक्यतावच्छेदकतयापि जातिसिद्ध्या जलपदशक्यतावच्छेदकतयापि ज-
लत्वजातिसिद्धेः न च शक्यतावच्छेदकत्वेन जातिकल्पने विभुपदशक्यतावच्छेदकत्वेना-
पि विभुत्वस्य वृत्तिविभुत्वजातिकल्पनापत्तिरिति वाच्यं। असतिबाधके तावतात्तने-
भावासिद्धेः। एवं स्नेहवत्त्वमपि जलनिष्ठमितरवैधर्म्यं जले तेनापि जलेतरभेदानुमानसं-
भवात्। न च जलस्य स्नेहवत्त्वे मानाभाव इति वाच्यं जले स्नेहस्य प्रत्यक्षसिद्धत्वात्। अत एव
जलावसेकेन सक्तादेः संग्रहात्मसंयोगोप्युपपद्यते। अन्यथा संग्रहात्मसंयोगजनके द्र-
व्यवृत्तिसांसिद्धिकद्रवत्वस्नेहयोः संग्रहजनकतया अन्वयव्यतिरेकसिद्धयोः स्नेहहेतुकस्य संग्र-
हात्मसंयोगस्य विना जलस्नेहं जलाद्यनुपपत्तेः। अत एव द्रव्यभाष्ये जलग्रंथे जलवृत्तिचतुर्द-
शगुणाः रूपरसस्पर्शस्नेहसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्व-
वेगाख्यसंस्काराः भाष्यकारादिभिरुक्ता। अत एव भगवत्कणादमहर्षिणापि रूपरसस्पर्श-

सा॰सं॰
६१

वत्पाच्चापो द्रवाः स्निग्धा इति स्नेहेन जलस्य धर्मः स्नेहो ऽभिहितः अत्र प्रत्यक्षं प्रमाणं तःसत्र
कणादिवचनतश्चास्ति स्नेहो जलस्य स्नेहत्व धर्मविशेषो तद्गुणः अपितु जातिरेवेति केचिद्वदं
ति । तन्न । तथा सति दधिदुग्धत्वादिवत् द्रवत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वाभावा
यमेन स्नेहस्य जलपरमाणुवृत्तित्वाभावप्रसंगात् घृतादिष्वात्रेष्टापत्तिः एसुच्यते तथापि स्ने
हो गुण एव न जातिः प्रकृत्यर्थतावच्छेदकनिष्ठापकर्षोत्कर्षार्थकप्रत्ययेन तमप्प्रत्ययेपो
त्कर्षापकर्षशून्यजात्यवच्छिन्नबोधकपदोत्तरं एसंभवेन स्नेहस्निग्धतरमिदं स्निग्धतमं स्न
स्यादि प्रयोगानुपपत्तिः । अत एव न हि भवति गोतरो गोतमः स्वत्कर्माभावोपि जातौ उत्कर्षाप
कर्षाभावेन प्रकृत्यर्थतावच्छेदके उत्कर्षापकर्षबोधकप्रत्यतमप्प्रत्ययो जातित्ववि
शिष्टबोधकपदोत्तरं एसंभवात् । अत एव स्नेहो न जलधर्मः अपितु तैलादिधर्मः सोऽत्वाह राम
वस्तु पृथिवीत्वव्याप्यजातिविशेष एव । न त्वेवत उपलब्धेरस्ति विपरीततथास्त्वयदर्शनात् । ६१

स्निग्धतरत्वस्निग्धतमत्वप्रयोगानुपपत्तेः इतश्चैतत् । अपि च परमाणुवृत्तित्वे द्व्यणुकादिवृत्तित्वेऽपि
वा त्वया ध्वजातिरुणविशेषव्याप्येति सिद्धान्तः । अत एव त्वादिकं पाकप्रयोज्यरूपविशेष
स्य विशेषव्याप्यस्य स्नेहे पर्यवसानेन । तथा प्रकृते स्नेहः तैलादिगतजातिविशेषवत्त्वे रसस्य च्यानेन तद्वा स्नेहगुण
विशेषवत्त्वं गन्धस्य अवश्यं वाच्यम् इति । तैलादिवृत्तिपाकप्रयोज्यविलक्षणरूपादिविशेषस्य
न स्नेहजकत्वकल्पने गौरवं दुष्परिहरम् इति । स्नेहो न जातिरपि तु गुण एवेति । न त्वेवमपि तैला
देरपि स्नेहो गुणोऽस्तु रसवन्नपपत्तिर्दुर्हृद्गान । न च तैलादेरपि जलत्वाद्दृष्टमेवेति वाच्यं तैल
घृतवसादीनां पार्थिवबीजत्वात् मांसादारम्भकपरमाणुवारम्भकत्वनियमेन तथैव क्रमशःक्य
त्वात् । न च तत्र तत्तदारम्भकमानाभाव इति वाच्यम् ध्वंसजन्यमपस्य वतितत्तद्गुणदानोप
दानकं भवतीति नियमादेव तत्सिद्धेः । अन्यथा द्व्यणुकादेरपि स्नेहोपादानोपादानकत्वं न स्या
दिति चेन्न जलेतरे स्नेहोपलब्ध्या प्रदर्शितप्रमाणात् तस्य जलत्वगुणत्वावश्यकत्वे तैलादौ स्नेहोपल

साःसं
६२
62

घेस्वाश्रयसंयोगित्वरूपपरंपरासंबंधेनऽपकृष्टमकजलत्वहृत्तिस्नेहविपाकत्वेनोपपत्तौ नैत
लादौस्नेहस्सत्वेमानाभावेनतत्रतत्कृणत्वाभावादित्यलमधिकेन। अत्रपुंस्नेहः सांसिद्धिकश्च
तत्राग्निसंयोगाद्यन्वयव्यतिरेकानुविधायित्वानुपलंभनेऽग्निसंयोगादिजन्यत्वाभावा
दिति। एवं सांसिद्धिकद्रवत्वमपिजलवैधर्म्यं। तेनापिजलेजलेतरभेदानुमानसंभवात्।
नचजलेसांसिद्धिकद्रवत्वेमानाभावेनजलेपक्षाकृत्यतेनतरेतरभेदसाधनेहेतुःस्वरूपा
सिद्धइतिवाच्यं। जलेसांसिद्धिकद्रवत्वेप्रत्यक्षस्यैवप्रमाणत्वात्। नत्रसांसिद्धिकद्रवत्वा
नेगाकौजलस्यसत्वकादिसंग्रहायाग्निसंयोगानंतरंतैश्चसंग्रहप्रतितजानकद्रव्यवृत्तिस्नेह
सिवतद्वृत्तिद्रवत्वस्यापिहेतुत्वात्। नचनैमित्तिकद्रवत्वमेवतत्राहितिवाच्यं घृतादिद्र
त्ववत्राग्निसंयोगादेरन्वयव्यतिरेकानुविधायित्वानुपलब्धात्तथात्वकुमशक्यत्वात्। एम
नचैतन्नसत्तारहावपिसांसिद्धिकद्रवत्वोपलंभेनतस्यजलमात्रवृत्तित्वासिद्धानमतजलनि ६२

ष्टमित्तत्वे धर्म्मिमिति वाच्यं घटस्येनोपदर्शितयुक्त्या च जले सांसिद्धिकद्रवत्वस्यावश्यकत्वे
तैलक्षीरादौ सांसिद्धिकद्रवत्वस्योपलब्धेर्वाश्रयसंयोगित्वरूपपरंपरासंबंधेन तदुपष्टंभक
जलवृत्ति सांसिद्धिकद्रवत्वमादायोपपत्त्या सांसिद्धिकद्रवत्वस्य तैलक्षीरादिवृत्तित्वे माना
भावादिति: अत एव तैलत्वं गंधविषमात्रव्याप्यपृथिवीत्वव्याप्यजातिरित्युपायकाप्र
भृतयः अन्यथा तत्र द्रवत्वाविशेषव्याप्यत्वस्यापि संभवेन गंधविशेषमात्रोत्कीर्त्तनमसंगतं
स्यात् न तु तैलत्वस्य जातित्वे तस्य परमाणुवृत्तित्वानुपपत्तिः द्व्यणुकत्वव्याप्यव्याप्यजातेः
परमाणुवृत्तित्वाभावस्य सिद्धांतसिद्धत्वात् न च तथाविध सिद्धांते मानाभाव इति
वाच्यं पतनोद्व्यणुकत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वांगीकारे क्षीरत्वादिकमपि तथा स्यात्:
तथा च पटत्वमपि द्व्यणुकध्वंसजन्यं न तु तदुपादानोपादानकमिति नियमेन क्षीरध्वंसजन्ये दधिनि
क्षीरारंभकपरमाण्वारब्धत्वेन क्षीरत्वापत्तिर्दुर्वारैव क्षीरत्वावच्छिन्नं प्रति क्षीरत्वेन हेतु

सा.सं:
६३

त्वात्तदुपदर्शितनियमे प्रथमद्रव्यपदं कपालनाशजन्यघटनाशे व्यभिचारवारणार्थं
द्वितीयद्रव्यपदं तु दण्डप्रागभावनाशात्मके दण्डजन्ये घटे व्यभिचारवारणार्थं। न च तत्र दण्ड
प्रागभावोपादानाप्रसिद्ध्या साध्याप्रसिद्धेः साध्याभावस्याप्रसिद्धत्वात् तदभावघटितव्यभि
चारस्याप्रसिद्धिस्तथा च कथं च कथं तत्र तद्वारणार्थं तदुपादानमिति वाच्यं हेतौ साध्याभा
ववद्वृत्तित्वस्यैवाप्रसिद्ध्या साध्यवद्घटितद्भिन्नवृत्तित्वस्यापि व्यभिचारपदार्थत्वेन अनुप
पत्त्यभावात्। केचित्तु कामिनीचरणसंयोगनाशजन्याशोकपुष्पे व्यभिचारवारणाय तत्र
नियमे द्वितीयद्रव्यपदोपादानमित्याहुः। एवं चारित्वादेः परमाणुवृत्तित्वाङ्गीकारेऽदृष्ट
त्वात्तन्नासांकर्यापत्तिः। तथा हि तदुपदर्शितनियमेन स्त्रीएपादानपरमाणोरपि द्व्यणुपा
दानतया भवन्मतेन तत्र दृष्टित्वाङ्गीकार आवश्यकः अन्यथा दृष्टित्वावच्छिन्नप्रतिदृष्टि राम
त्वेन हेतुतया तस्माद्ध्वनाशे भावपत्तेः तथा च एकपरमाणुमन्तर्भाव्य समानाधिकरणेषा ६३

63

दधित्वक्षीरत्वयोरवयविदधिक्षीरेषु परस्परव्यभिचाराज्जातिसांकर्यस्य भवन्मतेऽदो-
षत्वमेवेति इव्याप्याव्याप्यजातेः परमाणववृत्तित्वनियमस्यावश्यकत्वादिति चेदेवं सति तैलत्वादेः
परमाणववृत्तित्वे बाधकाभावेन दृष्टापत्त्या तैलत्वस्य द्रव्यत्वव्याप्यत्वेपि वा तैलत्वव्याप्यत्वे बा-
धकाभावात् न च तैलत्वस्य जातित्वे तदेव तैलपदशक्यतावच्छेदकं वाच्यं तथा च सार्षपादौ
तैलव्यवहारे मुख्यः स्यादिति वाच्यं तैलपदस्य रूढत्वेन दुष्टत्वात् वाचस्पतिमिश्रैरप्युक्तं तै-
लपदं योगरूढमेव तिलेषु तैलमिति व्युत्पत्तेस्तस्य योगशक्तेरपि संभवात् तथा च पंकजा-
दिपदवद्योगवत्तैलपदस्य योगेपि योगार्थतावच्छेदकविशिष्टरूढ्यर्थतावच्छेदकस्याभि-
धायकविशिष्टतया तिले एव तैलपदमुख्यप्रयोग इति सार्षपादौ तत्प्रयोगो भाक्तः ॥ अ-
नयैव धर्मशास्त्रे पत्रय त्रतैलानिषेधः तत्रत्तिलतैलस्यैव निषेधो श्रवणांतव्य रसोऽहं ॥ २ ॥
सलमप्रस्तुतविचारेणेति ॥ एतमुत्कर्षापकर्षमन्यमभावेऽप्रकृते ऽपवत्वमपि जलवृत्तिधर्मे

सा॰सं॰ तेनापि जले जलेतरभेदानुमानसंभवात् । अत्रोत्कर्षापकर्षशून्यत्वोपादानं शुक्लरूप
६४ वति घटादावुपदर्शितेनेतरभेदानुमाने व्यभिचारवारणाय । किं जलीयरूपस्य पाकाप्रयोज्यत्वेनोत्क
र्षासंभवात् । रूपनिष्ठोत्कर्षापकर्षयोः पाकप्रयोज्यत्वनियमात् । न च तथापि कालिन्दीज
65 लादौ नीलरूपदर्शनान्न सर्वजलस्य तथाविधशुक्लरूपवत्त्वमित्युपदर्शितभेदानुमा
ने हेतोर्भागासिद्धेर्न तस्य तद्गमापकत्वमिति । कथं जलनिष्ठमितरवैधर्म्यं तथावि
धशुक्लरूपवत्त्वमिति वाच्यम् । कालिन्दीजलादौ नीलरूपवत्त्वप्रतीतेः स्वाश्रयसंयोगिलादि
रूपपरंपरासंबन्धेनोपष्टंभकपार्थिवगतनीलरूपमादायैवोपपत्तेः । नीलरूपादेर्जल
गुणत्वे मानाभावः । एवं मधुररसवत्त्वमपि जलनिष्ठमितरवैधर्म्यं तेनापि जले जलेतरभे
दानुमानसंभवात् । न च मधुररसवत्त्वस्य घटादिसाधारण्यात्तत्र व्यभिचारात्तेन तज्जले एम
जलेतरभेदानुमानसंभव इति कथं जलनिष्ठेतरवैधर्म्यमिति वाच्यम् । उत्कर्षापकर्षशून्य ६४

मधुररसवत्वस्यैवतत्वात्।ऽउत्कर्षापकर्षयोःपाकप्रयोज्यमात्रवृत्तितयापाकाप्रयोज्य
जलवृत्तिमधुररसेतररसत्वेपाकप्रयोज्यघटादिवृत्तिमधुररसादेतररसत्वेनअनुपपत्त्यभा
वात्।नचजलेमधुररससत्वेमानाभावात्तत्तज्जलनिष्ठमितरवैधर्म्यमितिवाच्यं।शाल
जलरनिर्मलकमुक्तानुकारितावारितिवतएवमधुररसोपलब्धेःहरीतकीभक्षणानंतरं
जलेमधुररसोपलब्धेश्चात्तत्रमधुररसस्यप्रत्यक्षसिद्धत्वात्।नचहरीतकीभक्षणानंतरं
नजलेमधुररससाक्षात्कारःअपितुहरीतकीमधुररसस्यैवसाक्षात्कारइतिवाच्यं।त
सतिहरीतकीकषायादिरससाक्षात्कारस्यापितदानामापत्तेः।प्रसीसासन्नैस्तोल्यात्।न
चतत्रजलसंयोगस्यपरंपरासंबंधेनप्रतिबंधकत्वकल्पनान्नानुपपत्तिरितिवाच्यं।हरीत
कीवृत्तिकषायादिरसादिभेदेनतत्प्रविधानंतप्रतिबंधप्रतिबंधकभावकल्पनाप
त्तेलाघवात्हरीतकीवृत्तिरससाक्षात्कारत्वावच्छिन्नंप्रतिजलसंयोगाभावस्यैव

सासं ६५ 65

केहेतुत्वकल्पनेनतदाहरीतकामधुररसस्यसाक्षात्कारानुपपत्त्यामधुररससाक्षात्कारानुरो
धेनजलेमधुररसस्वीकारस्यावश्यकत्वात् । नचकर्कटीभक्षणानंतरंजलेतिक्तरसोपल
ब्धेस्तिक्तोपिरसोजलेस्यादितिवाच्यं । कर्कटीभक्षणानंतरंरसनाग्रस्थितपित्तद्रव्यस्थतिक्ता
करसस्यसाक्षात्कारस्यैवस्वापूर्वेहादिसिद्धत्वपा अनुपपत्त्यभावादित्यलमधिकेन । एवं
शीतस्पर्शवत्त्वमपिजलनिष्ठमित्रवैधर्म्यं । तेनापिजलेजलेतरभेदानुमानसंभवात् ।
नचश्रीखंडेशैत्योपलंभात्पृथिव्यामपिशीतस्पर्शवत्वेनव्यभिचारः अत्रशीतस्पर्शोस्य
तपात्वमितिवाच्यं । तत्रश्रीखंडसंयोगेनघर्षकजलस्थितशीतस्पर्शस्याभिव्यंजनेनश्री
खंडेशीतस्पर्शवत्वेमानाभावात् । नचकदाचिज्जलेऽप्युष्णस्पर्शोपलब्धेःजलस्यापिउष्णस्प
र्शेचतेजःपाऽपदार्थेतेनतरभेदानुमानेशीतस्पर्शहेतोर्भागासिद्धिरितिवाच्यं । तत्रउष्णस्पर्शम् राम
कतेजोभागवृत्तस्यैवस्पर्शस्यैवोपलंभेनजलेऽनुष्णाशीतस्पर्शासिद्ध्या अनुपपत्त्यभावादि ६५

तिन्नन्तो लं हि द्विविधं नित्यानित्यभेदात् नित्यं परमाणुलक्षणं जलं नित्यं तत्र प्रमाणं तु र
र्ववदन्वेषणीयं कार्यलक्षणं जलं तु पृथिवीवत् त्रिविधं शरीरेन्द्रियविषयभेदात्ः न चै जलीयश
रीरे प्रमाणाभावान्नैवमिति वाच्यं जलं शरीरारंभकं द्रव्यारंभकत्वात् पृथिवीवदित्यनुमानेन सि
वतत्र प्रमाणत्वात्ः न चात्र शरीरानारंभकजलारंभकजले व्यभिचार इति वाच्यं जलत्वं शरी
रसमवायिकारणवृत्तिस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् पृथिवीत्ववदित्यनुमान
स्य त्राविकलत्वात् न चात्रापि गंधवद्वृत्तित्वस्योपाधित्वान्नाविकलत्वमिति वाच्यं गंधव
त्वशरीरारंभकनिष्ठात्यंताभावप्रतियोगितानिर्णयाद्वृत्तित्वात्ः घटत्ववत् इत्यनुमानेन तत्र सा
ध्याव्यापकत्वसाधनेनोपाधित्वासंभवादिति। वरुणलोके हि तानां जलीयशरीरस्य आ
गमसिद्धत्वात् आगमस्यापि जलीयशरीरे प्रमाणत्वसंभवात् न च शरीरस्योपभोगसम
र्थत्वनियमेन जलीयेन शरीरं तस्य अस्मत्स्तु न तत्र उपभोगासामर्थ्यादिति वाच्यं पार्थिवे

सासं: ६६ 66

यश्चक्षुर्जलावयवस्य जलीयशरीरारंभकत्वाभ्युपगमेन तस्योपभोगासमर्थत्वादिति तच्च श
रीरमयोनिजं पार्थिवशुक्रशोणितादिविजातीयानारंभकत्वेन शुक्रशोणितसंनिपातजन्य
रूपयोनिजत्वासंभवात् जलीयमिंद्रियं तु रसनसंज्ञकं न चात्र प्रमाणाभाव इति वाच्यं रसस्य
साक्षात्कारो मनोभिन्नेंद्रियजन्यः मानसेतरसाक्षात्कारत्वात् चाक्षुषादिवदित्यनुमानस्यैव रस
नेंद्रियप्रमाणत्वात् न च तथापि तस्य जलत्वमसिद्धमिति वाच्यं रसनं जलं परकीयरूपा
द्यव्यंजकत्वे सति परकीयपपार्थैव रसव्यंजकद्रव्यत्वात् सक्तुरसव्यंजकोदकवत् रस
मानादेव तत्र जलत्वसिद्धेः अत्र मनसि व्यभिचारवारणाय सत्यंतनिवेशः सक्तुरसव्यंज
कोदकस्यापि स्वीयरूपव्यंजकत्वात् दृष्टांतासिद्धिः अतः प्रथमपरकीयत्वनिवेशः द्विती
यपरकीयत्वनिवेशात्तु रसव्यंजकशर्करादौ न व्यभिचार इति संनिकर्षे व्यभिचारवारणाय राम
र्थं द्रव्यत्वनिवेश इति न च रसनेंद्रियं वा आप्यनमिमतं सत् रसाश्रयसंबंधे न रसग्राहकं ६६

वाघादिनाजडजिह्वस्यरसनेंद्रियसंबद्धरसाश्रयस्यापिरसस्यसाक्षात्काराभावादितिविषयरूप
जलेतुघ्राणकादिप्रक्रमेणाद्ध्वंहिमकरकादिकंऽयेपंःनचहिमकरकोपाःसांसिद्धिकद्रव
त्वाभावान्नजलत्वमितिवाच्यंऽपष्टंभकपार्थिवभागेनाभिभूतसांसिद्धिकद्रवत्वस्यतत्रा
पिस्वीकारात्‌।शीतस्पर्शवत्वेनतत्रजलत्वसिद्धौजलत्वेनतत्रसांसिद्धिकद्रवत्वानुमानसंभवा
त्‌ःपत्नुकरकापाःविलीनतादशायांसांसिद्धिकद्रवस्यप्रत्यक्षसिद्धेर्लीनप्रत्यक्षमेवतत्रप्र
माणमितिनन्नजहाकरकोपाजलीनताणाभ्युपगमादि।६९॥ इदानींतेजोनिष्ठमितरवैध
र्म्यमुच्यते।तत्रतेजस्त्वंतेजोनिष्ठमितरवैधर्म्यंतेनतेजसइतरभेदानुमानसंभवात्‌ःनन
तेजस्त्वजातौप्रमाणाभावान्नैवमितिवाच्यं।अतेजसस्तेजोवाणाणापडपदर्शितलाघवेनचत
न्यतेजस्त्वावच्छिन्नप्रतितेजस्त्वेनहेतुताकल्पनस्यावश्यकतयातथाविधजनकतावच्छेदक
त्वेनतेजस्त्वजातिसिद्धेः।अथवातेजःपदशक्यतावच्छेदकत्वेनतेजस्त्वजातिसिद्धिः।अत्रसनि

सा॰सं॰
६१
67

वाच्यकेशक्यतावच्छेदकत्वेनापिजातिसिद्धेर्बहुशो निवेदितत्वादिति॥ एवं शुक्लभास्वररूप
वत्वमपितेजोनिष्ठमितरावृत्तिधर्म्मः तेनापि तदितरभेदानुमानसंभवात्॥ अत्र भास्वरत्वानुपादा
ने शुक्लरूपवत्वस्य जलसाधारण्यस्य तेजसि तदितरभेदानुमापकत्वाभावात् अत्र तत्तेजोनिष्ठमि
तरावृत्तिधर्म्ममिति न उपादानं तत्र शुक्लरूपोत्कीर्त्तनं तत्स्वरूपकथनं न तु तदंशभास्वरापि॥ तेजोनि
ष्ठेतरावृत्तिधर्म्मत्वं तस्य तत्र निवेशप्रयोजनाभावात् भावात् भास्वररूपवत्वमात्रं तेजोनिष्ठमि
तरावृत्तिधर्म्मः सेयं भास्वरत्वं च तेजोरूपमात्रवृत्तिशुक्लत्वव्याप्यजातिविशेषः॥ न च वह्नेररुण
रूपवत्वेन भानात् सिद्धान्तशुक्लभास्वररूपवत्वेन तेजसि तदितरभेदानुमानासंभवात् न शुक्ल
भास्वररूपवत्वं तेजोनिष्ठमितरावृत्तिधर्म्ममिति वाच्यं वह्न्यादावरुणरूपोपलब्धेः स्वाश्रयसंयो
गित्वरूपपरंपरासंबन्धेन उपष्टम्भकपार्थिवभागगतारुणविषयकत्वेनोपपन्नो वह्न्यादावरुणरू राम
पाभावेन अनुपपत्त्यभावात्॥ न च तेजसि शुक्लभास्वररूपवत्वे मानाभावात् न तत्तेजोनिष्ठ ६१

मितरवैधर्म्यमिति वाच्यं चंद्रतारकादिमहस्सिशुक्लभास्वररूपप्रसक्तस्तैर्वनत्तलेजोवृत्तित्व
प्रमाणत्वात् अत एव रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्ववेगाख्ते
जोगुणाः इत्यनेन तेजोगुणमध्ये रूपपठनमपि संगच्छते अन्यथा रूपांतरस्य तत्रासंभवेन तत्रत्
स्पठनं विरुध्यत एवेति न च चंद्रतारकादिमहस्सिशुक्लरूपप्रतीतेः पाणसंबधेन उपष्टंभकजलवृत्ति
शुक्लरूपमादाय वोपपत्तेः न साशुक्ल रूपस्य तेजोवृत्तित्वे साधिके तिवाच्यं यतो जलस्यावितदेश
नालरूपादेः प्रसक्तत्वेन जलरूपस्याविजातीयरूपानभिभाविकत्वमवश्यमभ्युपेयं तथा च तेज
सिशुक्लरूपानंगीकारे तेजश्चाक्षुषानुरोधेन रूपांतरस्याकारस्य आवश्यकतया चंद्रमहस्सि
लवृत्तिशुक्लमत्पत्तकालेतेजोवृत्तिरूपांतरप्रसक्तस्यापि आपत्तिरिति तेजसि शुक्लरूपस्वीका
रस्यावश्यकरत्तान च चक्षुरादौ शुक्लरूपादर्शनेन तथा वक्तुमशक्यमिति वाच्यं चक्षुरादौ अ
नुभूतशुक्लरूपाभ्युपगमात् एवं उष्णस्पर्शवत्त्वमपि तेजोऽनिष्टमितरवैधर्म्यं तेनापि तेजसि

सा॰सं॰ ९८ 68 नद्भिन्नत्वभेदानुमानासंभवात्ः न च द्रव्यमहत्त्वे सति शैत्योपलब्ध्याभागासिद्धा तेन तेजसि तद्भिन्नत्वभेदा
नुमानाभावेन नोष्णस्पर्शस्य तेजोनिष्ठत्वं तद्वैधर्म्यत्वमिति वाच्यं तत्र उष्णस्पर्शकजलीयभागा
न शैत्यस्पर्शप्रतिबंधेन तादृशोपलब्धिविषयत्वे नैव तद्रूपप्रत्ययेन तद्बलेन शैत्यस्य तेजोगुणस
वक्तुमशक्यत्वात् इति। न च तर्हि कथं चामीकरे चंद्रकरस्पर्शादौ नोष्णस्पर्शोपलब्धिरिति वा
च्यं तत्र अनुद्भूतोष्णस्पर्शाभ्युपगमादिति तत्तेजो द्विविधं नित्यानित्यभेदात्ः तत्र नित्यं तेजः
परमाणुः प्रमाणं तु पूर्ववदेवेष्टव्यं। अनित्यं तेजस्तु त्रिविधं शरीरेन्द्रियविषयभेदात्ः न चैतै
जसशरीराप्रसिद्धं नेति वाच्यं तेजस्त्वं शरीरसमवायिकारणवृत्तिद्रव्यत्वसाक्षाद्व्याप्य
स्पर्शवद्वृत्तिजातित्वात्ः पृथिवीत्ववदित्यनुमानात्ः तैजसशरीरसिद्धेरप्रत्यूहत्वात्। आदि
त्यलोके तैजसशरीरस्यागमसिद्धत्वाच्च। आगमोपि तैजसशरीरप्रमाणमित्यस्य सत्त्वे राम
त्वाच्च। न च शरीरमपार्थिवमिति व्यपदेशः पार्थिवत्वस्य कृशानोरिवाहे विजानीयान्नारम्भकत्वेन ९८

तत्र शुक्रशोणितसंनिपातजत्वरूपयोनिजत्वासंभवात् न तत्पार्थिवावयवोपष्टब्धं तेजोऽव
यवारब्धत्वेन उपभोगासमर्थम् इति । तैजसमिंद्रियं तु चक्षुः प्रमाणं तु तत्र रूपसाक्षात्कारः मनो
भिन्नेंद्रियजन्यः मानसेतरप्रत्यक्षत्वात् स्पार्शनवद् इत्यनुमानं च चक्षुषि तैजसत्वसिद्धिस्तु रूपग्रा
हकमिंद्रियं तैजसं परकीयस्पर्शाव्यंजकत्वे सति परकीयरूपव्यंजकद्रव्यत्वात् प्रदीपवद् इत्य
नुमानात् । अत्र प्रथमपरकीयत्वविशेषणदानात् प्रदीपस्वीयस्पर्शव्यंजके दृष्टान्ते असिद्धि
परिहृता द्वितीयपरकीयत्वविशेषणात् स्वीयरूपव्यंजकगोलके न व्यभिचारः एवं च तै
जसमिंद्रियं प्राप्यकारि इंद्रियमात्रस्य प्राप्यकारित्वनियमात् । अत्र केचित् चक्षुरिंद्रियं न तै
जसं अप्राप्यकारित्वात् तथा हि प्राप्यकारित्वं स्वसंबद्धार्थग्राहकत्वं तच्च चक्षुषि न संभव
ति स्वाधिष्ठानात्मकगोलकासंबद्धार्थग्राहकत्वात् । न हीन्द्रियाधिष्ठाननिष्ठं प्राप्यकारि
त्वस्य तादृशेंद्रियाधिष्ठानासंबद्धार्थाग्राहकत्वव्याप्यतया तथाविधव्यापकाभावेन च तद्वि

सा॰सं॰
६८
69

तद्व्याप्यतयाविषयप्राप्यकारित्वाभावसाधनसंभवात्। अत एव चक्षुषि वृत्तिपरिमाणम
पेक्ष्य अधिकपरिमाणवघटद्वयंतद्ग्राहकत्वं निर्वहति। अन्यथा तेजो निष्ठ निहितं प्राप्यका
रित्वस्य स्वाधिकपरिमाणवद्द्रव्याग्राहकत्वनियमेन तदनुपपन्नं स्यात्। न च दूरं एव च याः न
खलु न स्वं स्वंजिकापरिशुद्धेर्घच्छिनत्तीति। अत एव स्फाटिकादिनाव्यवहितपदार्थोपि चक्षु
षा गृह्यते। अन्यथा मिथ्यातिनास्फटिकादिद्रव्येण च चक्षुषो विषयघनतया अर्थेन सह सं
बंधासंभवात्तदा च चक्षुषा अर्थग्राहकत्वमनुपपन्नं स्यात्। तस्माच्चक्षुर्नैन नेजः तिहतं प्रा
प्यकारित्वाभावात्तरसनुमानात् चक्षुषि तेजस्त्वाभावसिद्धेर्गोलकमेव चक्षुरिंद्रियं म
विष्यतां मास्तु तन्न। रश्मिपानिष्टप्राप्यकारित्वस्य तदधिष्ठानासंबद्धार्थग्राहकत्वव्या
प्यत्वे प्रमाणाभावेन च चक्षुषि आप्राप्यकारित्वे प्रथमोक्तप्रक्रेरसंभवात्। अत एव हि ता राम
यां युक्तिरेषितत्राप्राप्तानां दृशां नियमे प्रमाणाभावात् परत्र प्रतिबंदितया आचार्यैरुक्तं न ६८

खलुनायंरश्मिकेसरास्तिमिरखांरश्मिकामाहायनतारश्मानियमेनअन्यत्रदोषासंभवान्नमनो
रमेपाचक्षुषोप्राप्यकारित्वेततायाशुक्तिहक्तासात्वतिशिथिलाअभिघातिनाअखण्ड
द्रव्येरोवचक्षुषोगमनप्रतिबंधानियमेनस्वच्छद्रव्यस्यस्फटिकादिनागमनप्रतिबंधा
संभवेनस्फटिकादिनाव्यवहितेपिचक्षुःसंबंधस्यअव्याहततयाअनुपपत्तेरभावात्परं
चक्षुषःप्राप्यकारित्वेएककालंशाखाचंद्रमसोःप्रत्यक्षंनस्यात्।निकटदूरस्थितशाखायांचक्षुःसं
योगानंतरमेवदूरस्थितचंद्रेणचक्षुःसंयोगसंभवादितिचेन्न।शाखाचंद्रमसोःएकदाअप्र
त्यक्षत्वेन्द्रियविरहात्।नचैवंसतितयोःप्रत्यक्षेयोगपद्यप्रतीतिःकथमुपपद्यतेइतिवाच्यं
तेजसोवेगातिशयेनसंनिहितकालतयाभवनोदरवर्त्तिलोकेउत्पलदलचक्रशताधिकरणप्र
वेशेहरणसमानकालीनत्वभ्रमवत्शाखाचंद्रमाप्रत्यक्षयोरपिसंनिहितकालतयायोगप
द्यभ्रमेणतत्रयोगपद्यप्रतीतासुपपन्नेः।तदुक्तंएवाचार्यैः।अचिंत्योहितेजसोलाघववान्तिशयेनवेगा

सा॰सं॰ तिशयोपपत्तश्चाचानाचलच्छ्रावलंबिन्येवमगवतिमयएवमालिनिभवनोदरेषालोकस्य
७० भिमानोलोकानामिति। वस्तुतस्तु एकदा शाखाचंद्रयसोश्चक्षुःसंयोगबाधकाभावात् एक
70 दापितदुभयप्रसक्तेनानुपपत्तेः। तच्चाधिपगोलकस्यचाक्षुषाभावेनश्रयावच्छेदेनै
वचक्षुःसंयोगस्यैशाखाचंद्राभ्यांसहहसंभवात् । तस्माच्चक्षुरिंद्रियस्यप्राप्यकारित्वाभि
ध्याचाक्षुषहेतुतयाएकदाउभयत्रतदसंभवात् अनुपपन्निमत्रवक्ष्येवेतिवाच्यमतिर्यग्गमा
वेनैवचक्षुःसंयोगस्य नेजसत्वाभावात्सिद्धेगोलकांतर्वर्तितेजएवचक्षुरिंद्रियंनतुगो
लकं। तस्यतथात्वेबाधकसत्वात् तथाहिगोलकस्यतथात्वेव्यवहितपदार्थस्यापिचक्षुषापत्तेः
तन्मतेगोलकस्यबहिर्गमनासंभवेनविषयासंबद्धस्यैवतस्यप्रत्यक्षजनकत्वात् नचव्य
वधायकद्रव्यस्यापिप्रसप्रतिबंधकत्वकल्पनान्नानुपपन्निरितिवाच्यं तथापिप्रसन्नं राम
घस्यगोलकसत्वाद्व्यवहितपदार्थप्रसद्गापत्तेर्दुर्वारत्वात् यदिचचक्षुषादोषश्रदृष्टविशे ७०

घस्यापिहेतुतापाःकल्पनापत्तयाप्रसन्नाःघस्यचाक्षुषजनकादृष्टभावादेवनचाक्षुषापत्तिः
अतएवविशिष्टादृष्टवैशिष्ट्यात्कुत्रसारेविलोचनंव्यवधानाद्यभावश्चसन्निपेवोप
युज्यतेनितिचेत्सिद्धान्तोपितथात्रकृत्स्नसारपदंगोलकपर्यंतपाचगोलकस्यचतद्दृष्टेनो
कापत्तिरितिगोलकमेवचक्षुरितिविभाव्यते।तथापिचाक्षुषेअदृष्टविशेषहेतुत्वस्याव
चापकद्रव्याभावहेतुत्वस्यचकल्पनागौरवात्मकबाधकंगोलकस्यचक्षुष्ट्वेदुष्परिहारमि
वेतिगोलकान्तर्वर्त्तितेजएवचक्षुरितिसमाधानमालोचयामः।अत्रगोलकान्तर्वर्त्ति
तेजस्वरूपचक्षुर्वेगातिशयेनबहिर्गत्यचंद्रमंडलादिपर्यंतबहिःपदार्थसंयुज्यते
षांचाक्षुषमुत्पादयतीतिसिद्धान्तसरणिः।पक्षेगोलकान्तरवर्त्तितेजःस्वरूपंचक्षुर्बहिर्गत
सबहिष्ठतेजोन्तरेणासंबद्धसत्‌एकंतेजःपुञ्जमुत्पादयतिततःतत्तेजएवचंद्रमंडलादौसंयु
क्तंसत्चंद्रमंडलादिभिन्नस्वस्तमुत्पादयतीतिमंतेनात्र‧उपदार्थान्तरासत्त्वेवसर्वानुपपत्तिप

सा॰सं॰ राहारे तथा कल्पनायां मानाभावादिति ॥ अत्र सजातीयविजातीयावयवानभिभूततेजोवय
७१ वारब्धगोलकान्तर्वर्त्तितेजस्त्वरूपमेकमेव गोलकद्वयवर्त्ति च चक्षुः तदेव चाक्षुषजनकमता
७१ नन्तथाविधावयवाभिभूततेजोवयवारब्धगोलकान्तर्वर्त्तितैजसः प्रसज्जनापत्ति
रित्यपि बोध्यं । विषयस्वरूपं तैजसं चतुर्विधं । भौमदिव्योदर्याकरजभेदात् । तत्र भौमं तेजः
पार्थिवेन्धनजन्यानलऽर्ध्वज्वलनस्वभावः पाकाद्यनेककार्यजनकः । दिव्यं तेजोऽबिन्ध
नजानलविद्युदादिरूपं तेजो जठरानलो भुक्तस्याहारस्याहिपरिणामजनकं । आक
रजं तेजः सुवर्णरूप्यताम्रपित्तललोहादि ॥ अत्र प्रसंगात्सुवर्णतैजसत्वं विचार्यते
तेः तत्र विप्रतिपन्नाः सुवर्णत्वं तेजोवृत्ति न वा तेजस्त्वं सुवर्णवृत्ति न वेत्यादिरूपो हेयाः
अत्र केचित् सुवर्णं पार्थिवं नैमित्तिकद्रवत्वात् घृतवत् इत्यनुमानात् सुवर्णे पार्थिवे एम
वत्वं सिद्धं तानि पार्थिवमेव सुवर्णं न तु तैजसं नत्र तैजसत्वसाधकाभावात् न च सु ७१

वर्णीतिजः असतिप्रतिबंधके असंतानलसंयोगेनानुच्छिद्यमाननैमित्तिकद्रवत्वा
त्पन्नैवंतन्नैवंपथ्याचरः। इसनुमानात्तत्रतैजसत्वसिद्धिरितिवाच्यं। अत्रहेतोः सप
विपक्षव्यावृत्ततमा असाधारण्येन तैजसत्वासाधकत्वात्‌। न च भवन्मते मिश्रवर्णे
पार्थिवत्वसाधकमनुमानमप्रयोजकं सुवर्णस्य पृथिवीत्वे सुवर्णगतद्रवत्वस्य
असंतानलसंयोगेनुच्छेद्यापत्तिरितिप्रतिकूलतर्कसत्वादितिवाच्यं न हि पार्थिवे
द्रवत्वनाशत्वावच्छिन्नं प्रति तेजःसंयोगत्वेन हेतुत्वं येन सुवर्णस्य पार्थिवत्वेऽपदार्श
नापत्तिः स्यात्‌। अपि तु अभ्रपनाशजन्यनैमित्तिकद्रवत्वनाशत्वाभिचारवारणा
र्थं नाशजन्यद्रवत्वनाशत्वमेव तथा वक्तव्यं न चैवं गौरवप्रसंगः इति लाघवेन अ
संयोगनाश्यनावच्छेदककोटिप्रविष्टत्वेन अभ्रपनापायनाश्यद्रवत्वस्यै

सासं: ७२ 72 त्तेवेजात्यविशेषमुपेत्यविजातीयद्रव्यत्वनाशंप्रसेवतस्यहेतुतास्वीकर्त्तव्या एवंचसुवर्णाद्रव
त्वेपितादृशजातेरनभ्युपगमेनैवङक्तानुपपत्तिपरिहारे सुवर्णस्यपार्थिवत्वेवाधकाभावा
त्उक्तानुमानात्सुवर्णेपार्थिवत्वसिद्धिरव्याकुलैवेति। नचतद्व्यापत्रपीतरूपविशेषवद्र
व्यात्मकसुवर्णस्यपत्तत्वेसिद्धसाधनतैजसस्यसुवर्णस्यपत्तत्वेपत्ताप्रसिद्धिरिति पत्तस्य
वचतपाऽपदर्शितानुमानमशक्यमितिवाच्यं: सुवर्णपदवाच्यत्वावच्छेदेन अत्यंतानलसं
योगानुच्छेद्यमानद्रव्यत्वावच्छेदेनवापत्तत्वेन अनुपपत्त्यभावात्। अवच्छेदकावच्छेदेन
साध्यसिद्धाविष्टात: सिद्धसाधनस्य अदूषकतया धर्मैशाद्यादोषीतिमद्रव्यविशेषेपिसुव
र्णपदप्रयोगेनतस्यापिसुवर्णपदवाच्यतयातदीयप्रकृतानुमाने अंशत: सिद्धसाधनम एम
पियारिहार्यमित्याहुः। अत्रसिद्धान्तानुयायिनः। अत्रेरेतत्संप्रथमंहिरण्यमितिश्रुत्यर्था ७२

नुपपत्यात्मकानुकूलतर्केण अदृष्टात् सुवर्णे तैजसं अत्यंतानलसंयोगेन अनुच्छिद्यमाननै
मित्तिकद्रवत्वात् यन्नैवं तन्नैवं यथा घृतं तस्यानुमानात्सुवर्णस्य तैजसत्वासिद्धिः न तु नैमि
त्तिकद्रवत्वहेतुकानुमानान्तरेण पार्थिवत्वमपि सिध्यति अनुकूलतर्कविरहेण तस्य अप्रयो
जकत्वात् तथा सुवर्णे पार्थिवत्वसाधकत्वात् न च सुवर्णस्य अपार्थिवत्वे तत्र पीतरूपगुरुत्वयो
रनुपपत्तिरित्युपदर्शितानुमानेपि अनुकूलतर्कः संभवतीति वाच्यं पीतरूपगुरुत्वयोरव
ष्टंभकपार्थिवभागगतत्वाभ्युपगमे सुवर्णस्यापार्थिवत्वेप्युपपत्तिविरहेणाऽपदर्शितत्वादिति संभ
वातः न चासिद्धोतिमते विऽपदर्शितहेतोरसाधारणतयानोपदर्शितहेतुकानुमानात्तैजस
त्वासिद्धिरिति वाच्यं यतो असाधारणस्य सत्प्रतिपक्षोत्थापकत्वेनैव दूषकत्वं सत्प्रतिपक्षे
अतुल्यबलतायां तथा च प्रकृतेऽनुकूलतर्काभावेन साध्याभावसाधने हेतोरसामर्थ्या
न सत्प्रतिपक्षो न संभवतीति दूषकताबीजाभावात् असाधारणस्य अदूषकतया नोक्तौ

सा।सं नुपपत्तेरिति। न च तथापि सिद्धांतिमते हेतौ असंहतत्वस्य दुर्वचतया ऽपदर्शितानुमानम
७३ शक्यमिति वाच्यं प्रह्रादात्मकादिस्थूलकालीनत्वस्यैव प्रकृते संहतत्वरूपतया अनुपपत्त्य
73 भावात्। तस्मात् द्रवत्वाभावेन ऽपदर्शितानुमानात् सुवर्णे तैजसत्वसिद्धौ तैजसमेव सुवर्णं
अत एव असंहताग्निसंयोगेनापि तद्रूपवन्निष्ठद्रवत्वादेरपि नाशाभावादुपपद्यते। जलसंबंधि
घृतादावग्निसंयोगेपि द्रवत्वनाशस्यादृष्टतया नैमित्तिकद्रवत्वादिनाशं प्रति पार्थिवान्य
द्रवद्रव्यसंयोगस्य प्रतिबंधकत्वकल्पनेन न तैजसत्वं उत सुवर्णात्मकद्रव्यसंबद्धस्यापि तत्र प्रतिबं
धकत्वात्। सुवर्णस्य पार्थिवत्वे तु उक्तापत्तेर्दुरुद्धरत्वादिति। न च सुवर्णस्य तैजसत्वे पुरःपाक
दशायां कथं तत्र रक्तरूपोपलब्धिरिति वाच्यं तदाश्रयपार्थिवरक्तरूपोपलब्ध्या अनुपपत्त्यभा
वात्। न च सुवर्णस्य तैजसत्वे तन्निष्ठशुक्लभास्वररूपप्रत्यक्षापत्तिरिति वाच्यं उपष्टंभकपार्थि राम ७२
वभागगतपीतरूपेण सुवर्णगतशुक्लभास्वररूपाभिभवात्। न चैवं सति अंधकारे सुवर्णस्य

ल्कभास्वररूपप्रसक्त्यापत्तेः बलवत्सजातीयग्रहणाग्रपुरस्कारग्रहणस्यैव अभिभवपदार्थतापा
क्षे चकारोपात्तरूपाग्रहेण अभिभवासंभवादिति कश्चिल्लाघवेन अत्रसजातीयसंबंधस्यैव
अभिभवपदार्थत्वाभ्युपगमेन अनुपपत्त्यभावात् उपदर्शितस्य स्थलेपि स्वाश्रयपार्थिवसंयो
गसमवेतात्मकतथाविधसंबंधस्य तत्र सत्त्वादिति। न च तथापि चकारोपात्तरूपवद्द्रव्यप्रत्य
क्षापत्तेः तदानीमपि सुवर्णात्मकतेजःसंयोगरूपालोकसंयोगस्य तत्र सत्त्वादिति वाच्यं द्रव्य
प्रसक्तं प्रतिरुद्धतानभिभूतरूपवदालोकसंयोगस्य हेतुत्वेनानुपपत्त्यभावात्। न चैवं सति अ
ग्निसंयोगकालेपि चकारे द्रव्यप्रत्यक्षत्वानुपपत्तेः वन्हिगतशुक्लभास्वररूपस्य पार्थिवगतर
क्तरूपेणाभिभवेन तत्र निरुक्तालोकसंयोगरूपविरहादिति वाच्यं। पार्थिवगतरक्तरूपेणापि वन्हि
गतशुक्लभास्वररूपं नाभिभूयते। अपि तु शुक्लगतभास्वरत्वमित्यभ्युपगमात् द्रव्यचा
क्षुषप्रतिप्रभासंयोगत्वेन हेतुत्वमित्यस्यापि सुवचत्वाच्च। न च तथापि तत्र चकारे सुवर्णा

सासं प्रसक्तापत्तिरुद्वीरैवतेजः प्रसक्तेरालोकसंयोगस्यानपेक्षितत्वात्तथा आलोकसंयोगजन्यताव
७४ च्छेदककोटौ द्रव्यान्तेजोभिन्नत्वविशेषणस्यावश्यकतयाऽपदर्शितकारणाभावान्न तत्प्रसक्ति
74 मितस्यस्यवक्रमशक्यत्वात् इति वाच्यं। आलोकसंयोगजन्यतावच्छेदककोटौ द्रव्यांशे स्वर्णान्य
तेजोभिन्नत्वस्य निवेशनीयतया अनुपपत्त्यभावादिति यत्तु सुवर्णानाभिमतं अपि तु अनुद्भू
मितिमतं तान्तं तान्यासतिसुवर्णस्य अप्रसक्तत्वप्रसंगात्। वहिर्द्रव्यप्रसक्तेष्वपि तद्भिमतत्वपे
न हेतुतापाः रूपत्वादिति उष्मस्पर्शेन तु सुवर्णस्य अनुद्भूतत्व एवेति न तदुपलंभापत्तिरपी
तिवदंति। अत्रेदं धेयं बलात् असंतानत्वसंयोगादनुच्छिद्यमानद्रवत्वस्य सुवर्णे असिद्धानतत्रैग
सत्वसाधकं। न च तस्याविधद्रवत्वस्य तत्रासिद्धेः तत्र असंतानत्वसंयोगेन द्रवत्वस्योच्छेदापत्ते
रितिवाच्यं। दृष्टत्वात्। अत एव सुवर्णे द्रुतं द्रुतं तत् द्रुतं तत मामिति प्रत्ययोपपत्तिः। सुवर्णे आग्नि एम
संयोगात् पूर्वं द्रवत्वनाशकाले द्रवत्वात् तौ सोऽस्यकसामग्रीसमवधानस्यानपमतः स्वीकारात् ७४

नतत्रद्रवत्वस्यात्यंतोच्छेदः अप्रवाहोपरिशीततरोस्याविजातीयद्रवत्वनाशप्रसंगेवन्हिसंयो
गस्यहेतुतयासुवर्णद्रवत्वेअग्निसंयोगनाश्यतावच्छेदकवैजात्यानभ्युपगमेनतादृशकारणाभ
वात्तन्नसुवर्णद्रवत्वनाशापत्तिः।तथाचसुवर्णंनतैजसंअपितुपार्थिवमेवासुवर्णत्वात्यतिरि
क्ततेजःप्रमानिकल्पनेगौरवात्ततद्कल्पनप्रयुक्तलाघवसहकृतनैमित्तिकद्रवत्वहेतुकपा
र्थिवत्वसाधकानुमानस्यचतत्रअसत्त्वात्।नचतत्रअग्निसंयोगात्पीतरूपनाशापत्तिर्वि
रूपापपातरूपनाशादिप्रतिबंधकत्वेनक्लृप्तस्यद्रवद्रव्यसंबंधस्यघटकतयाद्रवद्रव्यांकिंचित्सिध
नातिततद्रव्यंनप्रथिव्यापार्थिवद्रव्यसंबंधस्यरूपपात्रस्यप्रतिबंधकत्वात्तन्नपिजलंनिः
हत्वात्।अतस्तदुभयभिन्नत्वेसतिरूपवत्त्वरूपहेतोःसुवर्णेतेजस्त्वसिद्धिरितिवाच्यंसुव
र्णेवस्त्वग्निसंयोगरूपनाशकतावच्छेदकवैजात्यानभ्युपगमेनविजातीयअग्निसंयोगाभा
वेनैवतत्रपीतनाशापत्तिवारणसंभवेनपीतनाशप्रतिद्रव्यसंबंधस्यप्रतिबंधकत्वकल्प

सां
७५
75

नेनान्नोपदर्शितत्वात्सुवर्णे तैजसत्वसिद्धिरिति। न च तथापि अग्नेरपत्यं प्रथमं हिरण्यमिति श्रु
तिप्रतिपादितेन तेजःसमवायिकारणकत्वात्सुवर्णे तैजसत्वसिद्धिरिति वाच्यं। आमनतत्वाद
शश्रुतितो न सुवर्णे तेजःसमवायिकारणत्वलभ्यते। अपितु तत्र तेजोजन्यत्वात् तथा चनोप
दर्शितश्रुतितो सुवर्णे तैजसत्वसिद्धिः विजातीयस्यापि निमित्तकारणतासंभवेन निमित्तका
रणजन्यतामात्रस्यैव तदुपपद्यत्वात्। अत्राहुः। द्रवहानावायुनिष्ठमितरवैधर्म्यमुच्यते। तत्त्ववा
युत्वेनेनापि तत्र तादृशताभेदानुमानसंभवात्। न च वायुत्वजातौ मानाभावान्न वायुत्वव
युनिष्ठमितरवैधर्म्यमिति वाच्यं। एवमुपदर्शितरीत्या जन्यवायुत्वावच्छिन्नप्रतिवायुत्वे
न हेतुतायाः आवश्यकतया जन्यवायुत्वावच्छिन्नजनकतावच्छेदकत्वेन वायुपदशक्य
तावच्छेदकतया वा वायुत्वजातिसिद्धेः प्रत्यक्षत्वात् बाधकाभावेन शक्यतावच्छेदकत राम ७५
यापि जातिसिद्धेर्वदुष्णो निर्वाहितत्वादिति। एवं अपाकजानुष्णाशीतस्पर्शवत्त्वमपि वायुनि

रूपमितरवैधर्म्यं तेनापि न तत्ता हि तरभेदानुमानसंभवात् न च वायोरपाकजानुष्णाशीतस्प
र्शवत्त्वमानाभावः इति वाच्यं। अन्यथानुपपत्त्यानुभवमूलकवायुस्पर्शो वा नितिमत्त्वप्रतिपा
दितस्य वायुस्पर्शस्य अनुष्णाशीतस्पर्श एव विश्रामात्। अत एव भाष्यकारादिभिः स्पर्शसं
ख्यापरिमाणपृथक्त्वविभागपरत्वापरत्ववेगाख्यान् नव गुणान् उक्त्वा स्पर्शोऽस्यानुष्णाशीत
त्वे सत्यपाकजः स्मृतः। अत्र वायोर्द्रव्यत्वेन संख्यापरिमाणपृथक्त्वसंयोगविभागाः सिद्धाः
मूर्त्तत्वेनात्र परत्वापरत्वे अपि सिद्धे। तृणकर्म वायुसंयोगादिति सूत्रमूलीभूतानुमानाद्वेगा
ख्यसंस्कारो वायोः सिद्धः। तादृशसूत्रमूलीभूतानुमानं च रूपवद्द्रव्याभिघातो जन्यतृणादिक
र्मस्पर्शवद्वेगवद्द्रव्याभिघातजं अभिघातातिरिक्तसंयोगाजन्यशब्दाजन्यविभागाज
न्यगुरुत्वद्रवत्वसंस्काराजन्यक्रियात्वात् नद्यपूराभिहतवेतसादिकर्मवदिति। ताद
शानुमानाद्वेगसिद्धिस्तु साध्यतावच्छेदकघटकतया प्रतिबोध्या। न च तथापि अपाकजानुष्णा

सासं:
७६
76

शीतस्पर्शवत्त्वं त्वनवायुनिष्ठ। भिन्नत्वे घमपि घटादिसाधारणास्पर्शस्य व्यभिचारेण वायौ
नदितिमेदानमापकत्वासंभवादिति वाच्यः। अपाकजानुष्णाशीतस्पर्शवत्त्वेन अत्रापाक
जानुष्णाशीतस्पर्शवत्त्वव्याप्यद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य पाकजानुष्णाशीतस्पर्शव
द्वृत्यनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य वा विवक्षितत्वादिति। स च
वायुर्द्विविधः। नित्योऽनित्यश्च। तत्र परमाणुलक्षणो वायुर्नित्यः। अनित्यवायुश्चतुर्विधः। शरी
रेन्द्रियविषयप्राणभेदात्। वायवीयशरीरे किंमानमिति तु नांशं नापं वायुत्वे शरीरत्वं भकद्वृ
त्तिद्रव्यत्वं भकद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् पृथिवीत्ववदित्यनुमानाद्वायुत्वे शरीरत्वं
भकद्वृत्तित्वसिद्धौ वायवीयशरीरासिद्धेः। एवं व्यापकत्वात्। विजातीयस्यावजातीयानारंभक
त्वात्। नारदशरीरे चापार्थिवे जपार्थिवाघवयवोपष्टंभे वा घवयवैरारब्धे उपभोगासमर्थे एम
त्वेन वायुलोके प्रसिद्धत्वात्। वायवीयमिन्द्रियं तु त्वक्संज्ञकं सर्वप्राणिनां स्पर्शोपलंभकं। ७६

तत्रमानाभावरतितुनाशंकनीयंस्पर्शसाक्षात्कारःमनोन्यायेंद्रियजन्यःमानसान्यसाक्षात्का
रत्वाद्रूपादिसाक्षात्कारवदित्यनुमानात्मनस्तुधर्मताबलात्तथाविधसाक्षात्कारासिद्धोसाध्यताव
च्छेदकघटकत्वेनत्वगिंद्रियासिद्धेरप्रसिद्धत्वात्ःनचैतादृशअनुमानात्त्वगिंद्रियासिद्धा
वपितत्रवायुत्वमसिद्धमितिवाच्यंःत्वगिंद्रियंवायवंवायवान्यरूपाव्यंजकत्वेसतिपरकीयस्पर्शव्यं
जकद्रव्यत्वात्अंगसंगिसलिलशैत्याभिव्यंजकव्यंजकव्यजनवायुवदित्यनुमानात्तत्र
वायुत्वसिद्धेःअत्रपरकीयपदलपदोपादानात्चक्षुषोभासाद्यस्वस्पर्शव्यंजकेनव्यभिचारःइ
सत्वपदोपादानात्दीपस्पर्शेनव्यभिचारःतत्त्वत्वगिंद्रियंअन्यावयवानभिभूतैर्वायवावय
वैरारब्धंतस्यस्पर्शोपलंभकंअतएवकुष्ठाद्युपहततापाल्वाचिनस्पर्शोपलंभःत्वगिंद्रियसा
धिष्ठानेनुशरीरंःतदवयवश्चशरीरात्तदवयवेनवापिनकेनचित्संयुक्तस्यद्रव्यस्यस्प
र्शोपलंभात्ःनतदधिष्ठानसंबद्धस्पर्शादींद्रियसंबंधित्वानुपमानात्नचपदिशरीरावयवे

साप्रं:
११
यित्वगिंद्रियाधिष्ठानं न स्याच्छरीरारंभकनखकेशलोमस्थानसंप्रक्तपरार्धस्पर्शस्याप्युपलंभ
प्रसंगात् इति वाच्यं तेषां शरीरसंपृक्तत्वमात्रं न तु शरीरारंभकत्वमपि स्तनाप्युपगमात्। विषय
स्वरूपास्तु वायवो घ्राणादिप्रक्रमेणाध्यवाडुपलभ्यमानस्पर्शाश्रया अप्रसक्ता अत्र प्रसं
गाद्यापोद्य स्तत्वविचार्यते तत्राविप्रतिपन्नः वायुःस्पर्शेनापलौकिकविषयता अपोन
वा वायुश्चेत्रोपपत्तानाजन्यचेत्रोपपत्तीनाविषयो नवारस्याद्यपोबाध्यादिति। अत्र मिमांस
काः। वायुस्तावत्स्पर्शेनाविषयएव वायोत्वकंसयोगानंतरं वायुर्वाति इति प्रतीतेः सर्वलोक
सिद्धाया अपलापापत्तेः कसत्वात्। न च तत्र प्रथमं वायुस्पर्शस्यैव प्रसक्तं तदुत्तरं च स्पर्शमाणास्प
र्शलिंगकानुमितिर्विषयवायुविशेष्यकवायुर्वातीति प्रतीतिरपि अनुमितसाक्षिके
व जायते इति वाच्यं वायोत्वकंसयोगानंतरं वायुस्पर्शप्रसक्तं विनापि शीतो वायुरिहस्मी राम
वायुरित्यनुभवस्य सार्वजनीनस्य अपलापप्रसंगात्। न वा तो दर्शीप्रतीतिरपि तत्र ११

नुमितेस्त्वलिकाऽसंभवति वायवनुमापकतत्स्पर्शप्रत्यक्षाभावेन तत्र वायवनुमानासंभ
वेन पक्षे सत्तानासंभवत् अत एवोपनीतभानमपि निरस्तं । न च स्मरणादिना तत्र वायुसत्तानसंभ
वान्नानुपपत्तिरिति वाच्यं स्पार्शनत्वमुपेक्ष्यैव तत्र निर्हेतुकादृशकल्पनायाः निष्प्रामाणिकत्वात् ।
न च वायोः स्पार्शनो गगनादेः स्पार्शनविषयत्वं वा इष्टं विषयत्वव्याघातभंगप्रसंग इति वा
च्यः अननुकूलतर्कविरहेणातद्देशव्यापारोपयोजकतया अनभ्युपगमात् न च बहिर्द्रव्यप्रसक्त्याव
च्छिन्नं प्रागेव तद्रूपत्वेन हेतुतानुपपत्तिरेव तत्र अननुकूलतर्क इति वाच्यं तादृशकार्यका
रणभावमानाभावात् न चैवं तीगगनादेः प्रसक्त्यापत्तिरिति वाच्यं द्रव्यस्पार्शनं प्रति स्पर्शत्वेन
द्रव्यचाक्षुषं प्रति चोद्भूतरूपत्वेन हेतुतायाः कल्पनादेव तदापत्तिवारणासंभवात् न च तथा
विधकार्यकारणभावद्वयकल्पनामपेक्ष्य लाघवात् बहिर्द्रव्यप्रसक्त्यावच्छिन्नं प्रत्युद्भू
तरूपत्वेन एकहेतुत्वकल्पनमेव सम्यगिति वाच्यं तत्र तथात्मभिन्नत्वरूपबहिर्द्रव्यत्वे

सा॰सं॰ योर्विशेष्यविशेषणभावेविनिगमनाविरहेणाकार्य्यकारणभावद्वयस्यावश्यकतया कार्य्यता-
१८ वच्छेदकगौरवस्य पुनरधिकत्वात् । ननु मूर्त्तप्रसक्तत्वावच्छिन्नप्रतियोगिकभूतरूपत्वेन हेतुतामन्त्यावयवस-
78 मवायिकारणतावच्छेदकतयापि सिद्धा जातिः । अतो न गौरवावकाशः । एतेन मानसान्यद्रव्य-
प्रसक्तत्वावच्छिन्नप्रतियोगिकभूतरूपत्वेन हेतुतामादायापि विनिगमनाविरहोपि प्रत्युक्तः उपदर्शित-
स्य वलाघवेन कार्य्यतावच्छेदकत्वोपगमादिति चेत् न द्रव्यचाक्षुषप्रसक्तसाधारणस्य तस्यापि नि-
सर्गन्नित्यतया कार्य्यतावच्छेदकत्वासंभवात् जन्यत्वनिवेशने तु विशेषणविशेष्यभावे न विनि-
गमनाविरहस्य दुर्वारत्वात् । द्रव्यचाक्षुषप्रसक्तत्वमादाय तु वैजात्यविशेषमुपेत्य तस्य तत्र कार्य्यतावच्छे-
दकत्वाङ्गीकारेपि न वायोः प्रसक्तत्वासंदेहे न व्यभिचारसंदेहादिति द्रव्यस्पार्शनत्वावच्छिन्नप्र-
ति स्पर्शत्वेन द्रव्यचाक्षुषत्वावच्छिन्नप्रतियोगिरूपत्वेन हेतुतापि एवावश्यकतया वायुः प्रसक्तप्र- राम
सक्तस्पर्शाश्रयत्वादित्यनुमानासिद्धमा वायोः प्रत्यक्षविषयत्वे उद्भूतरूपवत्त्वमानं च वायोः प्रसक्त- १८

त्वितरद्गुणसंख्यापरिमाणपृथक्त्वसंयोगविभागास्त्रिपादेशिप्रत्यक्षत्वापत्तेः तेषामाश्रययोग्यता
धीनयोग्यत्वादिति वाच्यम् । स्पष्टापत्तेः । अत एव पूर्वोक्ता एते तो संयोगप्रत्यक्षस्यानभवासिद्धस्य नाप
लापः क्वचित्तद्गुणसालिग्रथ्ये पटलग्रवस्त्रेवेऽप्रत्यक्षत्वेऽपि तद्गुणसंख्यापरिमाणादिप्रत्यक्षत्वानत्यादि
वद्दोषवशादित्याहुः । अत्र नैयायिकाः द्रव्यचाक्षुषत्वावच्छिन्नं प्रतिरूपत्वेन द्रव्यस्पार्शनत्वावच्छि
न्नं प्रति त्वक्स्पर्शत्वेन हेतुत्वकल्पनेन न संभवति भिन्नं चाक्षुषत्वमन्नं स्पार्शनत्वं चादाय विनिगमना
विरहेणाकार्य्यकारणभावकल्पनानन्त्यात् तथा च लाघवान्मन्नं प्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूप
त्वेन हेतुत्वकल्पनमेव सम्यक् । न चैवं वायुप्रत्यक्षतासंदेहेन तस्य संदिग्धव्यभिचारकत्वेन कार्य्य
तावच्छेदकत्वमिति वाच्यम् । लाघवतर्के सति संदिग्धव्यभिचारकधर्म्मस्यापि कार्य्यतावच्छेदक
त्वाङ्गीकारात् कार्य्यकारणभावग्रहे प्रति लाघवतर्काभावविशिष्टव्यभिचारज्ञानस्यैव प्रतिब
धकत्वाभ्युपगमात् । एवं च उपदर्शितानुमानस्याप्रयोजकत्वाद्वायुर्न प्रत्यक्ष इत्येव सम्यक् । यद्वा ।

सा.सं.
७८
79

वायोरप्रत्यक्षत्वे वायुस्पर्शप्रत्यक्षस्याप्यनुपपत्तेः गगनघटसंयोगादिस्पार्शनापत्तिवारणायावि
जातीयस्पार्शनं प्रतिस्वाश्रयसमवेतत्वसंबंधेनोद्भूतप्रतिबंधकताकस्पार्शनविषयत्वा
भावस्य तेन संबंधेन तत्र सत्त्वात् न च तत्र प्रतिबध्यतावच्छेदककोटौ विजातीयस्पर्शभिन्न
त्वदाने वैशिष्ट्यानुपपत्तिः । इति वाच्यं । तथा सति विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावक
ल्पनाधिक्यस्य प्रतिबध्यतावच्छेदकगौरवस्य च दुःसमाधेयत्वात् । एवं स्पार्शनविषयत्वाभावाभ
वरूपकारणं विनापि वायुस्पर्शे उत्पादितप्रत्यक्षस्य त्वक्संयुक्तसमवायस्य तत्सहकारित्वासंभवेत
थाविधप्रतिबंधकाभावरूपकारणं विनापि त्वक्संयुक्तसमवायरूपकारणबलात् गगनघटसंयो
गप्रत्यक्षस्यापत्तिः । अपि च वायोरप्रत्यक्षत्वमते स्पर्शस्पार्शनत्वावच्छिन्नं प्रति तादात्म्येन स्पर्श
त्वेन हेतुताकल्पनमपि व्यर्थं त्वक्संयुक्तसमवायस्य स्पर्शे तथाविधप्रतिबंधकाभावपारम्यतास एम
हकारित्वमुपेत्य तथापत्तिवारणे तु तथाविधकार्यकारणभावकल्पनप्रयुक्तगौरवं दुष्परिहरं ७८

मेवा॥ वायोरप्रसत्त्वमत इति तत्प्रसत्त्वमेव समीचीनमिति॥ नन्वेवं गगनघटसंयोगप्रस
त्त्ववारणाय विजातीयसत्त्वस्पार्शनत्वावच्छिन्नप्रतिस्पार्शनविषयत्वाभावत्वेन प्रतिबंधकत्वं
न कल्प्यते॥ तादृशप्रतिबंधकाभावं विना विद्रव्यत्वादावुत्पादितस्पार्शनात्ववक्तप्रसक्तसमवा
यात् गगनघटसंयोगस्पार्शनापत्तेः। वायुत्वात् न ह्यारोपसम्भिन्नस्पार्शनविषयत्वाभावविशि
ष्टावच्छिन्नप्रतिसम्भिन्नत्वेनापि हेतुत्वकल्पने गौरवात्। अपि तु स्पर्शान्यविषयकस्पार्शनत्वाव
च्छिन्नप्रतिस्पार्शनविषयत्वाभावविशिष्टविजातीयसत्त्वेन तादात्म्येन प्रतिबंधकत्वं कल्प्यते। अ
त्र विजातीयसत्त्वस्पार्शनविषयत्वाभाववैशिष्ट्यं तु स्वाश्रयसमवेतत्वसंबंधेन यत् तदधिकर
णत्वसमवेतत्वतादात्म्यसंबंधावच्छिन्नसंबंधित्वमिति सामानाधिकरण्यसंबंधेन वैजात्यं
तु द्रव्यमात्रवृत्तित्वगुणत्वकर्मसाधारणम्। अतो न च तु रूपके स्पार्शनानुपपत्तिः न चात्र स्पार्श
नविषयत्वाभावविजातीयसत्त्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबध्यप्रति

बंधकाभाववाद्रूपमितिवा अथ यतो विजातीयसत्वविशिष्टस्पार्शनविषयत्वाभावस्य प्रति
बंधकतावच्छेदकत्वेऽपदर्शितपायस्यैव प्रतिबंधकतावच्छेदकताघटकसंबंधो वाच्यः । वि
शेषणताविशेषस्य तथात्वेऽन्योन्याश्रयस्य दुर्वारत्वात् । तथाविधविजातीयसत्वेन प्रतिबंध
कत्वे तु तादात्म्यमेव तथोचितं लाघवेन तथाविधविजातीयसत्वेनैव प्रतिबंधकत्वौचित्य
मिति । न चैवं सत्यपि उपदर्शित एतासामात्मसामग्रीवलात् घटगगनसंयोगस्पार्शनापत्तिर्दु
र्वारैवेति वाच्यमात्वक्संयुक्तसमवायरूपसामान्यसामग्र्याः फले जननापेक्षया विधप्रतिबंध
काभावस्य सहकारित्वाभ्युपगमात् । न चैनादृशविशेषसामग्रीं विनापि वायुस्पर्शेऽस्याः तत्फला
नत्वक्त्वक्संयुक्तसमवायात् गगनघटसंयोगस्पार्शनापत्तिर्दुर्वारैवेति वाच्यं । स्पर्शस्पार्शनत्वाव
च्छिन्नं प्रतितादात्म्येन स्पर्शस्यापि हेतुताकल्पनेनानुपपत्त्यभावात् त्वक्संयुक्तसमवायेन फले राम
जननापेक्षयैस्पर्शतथाविधप्रतिबंधकाभावात्मनपयोः सहकारित्वाभ्युपगमात् । न चैवं सत्यपि ८०

वायोः प्रत्यक्षत्वानंगीकारे उपदर्शितप्रतिबंधकतावच्छेदककोटौ स्पर्शान्यविषयकत्वानिवे
शे विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तगौरवस्य प्रतिबध्यतावच्छेदकगौरवस्योपद
र्शितत्वात् स्पर्शहेतुत्वकल्पनाप्रयुक्तगौरवस्य च दुष्परिहरत्वात् वायोः प्रत्यक्षत्वमेवस्य गति
वाच्यं वायोः प्रत्यक्षत्वांगीकारे महद्गौरवसंभवात्। तथाहि। द्रव्यसमवेतस्पार्शनप्रति त्वकर्त्तयुक्त
समवायत्वेन न हेतुत्वं परमाणवादिवृत्तित्वकर्त्तयोगाद्द्रव्यत्वादिस्पार्शनापत्तेः। अपितु त्वकर्त्तयु
क्तस्पार्शनवत्समवायत्वेन तत्र हेतुत्वं तथा च चक्षुरादिस्पार्शने व्यभिचारोऽद्वौ रश्मिद्रव्यास
समवेतस्पार्शनत्वमेव तत्कार्यतावच्छेदकं वाच्यं। तथा च सति द्रव्यसमवेतस्पार्शनत्वमा
दाय तत्र विनिगमनाविरहोऽद्वौ रश्मि। न च तत्रोपदर्शितधर्म्मस्य कार्यतावच्छेदकत्वे अ
सन्निकृष्टगुणकर्म्मस्पार्शनापत्तिरिति वाच्यम्। एकाश्रयघटितसन्निकर्षबलात्तद्धित्वादिस्पा
र्शनापत्तिवारणाय आवश्यकत्वेन विजातीयस्पार्शनत्वावच्छिन्नं प्रति स्वाश्रयसमवे

तत्वसंबंधेनत्वक्संयोगाभावप्रतिबंधकत्वेनैवतद्धाणासंभवात्। नचैवंसतित्वक्संयुक्तसम
वायहेतुताकल्पनापानिष्प्रामाणिकतयाक्रोपदर्शितविनिगमनाविरहइतिवाच्यम्तथा
सत्पसन्निकृष्टद्रव्यत्वादिस्पार्शनापत्तेर्दुर्वारत्वादिति। सम्भिन्नद्रव्यसमवेतस्पार्शनत्वावच्छिन्न
प्रतित्वक्संयुक्तस्पार्शनवत्समवायहेतुताकल्पनस्यावश्यकत्वात् तथाचतत्रद्रव्यान्यद्रव्यसम
वेतस्पार्शनत्वमादायकार्यतावच्छेदकेविनिगमनाविरहोवायोःप्रत्यक्षत्वमतेदुर्वारइतितन्म
ते। अनंतपुरुषभेदेनसन्निकर्षानंतहेतुत्वकल्पनंदुर्वारमेववायोःप्रत्यक्षत्वानंगीकारेतुत
त्रद्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादायनविनिगमनाविरहसंभवः। वायुस्पर्शस्पार्शनव्यभि
चारादित्युपदर्शितमहागौरवेणवायुर्नप्रत्यक्षः। एतेनोष्मादिकमपिव्याख्यातमितिसिद्धान्ता
नुसारिणामाशयः। नवीनास्तु असन्निकृष्टद्रव्यत्वादिप्रसक्तत्वात्तार्थेनोपदर्शितसन्निकर्ष राम
हेतुताकल्प्यते अपितुसम्भिन्नसमवेतस्पार्शनत्वावच्छिन्नंप्रतित्वक्त्वेनप्रागभावप्रतियोगि ८१

त्वविशिष्टयत्त्ववृत्तिस्पार्शनाविषयतासंबंधेनतद्रूपत्वतत्समवेतत्वसंबंधेनकृतिलिंगे
वहेतुत्वंकल्प्यते। अनंतपुरुषभेदेनकल्पनापातंतत्सन्निकर्षहेतुताकल्पनापेक्षयालाघवा
त्।स्वपदंचात्रकृतिपरंप्रमाणाभावादीकृतिवृत्तित्वंचकालिकसंबंधेनबोध्यमतएवाचवा
यो:प्रत्यक्षत्वांगाकारेक्कोपदर्शितगोत्वावकाशइतितन्देवसम्पकृ:नचैतन्मतेपिद्रव्यान्य
समवेतस्पार्शनत्वमादायकृतिकार्य्यतावच्छेदकेविनिगमनाविरहोदुर्वारइतिवाच्यंव्यापक
धर्म्मेणअन्यथासिद्धतयाकार्य्यत्वकल्पनाभाववत्व्यापकधर्म्मेणअन्यथासिद्धतया
कार्य्यताकल्पनाभावस्यासंभवेननतेनरूपेणकार्य्यताकल्पनापात्रसंभवादित्याहुः।ननुवाय
रप्रसक्तत्वेतत्रकिंप्रमाणमितिचेत्स्पर्शशब्दधृतिकंपान्यतमलिंगकानुमानमेवसर्वेहि
लिंगपदमत्रपक्षपरंतथाचस्पर्शपक्षकानुमानंशब्दादिपक्षकानुमानंचवायौप्रमाणमिति
पर्य्यवसन्नंतत्रस्पर्शपक्षकानुमानंयथारूपवद्द्रव्यासमवेतस्पर्शोद्रव्याश्रितःस्पर्शत्वात्

सासं:
८१
82

थिवीस्पर्शवदिति । अत्र पृथिव्यादित्रयमात्रीयसिद्धसाधनवारणाय पक्षे रूपवद्वृत्त्यसमवे
तत्वमिति विशेषणं । तथा चोपदर्शितानुमानात्तादृशविशेषणविशिष्टपक्षे वृत्त्याश्रितत्वसि
द्धिः । पृथिव्यादित्रयातिरिक्तवृत्त्याश्रितत्वपर्यवसायिना पतितादृशानुमानादतिरिक्तवायु
सिद्धिरिति ध्येयं । ननु स्पर्शे रूपवद्वृत्त्यसमवेतत्वाप्रसिद्ध्या अत्राश्रयासिद्धिः । न च वायुस्पर्श एव
तादृश इति वाच्यं । वायावपि रूपाभ्युपगमे तत्त्वविरहात् । तथा च वायुः पृथिवीविशेषए
वास्तु । अननुष्णाशीतस्पर्शवतो रूपवतः पृथिवीत्वनियमादिति चेन्न कीदृशं रूपं तत्रांगीकार्य
मुद्भूतमनुद्भूतं वा नाद्यः । महद्वृत्त्युद्भूतरूपस्य प्रत्यक्षत्वनियमेन तस्य रूपस्य प्रत्यक्षत्वप्रसंगा
त् । न चाभिभूतमेव तद्रूपमिति वाच्यं । अभिभावकरूपान्तरानुपलब्धेः । नांत्यः । अनुद्भूतरूप
स्य अनुद्भूतानुष्णाशीतस्पर्शव्याप्यत्वेन सर्वत्र वायावनुद्भूतानुष्णाशीतस्पर्शस्यापत्ताप राम
त्तेस्तादृशानुपममनभ्युपेयस्तथा च स्वीकारेऽनुद्भूतरूपवान् अनुद्भूतस्पर्शवान् अपि पृथिवीविशेषः ८१

किन्त्वागंतोक्षिपेतापदि चानुभवानुसारिणी व्यवस्थेतितथाच्चानुभवाभावान्नतथाकल्पनमि
विभाव्यतेतथापिवायोरूपाभ्युपगमेनगुरुत्वमप्यभ्युपेतंस्यात्तथापार्थिवरूपवद्रसनुल्पमाशान
स्पर्शस्यगुरुत्वव्याप्यत्वात्।नचात्र इष्टापत्तिरितिवाच्यं।तथासतिऽनुमापमानस्यवायुस्पर्शेन
चर्म्मपुटकस्यवायुपूरणदशातोऽधिकावनमनप्रसंगात्।गुरुत्ववद्द्रव्यपूरितचर्म्मपुटका
ऽनुमानस्यतदपूरणदशातोऽधिकावनमनजनकत्वनियमात्।नच धूमस्यापिपृथिवीत
यागुरुत्ववत्त्वेन धूमपूरितचर्म्मपुटकोन्मानेतदपूरणदशातोऽधिकावनमनाजनकेव्यभि
चारात्तेनापिनियमेइतिवाच्यं।अस्तुधूमतापन्नधूमपूरितचर्म्मपुटकोन्मानस्यतदपूरणद
शातोऽधिकावनमनजनकतयातत्रापिसाध्यसत्त्वेनव्यभिचाराभावादुपदर्शितनियमस्या
सेतत्वात्।नचातद्धूमस्यधूमत्वप्रमाणाभावान्नैवमितिवाच्यं।धूमध्वंसजन्यधूमाप
दानोपादेयस्यधूमत्वनियमेनालंधूमस्यापिधूमत्वादिति।नचतथापित्रैलंधूमेतानां

सासं पन्नपरमपरिति चर्म्मपुटकोन्मानेव्यभिचारान्नायं नियम इति वाच्यमागतपापिगुरुत्ववद्वृत्ति
८३ जातेर्गुरुत्वासमवायिकारणाधिकावनवद्वृत्तित्वनियमस्यानन्ततपावायोगुरुत्वासमवायिका
रणाधिकावनमनाभावेनगुरुत्वागीकारस्याशक्यत्वात् तस्मात् गुरुत्वाभावेन वायोः पृथिवीत्वा
83 भावसिद्धिः प्रमाणाभावे न रूपाभिध्यातहतिस्पर्शे रूपवद्द्रव्यासमवेतत्वासिद्धिरिरूपवद्द्रव्यासमवेत
स्पर्शः पृथिवीत्वाभाववद्वृत्त्यनुष्णाशीतस्पर्शोवाद्रुमाश्रितः स्पर्शत्वात् पृथिवीस्पर्शवदित्यनुमा
नात्पत्तेतावच्छेदकविशिष्टपदार्थे तस्याव्याप्तिसिद्धिर्न विनातिरिक्तद्रव्यं समस्पर्शत्वात् स्पर्शाति
रिक्तद्रव्यमवश्यमंगीकार्य्यं तदेव वायुत्वाश्रय इति युक्तपश्याम । ध्वतंत्राप्तु । लाघवेनानुष्णाशी
तस्पर्शे प्रातिपृथिवीत्वेनैकदेशत्वात् । वायुः पिपृथ्वीमेव न च वायोः पृथिवीत्वे तद्वृत्त्यनुष्णाशीत
स्पर्शस्य पाकजत्वापत्तिः पृथिवीस्पर्शवृत्त्यनुष्णाशीतत्वस्य पाकजत्वव्याप्यत्वादिति वाच्यमात एम
दृशनियमे मानाभावात् । न चैवं सति तत्र गुरुत्वापत्तिरिति वाच्यं पृथिवीत्वस्य नानः ब्लत्वदृष्टि ८३

गुरुत्वस्यापि व्याप्यत्वानभ्युपगमेन ह्नतिविरहादिसाङ्काः। तन्न। गन्धाश्रिष्प्रान्ते पापामात्मनस्याकाश
संभूतस्याकाशान्न वायुर्वा पावकोऽग्निरेतेऽपः अद्भ्यः पृथिवी इत्यादिश्रुतेः पृथिवीमित्रत्वेन वायोर्
गानयाश्रुतिसिद्धस्य वायोः पृथिवीमित्रत्वस्य अपलापासंभवादिति। एवं शब्दपक्षकानुमानमपि
वायोः प्रमाणमित्युक्तं। तद्यथा। रूपवन्मात्रवृत्तिसंयोगाजन्यविभागाजन्यशब्दाजन्यपर्णादिशब्दक
भ्रुकसादिशब्दः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः विभागाजन्यशब्दाजन्यशब्दत्वात् दण्डाभिघातज
न्यभेरीशब्दवत् इति। अत्र रूपवन्मात्रवृत्त्यभिघातजन्यमात्राप्रसिद्धसाधनवोरणाय पदं तथावि
धसंयोगजन्यत्वनिवेशः। शब्दजन्यशब्दे विभागजन्यशब्दे च बाधवारणाय तत्रैव शब्दाजन्यत्वविभा
गाजन्यत्वयोर्निवेशः। निरुक्तसाध्यतावच्छेदकरूपेण साध्यसिद्धिरुद्देश्येति। साध्यतावच्छेदक
कोटौ तत्तद्विशेषणगानां निवेशः। शब्दजशब्दे विभागजन्यशब्दे च व्यभिचारवारणाय हेतौ अज
न्यत्वान्तदलनिवेश इति। एवं ध्वनिपक्षकानुमानमपि वायोः प्रमाणमुक्तं। तद्यथा। नभसित्व

सा॰सं॰
८४
84

त्वलकमेघे च विमानादौ नौ धृतिः स्पर्शवद्द्रव्यसंयोगजन्या जन्यप्रयत्नाजन्यद्रव्यधृतित्वात् जलसंयो
गजन्यनौकाधृतिवत् गुरुत्ववद्द्रव्यस्य पतनाभावः न च अभावस्य अजन्यतया बाधात्तोपदर्शितानुमा
नं संभवतीति वाच्यं अभावस्यापि योगक्षेमसाधारणजन्यत्वाभ्युपगमात् योगक्षेमसाधारणजन्य
त्वं च तत्सत्वे अग्निमसत्वेति तत्सत्वे तदसत्वे तदसत्त्वमित्याकारकं तदधीनसमसंबंधवत्वपर्यवसा
न्नं बोध्यं। अत्र अस्मदादिप्रयत्नाधानहस्तादिधृतौ व्यभिचारवारणाय हेतौ अजन्यत्वांतनिवेशः। पक्षधृ
धृतिः पतनप्रतिबंधकसंयोगविशेषः तथा च रूपवन्मेघावृत्ति मेघादिपतनप्रतिबंधकसंयो
गः स्पर्शवन्मात्रवृत्तिः आत्मावृत्तिपतनप्रतिबंधकसंयोगत्वात् नौधृतनौकासंयोगवदिति सनु
मानाद्वौ प्रसिद्धिः अत्र ब्रह्मांडधारके श्वासंयोगे व्यभिचारवारणाय हेतौ अवृत्तित्वांतस्य निवेश इ
ति। कंपपक्षकानुमानं तु तृणादिकंपकर्मकानुमानमेव। तत्र पूर्ववदेव प्रपंचितमिति। अत्र अन्व राम
यव्यतिरेकसिद्धं न तत्कार्यकारणभावलोपापत्तेरनुकूलतर्कत्वात् पूर्वोपदर्शितानुमानानां अ ८४

प्रयोजकत्वमितितु ध्येयं। उपदर्शितानुमानसिद्धो वायुः नानात्वाश्रयः स्वाश्रितसजातीयभेदव
त्वरूपतन्नानात्वस्याप्यनुमानगम्यत्वात्। अनुमानं चात्र संसर्गजनककर्म। आश्रयत्वरूपप्रतिहतत्व
वद्वायुपदार्थकं संमूर्च्छनं च प्रकृते वायोर्विरुद्धदिगवच्छिन्नक्रियया प्रतिघातात्मसंयोगविशेषः।
तथा च प्रतिहतत्वं वायोः प्रतिघातस्य वायुभिन्नः प्रतिघात्यश्च वायुप्रतिहतत्वात् उपजहन्नप्रतिहतत्वेद्व
ते वतद्रूपानुमानात् वैयर्थ्यं वा यत् एतरभिन्नत्वरूपं वा यो नानात्वसिद्धमिति यत्पर्यवसन्नं नचात्र उपद
र्शितदृष्टान्तासिद्धिः इति वाच्यं। यो यत् प्रतिघातस्य प्रतिहतः तास्य तद्भिन्नः इति यत् तत्र घटितसामा
न्यमुख्यो वा व्याप्तौ वैवं उपदर्शितस्य दृष्टान्तत्वात्। प्रतिघातपदत्वं च न प्रतिघातात्मसंयोगाश्रयत्वं संयो
गस्यादृष्टतया प्रतिहतत्वे पितदाश्रयत्वेन प्रतिघातस्यत्वापत्तेः। अपितु प्रतिघातात्मसंयोगजनक
यत्किंचित्कर्मान्ताश्रयत्वं सति प्रतिघातात्मसंयोगाश्रयत्वं प्रतिघातत्वमवगंतव्यं। अत्र कर्म
णि यत्किंचित्वविशेषणात् उभयकर्मजन्यप्रतिघाताश्रये अव्याप्तिः प्रतिघातत्वं च संयोगनिष्ठ

सा.सं:
८५
85

जातिविशेषः स्पर्शवेगवज्जन्यसंयोगत्वं वेति। न तदूर्ध्वज्वलनपाडपदार्थेन लक्षणानुपपत्तिः। न च वायुद्व
त्तिसंयोगादेरतीन्द्रियतया निरुक्तप्रतिघाताख्यसंयोगस्यापि तद्वृत्तेरतीन्द्रियत्वेनऽपदर्शितानुमानेप
त्ताद्यप्रसिद्धिरिति वाच्यं। वायोरूर्ध्वक्रियया तत्र तथाविधसंयोगानुमानसंभवात्। तत्रानुमानाकार
स्तु वायुर्निरुक्तप्रतिघाताश्रयः ऊर्ध्वज्वलनवह्नित्वे सति तत्प्रयत्नवेगाजन्योर्ध्वगमनवत्त्वात्। पाषाणा
भिहतनदीपूरवदित्याकारको ज्ञेयः। न च वायोः क्रियायाप्यतीन्द्रियतया कथं तदनुमानमिति वा
च्यं तस्याप्यतीन्द्रियत्वेपि ऊर्ध्वतृणादिक्रियया तदनुमानसंभवात्। तृणाद्यूर्ध्वक्रियायास्तु प्रत्यक्ष
सिद्धत्वेन अनुपपत्त्यभावात्। अनुमानाकारस्तु वायुरूर्ध्वगमनवान् तृणाद्यूर्ध्वगमनासमवायिकारण
संयोगाश्रयत्वात्। ज्वलदनलवदित्याकारको बोध्यः। ननु तिर्यग्गमनस्वभावस्य वायोरूर्ध्वगमनस
भावात्। सर्वमिदमनुपपन्नमिति चेत्। नानीचगमनस्वभावानामपि प्रपसंपथ्याद्व्यान्तराभिघा एम
तेनोर्ध्वगमनं तथा तिर्यग्गमनस्वभावानामपि वायूनां वाघ्नतराभिघातात्मकसमस्यैनेऽर्ध्वं ८५

मनःसंभवात् । अत एवादृष्टविशेषवदात्मसंयोगो वायोस्तिर्यग्गमने हेतुः । यदा तु न तज्ज्ञानकादृष्ट
विशेषवदात्मना सह वायुसंयोगस्तदा वायोरूर्ध्वगमनमित्यपि चार्थ एवोक्तमिति । प्राणवायुस्तु श
रीरान्तश्चारी रसधातुदोषोदयाग्निप्रेरणादिहेतुः । अत्र रसो अशितस्य पीतस्य चाहारस्य विका
रविशेषः । स च मलमूत्रपुरीषादिधातुवृद्धिपुष्ट्यादिदोषश्च कफपित्तात्मको ज्ञेयः । अत एव ए
विषयीभूतबहिर्वायोश्चये त्वपां प्राणवायोर्वैलक्षण्यं । नेदं तत्त्वं कार्यजननासमर्थत्वात् । स च प्रा
णवायुरेक एव लाघवात् । न चैवं सति शरीरे पंचवायव इत्यागमविरोध इति वाच्यं नामभेदेनैक
स्यैव पंचसंज्ञाकल्पनेनानुपपत्त्यभावात् । तथा हि । मुखनासिकाभ्यां निष्क्रमणप्रवेशनात्प्रा
णः । मलादीनामधोनयनादपानः । समं नयनात्समानः । ऊर्ध्वं नयनादुदानः । नाडीमुखेषु वितननाद्व्या
न इति ॥ अयमेव पृथिव्यादिचतुर्णां शरीरेन्द्रियविषयात्मकत्वं त्रैविध्यं प्रलयमनभ्युपेत्यास्ते । तमभ्यु
पेत्य वा नाधः । त्रैविध्यं प्रलयाभावे लोकसंतत एव विच्छेदवक्तव्ये वेदसंप्रदायस्याप्यविच्छेदसंभवेन वेदस्य

सा॰सं॰
८६
86

ईश्वरोक्तत्वे प्रमाणाभावात् तद्वचनादाम्नायप्रामाण्यमिति मवादव्याघातप्रसंगात्। नहि ता
पः। स्वेच्छप्रलयाभ्युपगमे तदा घटादिकारककुलालाद्यभावेन तदा घटादिकारणोपदेशानुपपत्ते।
उत्तरोत्तरघटादिकारणसंप्रदायोच्छेदप्रसंगात्। अन्यच्च। स्वेच्छप्रलयाभ्युपगमे तदुत्तरं पृथिव्यादीनां
शरीराद्यात्मकत्वं अदृष्टविनिर्मोकेन अदृष्टसहकारेण वा। नाद्यः। अदृष्टं विना तदभ्युपगमे
किंचिच्छरीरं कस्यचित् भोगसाधनमिति नियमानुपपत्त्या सर्वशरीराणां सर्वभोगसाधनत्वाप
त्तेः। तत्तद्भोगसाधनशरीरात्मकापोपार्थिवावयवाहीनानुत्पन्नयास्तेषां तदवयवानां तद्भो
गसाधनतत्तच्छरीरात्मकत्वापातात्। नहि तापः। अदृष्टेन तत्तत्कार्यजनने तत्तत्कार्योपादानी।
वयवोऽस्तानां च कार्याकर्तानां सहकारित्वनियमेन स्वेच्छप्रलये तथाविधत्ताजाद्यभावाददृष्टस्य
कार्यजननासामर्थ्यात्। न च तदा जीवसमवेततथाविधत्तानादिकमेव तथा भविष्यतीति वाच्यं। तस्मि
न् तदा जीवानां शरीराभावेन तथाविधत्तानासंभवात्। न च तदानीं ईश्वरसमवेतानित्सत्तानादिक ८६

मेवं तथा भविष्यतीति वाच्यं। ईश्वरस्य प्रयोजनाभावे तत्तत्स्थानस्य तत्तत्कार्यजनकत्वानभ्युप
गमेन तथात्वकल्पनायाः असंभवादिति बहुविधाः शंका दृढीनां पृथिव्यादि चतुर्णां महाभूता
नां सृष्टिसंहारक्रमकथनछलेन निवारयितुं ताउच्यते। अत्र सृष्टिसंहारशब्दाभ्यां सर्गखण्डप्र
लयौ तेयौ तावपि पृथिव्यादि चतुर्णां द्व्यणुकादिक्रमेणोत्पत्तिः। परमाणुक्रियाविभागपूर्वसंयोग
नाशक्रमेण द्व्यणुकादिनाशात्तदारम्भावयवादिसमुदायनाशश्च तत्रापि सृष्टिसंहारयोः प्रवा
हक्रमेणानादितामुपपादनार्थं प्रथमतः सृष्टिमुपक्रम्य संहारक्रम उच्यते तेन यथा। क्षणद्वयं
लवः प्रोक्तो निमेषस्तु लवद्वयं। अष्टादश निमेषास्तु काष्ठा त्रिंशच्च ताः कला। त्रिंशत्कलो मु
हूर्तः स्यात् त्रिंशद्रात्र्यहनी तु ते। अहोरात्राः पंचदश पक्षो मासश्च तावुभौ। ऋतुर्मासद्वयं प्रोक्तं अ
यनं तु ऋतुत्रयं। अयनद्वितयं वर्षो मानुष्यो यमुदीरितः। एष दैवस्त्वहोरात्रस्तैः पक्षादिश्च पूर्ववत्।
दैववर्षसहस्राणि द्वादशैव चतुर्युगं चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते। रात्रिश्चैतावती तस्य

सास ८१ ८७ नाम्नां पापह्लादिकस्य नाश एवं क्रमेण ब्राह्मवर्षशतान्ते वर्तमानस्य हिरण्यगर्भाख्यब्रह्मणोऽप
वर्गस्य सोऽत्तापरपर्यायस्य संकल्पितफलकर्मकर्त्तारः साकारोपासनापरिवासितचेतसोऽपतप
स्विहिरण्यगर्भपदवीमनुप्राप्य अपवृजन्ते रसाणामात्सिद्धस्य समये परदानु ईश्वर एव कोऽपि
जननार्थं गर्हणतदेहो ब्रह्मावस्थामापन्न इति मातं तानरा क्षेमणः चामडुः स्वामावेत ह्वंसरप
मोह्नासमवेन ब्रह्मणो देहापवर्जनार्थं कृतरूपव[illegible]र्गसमये नानाविधदुःखैः खिन्नानां प्रमता
नां खिन्नप्रलये किं पत्कालडुनवोपशमनार्थं का[illegible]लाग्निरुद्रादिमहेश्वराः स्वाम्भिकृपातासा
भुवनाधिपतेर्महेश्वरस्य संजिहीर्षास्य हृक्तनपूर्वापदर्शितशतवर्षानन्तरं प्रलयजनका
द्दृष्टनशरीरेन्द्रियादिविषयहेतुनां अदृष्टानां स्वस्वकार्यप्रतिबन्धे साति संजिहीर्षारूपमहेश्वरे
च्छसहितेभ्यो अदृष्टवशात्संयोगेभ्यः शरीरेन्द्रियारम्भकपरमाणुक्रियातस्तथाविधपरमाणा एम
नो विभागस्ततस्तथाविधपरमाणूनां पूर्वसंयोगनिवृत्तौ च सत्यां सान्तशरीरेन्द्रियादिश्रान्तं ८१

म्भकद्व्यणुकादिनाशक्रमेण शरीरेन्द्रियघटितत्र्यवयविसहस्रोपनाशः तथापूर्वोक्तरीत्या
आरंभकपरमाणुष्वं योगनिवृत्तौ विषयीभूतानां पृथिव्युदकज्वलनपवनानामपि तत्त्वेषि
न्नन्नएस्मिन्सति पूर्वस्य पूर्वस्य विनाशः। तदा आरंभकसंयोगाभावतः कार्यद्रव्याभावत्वत
स्वपरमाणवः प्रविभक्ता ब्राह्ममानेन शतवर्षपर्यंतं अवतिष्ठंते। एवं तदा धर्माधर्मभाव
नाख्यसंस्काएविशिष्टा आत्मानोऽन्यान्यपि नित्यान्यवतिष्ठंते। एवं तदा अनित्याव्यपि
पाकजाद्दृयोगणीकार्यद्रव्यात्मकमहाभूतनाशप्रयोजकपरमाणुक्रियजन्मककालोपा
धिपश्च अवतिष्ठंते। अन्यथा परमारोहपाभावे सर्गाघकालोत्पन्नद्व्यणुकारोहपानुपप
पत्तेः। तदा क्रियात्मककालोपाध्यभावे तत्क्रियासमहात्मकपूर्वोक्तवर्षात्मकस्थूल
कालोपाधिवशात्सृष्टिरित्यनुपपत्तेश्च तस्मात् तत्रप्रलयकालोपावल्कार्यद्रव्याणामे

सा.सं. वनाशः ननु यावत्कार्योणामिति। अत एव कार्यद्रव्यानधिकरणत्वे सति भावकार्याधिक
८८ रणकालः खंडप्रलय इति गीयते। ननु खंडप्रलये किं मानमिति चेत्। समवायिकारणा
तिरिक्तवृत्तिध्वंसप्रतियोगिवृत्ति द्रव्यत्वं कार्यद्रव्यानधिकरणभावकार्याधिकरणवृत्तिध्वं
सप्रतियोगिवृत्ति एतत्समीपभावकार्यवृत्तित्वात् तद्‌वृत्त्ववत्। इत्यनुमानमेव तत्र वेदि।
अत्र गगनादिकमादाय सिद्धसाधनवारणाय यत्तावच्छेदके अवृत्तित्वांतद्रव्यत्वविशेषणं।
तत्रापि बाधवारणाय समवायिकारणातिरिक्तविशेषणं। आश्रयासिद्धिवारणाय समवायिका
रणसप्रतिरिक्तविशेषणं। महाप्रलयमादाय अर्थान्तरवारणाय साध्ये भावकार्याधिक
रणत्वनिवेशः। सृष्टिकालीनकालोपाधिमादाय सिद्धसाधनवारणाय साध्ये कार्यद्रव्या राम
नधिकरणत्वनिवेशः। महाप्रलयाव्यवहितपूर्वसमीपचैत्रवृत्तिचैत्रत्वादिकमादाय व्य ८८

भिचारवारणाय हेतुतावच्छेदके एतत्क्षणीयत्वं भावकार्यविशेषणं । ध्वंसत्वमादाय व्यभि
चारवारणाय तत्र भावत्वनिवेशः । आत्मत्वमादाय व्यभिचारवारणाय तत्र कार्यत्वनिवेश
इति । अत्र यदि महाप्रलयाव्यवहितपूर्वक्षणोत्पन्नकार्यद्रव्यमिति मतं तदा तमादाय अर्थान्त
रवारणाय साध्ये भावकार्याधिकरणत्वं हि कृत्यकार्यद्रव्यप्रागभावकालीनत्वं निवेशनीयमि
ति न चात्रानुकूलतर्काभाव इति वाच्यम् सदेव सोम्येदमग्र आसीत् । रसायाणामेवा
नुकूलतर्कत्वात् । न च तथाविधागमादेव सृष्टिप्रलयसिद्धौ व्यर्थमनुमानमिति वाच्य
म् उपायः उपायान्तरं दूषकत्वाभावादिति तत्त्वं । अतः सृष्टिक्रम उच्यते । तत्र संहारानंतरं प्रा
णिनां सुखदुःखोत्पत्तये विषयकलौकिकजन्यसाक्षात्कारात्मकभोगमुद्दिश्य परस्यद्याव्य
वहितपूर्वकालसहकृतमहेश्वरसिसृक्षायाः सृष्टिविषयकेच्छारूपायाः स्वस्वकार्यजन
नप्रतिबंधकाभावकालीनादृष्टसहकारेण । अदृष्टवदात्मपरमाणुसंयोगेभ्यः पवनप

तासं
८९
89

माणुकपातितोविभाग इत्यादिक्रमेणाप्यवनपरमाणुषु स्वारंभकसंयोगात्पन्नोद्व्यणुका
दिक्रमेणोत्पन्नो महान्वायुः आकाशे दोधूयमानस्तिष्ठति ततनन्तस्मिन्नेव महति वायौ
व्याप्यपरमाणुभ्यः जलाद्व्यणुकादिक्रमेणोत्पन्नो महान्सलिलनिधिः पवनवेगाद्दोधूय
मानस्तिष्ठति ततनन्तस्मिन्नेव महोदधौ पार्थिवपरमाणुभ्यो द्व्यणुकादिक्रमेणोत्पन्ना मह
ती पृथिवी निबिडावयवा तिष्ठति ततनन्तस्मिन्नेव महोदधौ तैजसेभ्यः परमाणुभ्यो द्व्यणु
कादिप्रक्रमेणोत्पन्नो महांस्तेजोराशिर्देदीप्यमानस्तिष्ठति अनेन प्रकारेण चतुर्षूत्पन्नेषु
महाभूतेषु तत्कालसहकृतमहेश्वरेच्छामात्रात् कुलालादिवत्कायव्यापाराद्विनैव ब्रह्मा
ण्डारंभकद्व्यणुकनिमित्तकारणतापन्नपार्थिवाणुसंपृक्ततैजसाणुभ्यो द्व्यणुकादि
क्रमेण हिरण्मयाण्डं जायते ततनन्तस्मिन्नण्डे महेश्वरः चतुर्वदनकमलं शरीरिणामाद्यं स राम
र्वलोकपितामहमधस्तनसप्तलोकात्मकं तलवितलसुतलतलातलमहातलरसातलपा ८९

नालेरूर्ध्वसप्तलोकात्मकम्भुर्वस्स्वर्महर्जनतपःसत्यलोकैश्चसहितंब्रह्माण्डंसमुत्पाद्यत्वंप्रजा
स्रजेतिनियुंक्ते।अनन्तरंमहेश्वरेणनियुक्तोब्रह्माज्ञानवैराग्यैश्वर्यसंपन्नःस्वकर्मणएतावत्का
लपर्यंतंएनाद्राःशरीरेणपरिग्रहंकार्यपित्वाफलंउत्पादयिष्यतीतिज्ञात्वातत्फलभोगार्थंता
वत्कालपर्यंतस्थायीन्पयोनिजशरीरेणरुद्रादिप्रजापतीनगणानन्तरंतत्रस्रजतिनियतप्रजासृष्ट्य
र्थंस्वायंभुवमनुप्रभृतिगणानराजधर्मप्रवर्त्तनार्थंहोहविर्भोक्त्रर्थंचआदित्यादिदेवतागणान्
प्रथमंवेदाध्यापनार्थंभारद्वाजादिऋषिगणान्स्वधाभोगार्थंकव्यवाहनादिपितृगणान्
बलिभोगार्थंकुष्माण्डादिभूतगणान्सृजतिअपिनिजानन्सृजति।ततोअदृष्टविशेषसह
कृतेभ्योअवयवविशेषेभ्योज्ञातृपितृनतोअदृष्टविशेषसहकृतेभ्योवयवेभ्योवैश्यंततोअ
दृष्टविशेषसहकृतेभ्योअवयवेभ्यःशूद्रंसृजतीतितदर्थकश्रुतिर्वाकाममपि।अथब्राह्म
णोस्यमुखमासीत्इत्यादि।अतएवआचार्याअपि।मुखान्ब्राह्मणंबाहुभ्यांराजन्यमूरुभ्यां

सास ९०

१०

वैरूप्यं पापस्य च शब्दद्वारजन्यत्वेन न भाष्यग्रन्थप्रयोजनपित्वात्तस्योपदर्शितानार्थमेवडुक्तंवत्तरतिाएवंवक्ष्य
न्यानयापि उत्कृष्टापकृष्टात्मकानन्ततिर्यङ्नारकिप्रभृतीश्वरस्रजति। ततो धर्माधर्मानुरू
पकर्मवासनानुसारेण संस्कारूपत्वान्नवासनानुसारेण च धर्माधर्मज्ञानाज्ञानवैराग्या
वैराग्यैश्वर्यैः तत्फलैः सुखदुःखादिभिश्च ताननयथायोग्यं योजयतीति। इदं त्वत्र तत्त्वं। य
दि हिरण्यगर्भ एव ब्रह्मा तदा महेश्वराददृष्टेनत्तेन महेश्वरेण च हिरण्यगर्भातिरिक्तकार्यज
नयितव्यं तो हिरण्यगर्भातिरिक्तकार्यमात्रस्य शरीरैककर्तृकत्वनियमात्। कार्यमात्रप्रति
श्वरस्य कर्तृत्वाच्च ज्ञानं च हिरण्यगर्भस्य ज्ञानवैराग्यैश्वर्यवत्त्वे मानाभावात्तत्कार्यजनकत्व
मिति वाच्यं। अपतः हिरण्यगर्भश्चेदज्ञः स्यात्तदा समर्थोपि कार्यं न कुर्यात्। यदि वैराग्याभाव
वान्स्यात्तन्न कर्मानुरोधं कुर्यात्। तत्रापि च प्राप्तानां कृतस्यादृष्टस्य फलाभावप्रसंगः अकृत राम
स्यादृष्टस्य फलप्रसंगश्च। यदि ज्ञानाभावो भवेत् जानतोपि स्वस्य अपेक्षितं न कुर्यात्तदस्यादि ९०

पुंक्तिभिर्हि।रण्यगर्भस्य ज्ञानवैराग्यैश्वर्यसिद्धिः प्रत्यूहेति यदि च परमेश्वरादेव ब्रह्मशरीरपरि
ग्रहं कृत्वा कोपि मुखाद्यवयवान्तिमतां तान् द्विजस्त्वादिप्रजापतिगणादीनामपि कर्त्ता परमेश्वर एव
तत्तद्देहेनापि। ननु भवतु हिरण्यगर्भ एव परमेश्वर एवा ब्राह्मणत्वापि विश्वादृष्टविशेषसहकृत
वयवेभ्यो ब्राह्मणाद्युत्पत्तिरित्युक्तं न सम्यक्। ब्राह्मणत्वावच्छिन्नं प्रति ब्राह्मणत्वादिना हेतुत्व
या ब्राह्मणं विना ब्राह्मणोत्पत्तेरशक्यत्वात् इति चेन्न। पित्रोर्ब्राह्मणत्वं हि द्विविधं। एकं अदृष्टवि
शेषजन्यतावच्छेदकं सर्वब्राह्मणसाधारणं। अपरं च ब्राह्मणजन्यतावच्छेदकं अदृष्टविशे
षजन्याद्यब्राह्मणव्यावृत्तं ब्राह्मणजन्यसर्वब्राह्मणसाधारणं। एवं च ब्राह्मणं विनापि अ
दृष्टविशिष्टरूपसहकृतपार्थिवावयवेभ्यः अदृष्टविशेषजन्यतावच्छेदकब्राह्मणत्वा
वच्छिन्नोत्पत्तौ बाधकाभाव इति। एवमन्यत्रापि पर्यायपथमूह्यं॥ ननु अदृष्टविशेषज
न्यतावच्छेदकब्राह्मणत्वं न जातिः विश्वामित्रत्वेन संकरप्रसंगात्। तथा हि ब्राह्मणत्वाभा

सा.सं.
८१
९१

ववर्त्ति विश्वामित्रत्वं क्षत्रियविश्वामित्रशरीरे विश्वामित्रत्वाभाववर्त्ति ब्राह्मणत्वं विश्वा
मित्रभिन्नब्राह्मणशरीरे इति परस्पराभाववद्वृत्तित्वयोर्ब्राह्मणविश्वामित्रशरीरे समावेश
इति चेन्न। ब्राह्मणत्वव्याप्यविरुद्धभेदेन विश्वामित्रत्वस्य द्वैविध्याभावात्। न च विनि
गमकाभावात् विश्वामित्रत्वव्याप्यविरुद्धभेदेन ब्राह्मणत्वस्यापि द्वैविध्यापत्तिरिति वा
च्यम्। ब्राह्मणत्वस्य विश्वामित्रत्वव्याप्यविरुद्धभेदेन द्वैविध्यजातिकल्पनावाद्गुरुस्य प्रसं
गात्। तथा हि। एकं ब्राह्मणत्वं विश्वामित्रत्वव्याप्यं अपरं च तद्विरुद्धं। एवं तुल्ययुक्त्या क्षत्रियत्व
मपि तद्व्याप्यविरुद्धभेदेन द्विविधं। अन्यथा विश्वामित्रत्वमारोपसांकर्यापत्त्या क्षत्रियत्व
स्यापि जातित्वानुपपत्तेः। तथा च ब्राह्मणत्वं द्विरूपं क्षत्रियत्वं च द्विरूपं। एकं च विश्वामित्रत्वमि
ति पंच जातयः। ब्राह्मणत्वव्याप्यविरुद्धभेदेन विश्वामित्रत्वस्य नानात्वे तु जातिचतुष्टय राम
मात्रकल्पनं। तथा हि। एकं ब्राह्मणत्वव्याप्यं विश्वामित्रत्वं तदेव क्षत्रियत्वविरुद्धं ब्राह्मण ८१

त्वविरुद्धं च स्वरूपं । विश्वामित्रत्वं तदेव क्षत्रियत्वव्याप्यं । एकं ब्राह्मणत्वं एकं क्षत्रियत्वं चेति
जातिचतुष्टयं तत्प्राचलाघवात् । ब्राह्मणत्वव्याप्यविरुद्धं भेदेन विश्वामित्रत्वस्यैव हेतुवि
ध्यानं तु विपरीतम् । अपि च जातिकल्पने गौरवादिति निचा विश्वामित्रशरीरमात्रवृत्त्यैकं ब्रा
ह्मणत्वं विश्वामित्रभिन्नब्राह्मणशरीरवृत्ति ब्राह्मणत्वं चापरम् । एवं क्षत्रियत्वमपि द्वि
विधं क्षत्रियविश्वामित्रब्राह्मणविश्वामित्राभ्यपसारणाद् विश्वामित्रत्वं तु नैकं प्रमाणाभा
वात् प्राच ब्राह्मणत्वस्य नानात्वकल्पेऽपि जातिचतुष्टयमात्रमिति ब्राह्मणत्वनानात्वम
त्राय विनिगमनाविरहो दुरुद्धर एवेति वाच्यम् । अपनो ब्राह्मणत्वक्षत्रियत्वयोर्नानात्वे ब्राह्मण
त्वावच्छिन्नप्रति ब्राह्मणत्वेन हेतुता द्रूपमा । क्षत्रियत्वावच्छिन्नप्रति क्षत्रियत्वेनापि हेतुता
द्रूपमात्रपरस्पराव्यभिचारात् गौरवाणामर्थतथाविधकार्यकारणभावचतुष्टय एव कार्य
तो वाच्छेदककोटाववव्याविहितो ब्राह्मणत्वनिवेशनापमा । विश्वामित्रत्वस्य नानात्वे तु विश्वा

सा सं मित्रत्वेन हेतुतास्थले कार्य्यकारणभावद्वयं तत्र व्यभिचारवारणार्थं च तथाविधकार्य्य
८१ कारणभावद्वय एव कार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेश इति स्थलचतुष्टय
कार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशापेक्षया स्थलद्वये कार्य्यतावच्छेदकको
९२ टावव्यवहितोत्तरत्वनिवेशप्रयुक्तलाघवेन विश्वामित्रत्वजातिरेव ब्राह्मणत्वव्याप्यविरु
द्धमेदेन नानात्वमुचितमिति तत्त्वम् । ननु त्वदृष्टं चोऽपि हि प्रहणावधि निरीक्षमाणेनापि वि
ना विशुद्धमातापितृजन्यत्वज्ञानेन न ब्राह्मणत्वप्रत्यक्षमिति । ब्राह्मणत्वप्रत्यक्षं प्रति विशु
द्धमातापितृजन्यत्वज्ञानं हेतुरिति सिद्धान्तः । तत्र किं विशुद्धत्वं विलक्षणादृष्टवत्त्वं ब्राह्मण
त्वं वा । तत्र नाद्यः । तथा सति तादृशव्यंजकज्ञानकाले ब्राह्मणत्वज्ञानस्यानावश्यकतया
विशेषणज्ञानाभावेन तदुत्तरं ब्राह्मणत्वप्रकारकप्रत्यक्षोत्पादासंभवेन ब्राह्मणत्वनि एम
र्विकल्पकस्वीकारे ब्राह्मणत्वस्य सविकल्पकमात्रवेद्यत्वसिद्धान्तभंगप्रसंगात् । न च विशि ८१

ष्टबुद्धित्वविशेषणज्ञानत्वयोरैक्याभावेन तज्ज्ञानं विशिष्टबुद्धित्वावच्छिन्नं प्रति तज्ज्ञानं विशेष्या
विषयकज्ञानत्वेन हेतुत्वस्य विशिष्य कल्पनापत्त्या प्रकृते ब्राह्मणत्वप्रकारकज्ञानत्वावच्छि
न्नं प्रति ब्राह्मणत्वज्ञानत्वेन हेतुत्वं न कल्प्यते प्रयोजनाभावात् । तथा च ब्राह्मणत्वज्ञानं वि
नापि ब्राह्मणत्वप्रकारकप्रत्यक्षोत्पत्तौ बाधकाभावेन न ब्राह्मणत्वनिर्विकल्पकस्वीका
रप्रसंग इति वाच्यं । जातित्वेन ब्राह्मणत्वज्ञानकाले नियमतः स्वरूपतो ब्राह्मणत्वप्रका
रकज्ञानोत्पत्तिवारणाय ब्राह्मणत्वांशे अन्याप्रकारकब्राह्मणत्वप्रकारकज्ञानं प्रति ब्रा
ह्मणत्वांशे अन्याविषयकब्राह्मणत्वविषयकज्ञानत्वेन हेतुत्वकल्पनस्यावश्यकतया
प्राथमिकब्राह्मणत्वविशिष्टबुद्ध्यव्यवहितप्राक्काले ब्राह्मणत्वनिर्विकल्पकांगीका
रस्यावश्यकतापत्तेः । न च जन्यतायां जन्यतावच्छेदकघटनत्वेन विशुद्धमातापितृजन्य
त्वज्ञानकाले ब्राह्मणत्वज्ञानस्यावश्यकत्वेन तदा ब्राह्मणत्वज्ञानसंपत्त्यर्थं तन्निर्विक

प्रा॰सं॰ ९३ त्मकत्वाकार इति वाच्यं ज्ञानवीनमते जन्यतापाश्रितिकेत्वेन जन्यतावच्छेदकाघटितत्वपा
त्यविधजन्यत्वज्ञानकाले विनापि ब्राह्मणत्वनिर्विकल्पकोगाकारं ब्राह्मणत्वप्रकारकज्ञा
93 नमशक्यमिति नाप्यः। तत्र ब्राह्मणजनकजन्यतावच्छेदकब्राह्मणत्वजातेर्निवेशे आदिब्रा
ह्मणजन्यब्राह्मणे ब्राह्मणत्वप्रसक्तेनुपपत्तेः अदृष्टविशेषजन्यतावच्छेदकब्राह्मणत्व
जातेस्तत्र निवेशे च ब्राह्मणजन्यतावच्छेदकब्राह्मणत्वप्रकारकबोधानुरोधेन तन्निर्वि
कल्पकस्याकारस्यावश्यकत्वात् इति चेन्नैवं पत्तौ ब्राह्मणत्वांशे अन्याप्रकारकब्राह्मण
जन्यतावच्छेदकब्राह्मणत्वप्रकारकलौकिकप्रसत्तप्रातिविशुद्धमातापितृजन्यत्वज्ञानं
कारणं विशुद्धत्वं च कश्चिद्विलक्षणादृष्टवत्त्वं कश्चिद्ब्राह्मणजन्यतावच्छेदकब्राह्मणत्वं॥
एवं च जातित्वेन ब्राह्मणत्वज्ञानकालेऽपदार्शनिकारणाभावान्न निष्प्रमतो ब्राह्मणत्वांशे अ राम ९३
न्याप्रकारकब्राह्मणत्वप्रकारकप्रत्यक्षापत्तिः न च तथापि जातित्वेन ब्राह्मणसंस्थानकत्वस

रूपतो ब्राह्मणत्वविधेयकानुमित्यापत्तिरिति वाच्यं। स्वरूपतो ब्राह्मणत्वविधेयकानुमि
त्तिं प्रति स्वरूपतो ब्राह्मणत्वव्याप्यवत्तानिश्चयस्य हेतुतयाऽपदर्शितस्थले तादृशज्ञानाभा
वेनऽपदर्शितापत्तेरसम्भवात्। एतेन जातित्वेन ब्राह्मणत्वज्ञानकाले स्वरूपतो ब्राह्मणत्वप्र
कारकशाब्दबोधापत्तिरपि निरस्ता। स्वरूपतो ब्राह्मणत्वप्रकारकशाब्दत्वावच्छिन्नं प्रति
स्वरूपतो ब्राह्मणत्वप्रकारकपदार्थोपस्थितेः हेतुत्वकल्पनेनैवऽपदर्शितापत्तेरसम्भवा
त्। एवं च पदतो ब्राह्मणत्वप्रकारकप्रत्यक्षं प्रति स्वरूपतो ब्राह्मणत्वज्ञानत्वेन हेतुतायाऽभा
वेन ब्राह्मणत्वनिर्विकल्पकं विनापि स्वरूपतो ब्राह्मणत्वप्रकारकप्रत्यक्षोपपत्तौ ब्राह्म
णत्वस्य सविकल्पकमात्रवेद्यत्वासिद्धौ नो निरवद्य एव। अदृष्टविशेषजन्यतावच्छेदकब्राह्म
णत्वे तु ननु तथासिद्धान्तरीत्या नानुपपत्तिः। न नु तथापि ब्राह्मणे चक्षुःसंयोगदशायां स्वरूपतो
ब्राह्मणत्वज्ञानाभावकाले च चक्षुःसंयुक्तसमवायरूपकारणबलात् ब्राह्मणत्वविषयता

सासं
९४
९५

संबंधेन द्रव्यसमवेतत्वाद्दृष्टापत्त्याफलतो ब्राह्मणत्वनिर्विकल्पकापत्तिर्दुर्वारैवा न च चक्षुः
संयुक्तसमवायेन फलेजननापेविशुद्धमतापितृजत्वज्ञानस्यापिसहकारित्वाभ्युपगमा
ज्ञानुपपत्तिरिति वाच्यं तादृशसहकारित्वं विनापि द्रव्यत्वादावुत्पादितफलचक्षुःसंयुक्तस
मवायरूपकारणबलाद्ब्राह्मणत्वनिर्विकल्पकापत्तेर्दुर्वारत्वादिति चेन्न ब्राह्मणत्वभिन्न
वृत्तिविषयतासंबंधेन ज्ञानं प्रति ब्राह्मणत्वभेदत्वेनापि हेतुतायाः अन्यत्र प्रदर्शितावश्य
कल्पनया अनुपपत्तिविरहात् तथा हि संयुक्तसमवायेन फलेजननापेविशुद्धमातापि
तृजत्वज्ञानब्राह्मणत्वभेदान्यतरस्य सहकारित्वमभ्युपगम्यते एवं च विशुद्धमातापित
जत्वज्ञानशून्यकाले चक्षुःसंयुक्तसमवायरूपकारणबलान्न ब्राह्मणत्वप्रत्यक्षत्वापत्तिर्ने
दानतथाविधान्यतररूपसहकार्यभावादित्यधिकमस्मत्कृतब्राह्मणत्वजातिविचारे अ राम
संक्षेपाद्दृह्यनुविस्तरभियान लिखितमिति नन्नमहेश्वरसिद्धान्तसहकृतादृष्टार्थाभिः ॥ ९४

ह्मणाडस्योत्पन्नं तं नस्माद्दृत्ते प्रजापत्यादिसृष्टिहस्य च तेश्वरस्य क्वचित्सिद्धेरेव संगच्छते यदिदं श्चे
श्वरे प्रमाणमस्तीति देवं तु न पश्याम इति चेन्न। अनुमानस्यैव तत्र प्रमाणत्वात्। तथाहि
शरीरानपेक्षोत्पत्तिकं बुद्धिमत्पूर्वकं कार्यत्वात् घटवत्। इत्यनुमानमाश्वासाधकं अत्र
अनपेक्षोत्पत्तिकत्वं शरीराजन्यत्वविशिष्टजन्यत्वं न चात्र जन्यत्वमात्रं पक्षतावच्छेदक
मस्तु इति वाच्यं घटादावंशतः सिद्धसाधनापत्तेः। न च पक्षतावच्छेदकावच्छेदेन साध्य
सिद्धेरुद्देश्यत्वात् अंशतः सिद्धसाधनं न दोषायेति वाच्यम्। प्राचीननये पक्षतावच्छेदका
वच्छेदेन साध्यसिद्धावंशतः सिद्धसाधनस्य दोषत्वात्। न च तथापि शरीराजन्यत्वमात्रं पक्ष
तावच्छेदकमस्तु किं तत्र जन्यत्वनिवेशनेनेति वाच्यम्। आकाशादौ बाधापत्तेः।
न चात्राकुरत्वमेव पक्षतावच्छेदकमस्त्विति वाच्यम्। तथासति द्व्यणुकादिकं पक्षीकृ
त्य सकर्तृकत्वसाधनानुमानकल्पने गौरवात्। न चैवमपि नरणरूपादेरसंग्रह इति वा

सा.स. ७५ 95

स्यमात्तावत्त्वाद्वैतेरभावात्॥ न चैवं सति तत्र व्यभिचारसंदेहान्नैतदनुमानावताराऽसंभवतीति
वाच्यम्। अनुकूलतर्काभावविशिष्टव्यभिचारसंशयस्यैव व्याप्तिग्रहविघटकतया प्रकृ
ते वक्ष्यमाणानुकूलतर्कसत्त्वेन अनुपपत्त्यभावात्। नवीनास्तु अवच्छेदकावच्छेदेन साध्य
सिद्धावंशतः सिद्धसाधनस्य दोषत्वे मानाभावेन प्रकृते जन्यत्वमेव पक्षतावच्छेदकम्
। न चैवं सति पक्षतावच्छेदकस्य हेतुत्वापत्तिरिति वाच्यं स्वरूपसंबंधात्मकजन्यत्वस्य
हेतुतया प्रागभावप्रतियोगित्वरूपजन्यत्वस्य च पक्षतावच्छेदकतया अनुपपत्त्यभावादित्याहुः॥
बुद्धिमत्पूर्वकत्वं चात्र सोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्। अत्र नित्यज्ञाना
दिप्रामाण्यवत्कथं सिद्ध्यतामिति तु नाशंकनीयं यतः शरीराजन्यत्वविशिष्टजन्यतारूपपक्षतावच्छे
दकविशिष्टतया विधज्ञानादिमज्जन्यत्वसिद्धौ तत्पक्षधर्मताबलात्तथाविधानित्यज्ञानादिम
ज्जन्यत्वमादाय पर्यवस्यतीत्यभ्युपगमस्यावश्यकत्वात् न तु पक्षधर्मता चात्र ज्ञानादेर्नित्यत्वके एम ७५

लाघवमित्यादिलाघवज्ञाने ज्ञानएवऽपदर्शितानुमानादीश्वरएकत्वमपिसिद्धमितितथा
विधज्ञानादिमतःएकत्वेलाघवमितितिलाघवज्ञानस्यापिप्रकृतेसंभवात्तएकत्वंचात्रत
थाविधज्ञानादिमहत्त्वभेदाप्रतियोगित्वंतथाचऽपदर्शितनानाविधलाघवज्ञानसहका
रेणोपदर्शितानुमानात्तथाविधनित्यज्ञानादिमहत्त्वभेदाप्रतियोगिनित्यज्ञानादिमत्त्वस्य
त्वसिध्यन्नानिमित्तार्थः। नचैवमपिईश्वरस्यसार्वज्ञमसिद्धं।ऽपदर्शितानुमानाद्यावदुपादान
गोचरज्ञानसिद्धावपिरूपत्वादिविषयकज्ञानासिद्धेःइतिवाच्यम्।ऽपदर्शितानुमानादी
श्वरस्यसर्वविषयकज्ञानवत्त्वासिद्धावपियःसर्वविषयज्ञानमयंतपरस्यादिश्रुतितएवत
त्सिद्धेः। नचैवमपिश्रुतितएवईश्वरसिद्धौव्यर्थमनुमानमितिवाच्यम्।उपायस्यउपायांतरा
षकत्वात्इति। नचानुकूलतर्काभावान्नव्याप्तिसिद्धिःइतिवाच्यम्।कार्यत्वावच्छिन्नंप्रतिउपा
दानविषयकप्रत्यक्षत्वेनचिकीर्षात्वेनकृतित्वेनचकारणताया एवात्रानुकूलतर्कत्वात्।

सा॰सं॰ ९६ 96

अनन्यथासिद्धान्वयव्यतिरेकानुविधानबलादुपदर्शितकार्यकारणभावस्यावश्यकत
पाकस्यापि शंकापानाकाशादिति। अत्र च कार्यतावच्छेदकसंबंधः समवायः कारणताव
च्छेदकसंबंधो विषयता यत्र यत्र समवायसंबंधेन कार्यं तत्रोपादानप्रत्यक्षस्य विषयतया
सत्वनियमात्। न चान्वयव्यतिरेकानुविधानबलात् घटत्वादिकमेव कृत्यादिजन्यतावच्छे
दकमस्तु तथा चक्कोपदर्शितानुमाने अनुकूलतर्कावकाश इति वाच्यम्। अनंतघटत्वप
त्वादिकमपेक्ष्य लाघवेन तत्र कार्यत्वस्यैव जन्यतावच्छेदकत्वौचित्येनानुपपत्तिविरहादिति
पन्नु अस्तु विशिष्य घटत्वपटत्वाद्यवच्छिन्नं प्रति उपादानादिगोचरकृतित्वादिना हेतुतात
थापि चरः कृतिमज्जन्यः घटत्वादिसमानाधिकरण्यसिद्धप्रत्यक्षहेव तत्र कुलालादिजन्यत्वबा
धात् पक्षधर्मताबलादेवेश्वरसिद्धिरावश्यकत्वादिति तदपि नायतो घटपटादिरूपकार्यप्र
तिउपादानकृतित्वेनैव हेतुत्वात्। अपि तु कपालद्वयादिसंयोगद्व्यणुकपालद्वयादिसंयोगानुकू

राम ९६

लकृतिनः कपालद्वयसंयोगोत्पत्ताविव घटोत्पत्तेः तत्पाचत्रावस्थितकपालद्वयसंयोगद्वारा कु
लालादिकृतित्वेन एव घटपटादिकार्यमनिर्वाहेन पक्षधर्मताबलात् उपदर्शितानुमानाद्वाश्व
रसिद्धिः । न चैवमपि पाकेन पत्रघटारम्भकजन्यावयवानां सर्वेषां नाशः । तद्वद[illegible]सघ
त्वहेतुककृतिमज्जन्यत्वसाधकानुमानाद्वाश्वरसिद्धिः नैवं तत्र हि एवं तत्र उपदर्शितरसाकु
लालकृतिजन्यत्वासंभवेन पक्षधर्मताबलाद्वाश्वरसिद्धेरावश्यकत्वादिति वाच्यम् । एवमस
तितादृशघटपक्षीकृत्य सदृशजन्यत्वसाधकघटत्वहेतुकानुमानबलात् तत्सदृशजन्यत्व
बाधेन तत्र पक्षधर्मताबलान्नित्यसदृशजन्यत्वस्यापि सिध्यपत्तेः । पटादिच सामान्यतो घटत्वाव
च्छिन्नं प्रति न दृष्टत्वेन हेतुनाप्यनुपाकजघटोत्पत्तौ परत्वात् तत्र जातिविशेषविशिष्टघटं प्र
ति तथात्वेऽन्यपाकजघटोत्पत्तौ घटे व्यभिचारात् तथा चानुकूलतर्कविरहात् उपदर्शिता
नुमानात् तत्र नित्यसदृशजन्यत्वसिद्धिरिति विभाव्यते । तदानादृशजातिविशेषस्य कर्तोऽपि

सास जन्यतावच्छेदकत्वोपगमेनउपदर्शितानुकूलतर्कविरहेण ईश्वरासिद्धिरशक्येति। तस्मात्स्वा
९७ पवात्कार्यत्वावच्छिन्नप्रतिकृतित्वेन हेतुतांकल्पयित्वा कार्यत्वहेतुकेन तथाविधकृतिमज्ज
97 न्यत्वसाध्यकानुमानबलादीश्वरसाधनायोनत्वन्यथेति निर्व्यूढं। यतउपदर्शितानुमाना
दपि नेश्वरासिद्धिसात्रहेतोर्विशेषविरुद्धत्वेन अनुमित्युत्पादासंभवादितितदपि नवि
चारसहं। तथाहि। अत्र विशेषविरोधपदार्थः पक्षवृत्तिहेतौदृष्टान्तवृत्तिधर्मविशेषासर्व
ज्ञपूर्वकत्वसामानाधिकरण्यपक्षानाभावाद्यासिपक्षधर्मतयोक्ता नहेतौदृष्टान्तवृत्तित
थाविधधर्मविशेषव्याप्यत्वाबाधा। नाद्यः। तथाविधसामानाधिकरण्यपक्षानस्य व्याप्यग्राह
कत्वेतान्तविरोधाभावात्। नान्त्यः। दृष्टान्तवृत्तिसर्वज्ञपूर्वकत्वरूपधर्मविशेषव्याप्यत्वस्य
कार्यत्वरूपहेतावनभ्युपगमादिति। न च नोक्तोभयान्यतरो विशेषपदार्थः अपितु जन्यसा राम
नमन्तमोम्यनित्यत्वज्ञानत्वयोःसामानाधिकरण्यं तथा च तादृशसामानाधिकरण्यपक्षो ९७

नरूपप्रतिबंधकसत्वेज्ञानत्वविशिष्टेनित्यत्वासिद्ध्यानोपदर्शितानुमानादुपदर्शितता
सानित्यज्ञानादिमज्जन्यत्वसिद्धिरितिवाच्यम्। पदार्थादिकमंतर्भाव्यनित्यत्वमूर्तत्वयो
रसामानाधिकरण्यरूपविरोधज्ञानंपक्षानित्यत्वविशिष्टमूर्तत्वसिद्धिप्रतिबंधकं
तथानप्रकृतेपिजन्यज्ञानमंतर्भाव्यऽन्योविरोधज्ञानंज्ञानत्वविशिष्टेश्वरज्ञानेनित्य
त्वसिद्धिप्रतिबंधकमित्यस्यापिसुवचत्वात् अन्यथाद्व्यणुकसमवायिकारणंमूर्तंका
र्यद्रव्यसमवायिकारणत्वात् इत्यनुमानाद्द्व्यणुकसमवायिकारणस्यनित्यत्वविशि
ष्टमूर्तत्वविशिष्टेलाघवमितिलाघवज्ञानसहकृतस्यमानात् नित्यत्वविशिष्टमूर्तत्व
सिद्धेरप्यनुपपत्तेः। नचैवंसतिविशेषविरुद्धोदाहरणंदुर्लभमितिवाच्यम्। हेतुताव
च्छेदकावच्छिन्नहेतौसाध्यतावच्छेदकावच्छिन्नसाध्यासामानाधिकरण्यस्यविरोधप
दार्थतयाऽयंचेदनजदहनवान्अभिधूमवत्वात् इत्यादावेवउदाहरणसंभवात्।

सास
९८
९८

नन्वेवमपि व्यापकाभावेन व्याप्याभावसिद्धावबाधान्नोपदर्शितानुमानद्वयस्यासिद्धिरि
ति चेन्न। कीदृशव्यापकाभावेन कादृशव्याप्याभावसिद्धावबाधऽभ्युपगते न तावत्कर्त्तृसे
व्यापकशरीरित्वाभावेन ईश्वरे कर्त्तृत्वाभावसिद्धौ तथा ईश्वरासिद्धिदशायामाश्रया
सिद्ध्या तथा वक्तुमशक्यत्वात्। न चात्र बाधविरहेऽपि कार्यत्वव्यापकशरीरकर्त्तृकत्वा
भावेनाङ्कुरादौ कार्यत्वाभावसिद्ध्या स्वरूपासिद्धिः ज्ञानस्यान्नामित्यनुसादप्रयोजक
स्याविषमाननयाकर्षतन्त्रानुमितिरितिवाच्यम्। अननुभूयमानकार्यताकस्याङ्कुरा
दौ व्यभिचारज्ञानेन शरीरकर्त्तृत्वे कार्यत्वव्यापकताज्ञानासंभवेनाननुकूलतर्का
भावेन तथा साधयितुमशक्यत्वात्। न त्वत्र बाधविरहेऽपि शरीरेणानपेक्षोत्पत्तिकं अ
कर्त्तृकं शरीरापेक्षकर्त्तृकत्वात् गगनवत् इत्यसाधितासत्प्रतिपक्षोऽहेतुरेवेति चेन्नात्राश्रया एम
ऽरि विशेषणास्यव्यर्थत्वात्पदि च व्यर्थविशेषणतास्थले व्याप्यत्वासिद्धेरेव परं त्वाधिक्ये ९८

न्मावादीनिग्रहात्तोभवतीत्युच्यतेतथापिप्रकृतेऽनुकूलतर्काभावेनव्याप्तिग्राहकाभा
वात्तथाविधसत्प्रतिपक्षासंभवएवेति।अतएवउपदर्शितानुमानेशरीरजन्यत्वंउपाधि
रितिपरास्तं।अत्रशरीरजन्यत्वेसकर्तृकव्यापकताग्राहकानुकूलतर्काभावेनसाध्यव्या
पकत्वविशिष्टसाधनाव्यापकत्वरूपोपाधिकत्वनिश्चयासंभवात्ननुतथोक्तेश्वरासत्वात्।
ननुअक्षितिःशरीरकर्तृकार्यसमर्थकश्चित्तधर्माविलक्षणातेनारणपादोचुल्यादिके
दृष्टशरीरेणाकेनचिदिदंकृतमितिबुद्धिस्तत्कर्तृत्वदर्शनेऽसपक्षत्वसच्चधर्मोजातिरुपा
धिर्वास्त्वन्यदेतत्तथाचतादृशधर्मविशिष्टंप्रसवकृतित्वेनहेतुत्वनतुकार्यत्वाव
च्छिन्नंप्रसपितथाप्रमाणाभावात्।तथाचानुकूलतर्काभावान्नोपदर्शितानुमाना
दीश्वरसिद्धिरिति।तत्रातथाविधविलक्षणधर्मेमानाभावेनतथात्वकुमशक्यं
त्वाज्ञानचतादृशधर्मविशेषेमानाभावेकथमरणिपेचुल्यादिदर्शनानन्तरंतत्वशरी

सा॰सं॰ कर्तृकत्वानुमानमितिवाच्यमानादेशाद्धर्मविशेषाभावेऽपि तत्र चेष्टात्वादिना शरीरि
९८ कर्तृकत्वानुमानसंभवात् न चानुकूलतर्काभावान्नैवमितिवाच्यम् अनिरूपध्यत्वपस
११ हचारस्यैवानुकूलतर्कत्वात् अन्यथा जासादिनासन्नाद्यनुमानमपि न स्यात् तस्मा
त्त्वाद्यवान्त्कार्यत्वावच्छिन्नप्रत्येव कृतित्वेन हेतुताकल्पनस्यावश्यकतया अनुकूल
तर्कसत्त्वादुपदर्शितानुमानेनेश्वरप्रसिद्धिर्निष्प्रत्यूहैवेति। नन्वेवमपि प्रदर्शितो
मानात्कथं नित्यसत्तानादिमज्ञत्वसिद्धिः विशिष्टबुद्धिं प्रति विशेषणज्ञानत्वेन हेतु
तया नित्यज्ञानादिरूपविशेषणज्ञानाभावेन तथानुमित्यसंभवादिति चेन्न। यतः सामा
न्यतो विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानत्वेन न हेतुता विशिष्टबुद्धित्वादे
रुगतस्याभावात् अपि तु कदाचित्स्वरूपतो घटत्वादिविशिष्टबुद्धित्वसघतो कदाचि राम
ज्जातित्वेन विशिष्टबुद्धित्वेनान्वर्बाहार्थस्वरूपतो घटत्वादिजातिविशिष्टप्रतीत्व ९८

पत्तापचरत्वादित्यादिनातित्ज्ञानत्वेनैव हेतुताकल्पतो न तु जसपातीति क्रिपदार्थमंतर्भाव्यापित
या कार्यकारणभावः कल्प्यते प्रमाणाभावादेवं च प्रकृते निरुक्तज्ञानादिमद्धिशिष्ट
हि प्रति निरुक्तज्ञानादित्वेन हेतुतापाश्चभावेन ज्ञानादिमज्जन्यत्वव्याप्यकार्यत्वव
धारणं न पिष्टोसन्निकमिति । सामान्यधर्मावच्छिन्ननिरूपितव्याप्यवगाहिप्रणम
शांडपदर्शितलाघवज्ञानादिसहकृतात्तन्निरुक्तज्ञानत्वादिप्रकारकनिरुक्तज्ञानादि
मज्जन्यत्वरूपविशेषसिद्धौ न किंचिद्बाधकं लाघवज्ञानादिबलाद्व्यापकतावच्छे
दकत्वेनाग्रहीतधर्मस्यापि अनुमितौ भानस्य तथा विधसंशयानुत्पत्त्यासर्वसम्मतत्वाद्व्यापि
ततयाप्रकृते ज्ञानत्वादिप्रकारकज्ञानादिमज्जन्यत्वत्वादिना व्यापकताग्रहे पि निरु
ज्ञानत्वादिना निरुक्तज्ञानादिमज्जन्यतानुमितौ अनुपपत्त्यभावादिति । यत्तु पदसामान्य
धर्मावच्छिन्ननिरूपितव्याप्तिज्ञानादपि विशेषसिद्धिरिति मतं तदाग्रहमात्रं ।

सासं १०१

णत्वादित्यनुमानादेव रूपापांपृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितत्वासिद्धेः रूपाप
थिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिता पृथिव्याद्यष्टानाश्रितत्वे सति द्रव्याश्रितत्वा
त् इति केवलव्यतिरेकिणो नातिरसन्नापत्ते न केवलसामान्यधर्मावच्छिन्नव्याप्तिज्ञा
ज्ञानादेव विशेषधर्मावच्छिन्नासिद्धिः यतः केवलव्यतिरेकिवैयर्थ्यं। अपि तु लाघव
ज्ञानसहकृतात्तस्मात्तथा च पक्षनतथाविधलाघवज्ञानाभावनात्। तत्र अष्टद्र
व्यातिरिक्तद्रव्याश्रितत्वरूपेण तथाविधस्य अनुमितस्य पक्षधर्मत्वेऽपदर्शितकेवलव्यति
रेकावसरस्यावश्यकत्वेति विलक्षणा अस्मत्कृतेश्वरवादविचारे अनुसन्धेयः। इदा
नीं आकाशनिरूपितत्रैविध्यमुच्यते।। तत्र आकाशत्वसकलातेन न तत्रत्रेता
भेदानुमानसंभवात्। आकाशसंज्ञाकालत्वं च आकाशसंज्ञावाचकत्वं संज्ञा
च संकेतितं प्रातिपदिकं सा त्रिविधा नैमित्तिकी औपाधिकी पारिभाषि एम १००

कीमेतत्ता।तत्रजातिप्रवृत्तिनिमित्तिकासंत्ता।नैमित्तिका।पष्याहृपादिसंत्ताऽपा
धिप्रवृत्तिनिमित्तिकासंत्ताऽपाधिकी।पष्यापश्चादिसंत्ता।प्रवृत्तिनिमित्तसंत्ताऽन्यापारि।मा
धिकापपा।आकाशादिसंत्ता।एतेनआकाशादिसंत्तापा।अभावात्आकशत्वसंत्ता
कव्यत्वाप्रसिद्धकथमाकाशसंत्तावाच्यत्वमाकाशनिष्ठमितएवैधर्म्यमितिनिएंका
निल्ला।ननुआकाशादिसंत्ताकथंप्रवृत्तिनिमित्तमन्यपित्तिचेत्तदवेहि।प्रवृत्तिनिमि
त्तनावद्धाच्यत्वेसतिवाच्यवृत्तित्वेसतिवाच्योपस्थितिप्रकारः।एवंकेतेनादृशाधर्म
भावेनप्रवृत्तिनिमित्ताभावादाकाशादिसंत्ताप्रवृत्तिनिमित्तमप्रसिद्धमेतेनचाकाश
त्वजातिरेवतस्यास्त्वितिवाच्यम्।एकव्यक्तिवृत्तित्वेनतस्यजातित्वाभावात्।नचशब्दा
श्रयत्वमेवतस्यास्त्वितिवाच्यम्।आकाशपदात्कदाचिच्छब्दाश्रयत्वेनकदाचिद्रूप
रव्यातिरिक्तद्रव्यत्वरूपेणआकाशोपस्थितौशब्दाश्रयत्वेनाकाशपदान्नियतोपास्थि

सासं

१०१

101

समवायवच्छिन्नप्रत्वेऽप्याकाशपदप्रवृत्तिनिमित्तत्वासंभवात्। अत एव कुपदाशिनप्रवृत्ति
निमित्तत्वलाभो वा व्यक्तित्वसत्तातिविशेषणं। वा व्यावृत्तित्वसत्ता। न विशेषणं तु आकृतिवा
एणपसाद्धासंबंधेन वा व्यावृत्तित्वार्थकं जात्याकृतिव्यक्तयः पदार्थ इति सूत्रेण प्रतिपादि
तायाः घटादिपदशक्तिकायाः कृतेरवयवसंयोगरूपायाः स्वाश्रयसमवेतत्वरूपपरंपरासं
बंधेन घटपदशक्या घटवृत्तित्वादिति दध्यादौ दधिपदशक्यतावच्छेदकत्वप्रसंगवारणा
य वाच्योपस्थितिप्रकारत्वविशेषणं। न च सर्वविशेषणादानेपि दध्याकृत्यादौ अतिव्या
प्तिर्दुर्वारैवेति वाच्यं। वाच्यवृत्तित्वसत्तासम्पर्यावच्छ्वाच्यवृत्तित्वसत्तात्पर्यकत्वेनानुप
लम्भावात्। वस्तुतस्तु दध्याकृतिर्न दधिपदवाच्या जातिव्यंजकाकृतीनामेव पदवाच्य
त्वात् न दधित्वादिस्तु स्वविशेषणंसांपाः अत एव घटानामतिदधित्वकाधत्वसंदेहे स्वविशेषणग्र राम
हान्न त्रिगसर इति मीश्राः। न चैवं क्रमेणाकाशपदशक्यतावच्छेदकाभावे आकाशत्वमि १०१

त्यत्रभावप्रत्ययार्थोऽनुपपन्नः। न तत्पदप्रवृत्तिनिमित्तस्यैव तत्पदोत्तरभावप्रत्ययार्थत्वादि
तिवाच्यम्। सप्रवृत्तिनिमित्तपद एव तादृशनियमाभ्युपगमेन एतत्त्वस्यापि तत्पदोत्त
रभावप्रत्ययस्य तत्सदृशाकाशत्ववृत्तिधर्म्मबोधकत्वेनानुपपत्त्यभावात् न चाकाशप
दस्यानवच्छिन्नशक्तिस्वीकारे आकाशपदात् कदाचिच्छब्दाश्रयत्वेनाकाशोपस्थिति
कदाचिदष्टद्रव्यातिरिक्तद्रव्यत्वेन तदुपस्थितिरिति तत्र नियामकाभाव इति वाच्यम्। श
ब्दाश्रयत्वाद्युपलक्षिते आकाशपदनिरूपितशक्तिज्ञानस्यैव शब्दाश्रयत्वादिनाऽऽ
काशोपस्थितिजनकत्वेनानुपपत्त्यभावादिति संप्रदायविदः। नव्यास्तु शब्दाश्र
यत्वविशिष्ट एवाकाशपदशक्तिरतः शब्दाश्रयत्वमेवाकाशपदशक्यतावच्छेदकं
अन्यथा गोपदस्यापि निरवच्छिन्नशक्त्यापत्तेः। न च गोपदान्नियतगोत्वप्रकारकोपस्थि
तिस्तेन गोपदस्य गोत्वविशिष्टे शक्तिर्गोत्वमेव तच्छक्यतावच्छेदकमिति वाच्यम् प्रकृ

सा॰सं॰
१०२
102

तेपितादृशपुरुषेऽजोगह्यकत्वात्। न चाकाशपदात्कदाचिद्दृष्टद्रव्यातिरिक्तद्रव्यत्वेनाप्याका
शोपस्थितेः। शब्दाश्रयत्वेनाकाशस्यानिपतोपस्थित्यसंभवान्नोपदर्शितपुरुषेत्तोल्यमिति
वाच्यम्। आकाशपदात् शक्त्या शब्दाश्रयत्वेनैवोपस्थितिर्निपतालक्षणापातु कदाचिद
दृष्टद्रव्यातिरिक्तद्रव्यत्वेनोपस्थितिर्नेतु शक्त्यापि सेत्यभ्युपगमात्। न च विनिगमनावि
रहान्नैवमिति वाच्यम्। शब्दाश्रयत्वापेक्षया दृष्टद्रव्यातिरिक्तद्रव्यत्वस्य गुरुत्वात् शब्दाश्र
यत्वस्यैवाकाशपदशक्यतावच्छेदकत्वे लाघवस्यैव विनिगमकत्वात्। न च शब्दाश्रयत्वं ना
म शब्दः एव तथा च शब्दस्यैकत्वे कालादिभेदेनानन्त्यात् शक्यतावच्छेदकानन्त्यादाकाश
पदस्यानन्तशक्तिकल्पनापत्तिरिति वाच्यम्। अत्र शक्यतावच्छेदकानन्त्येपि शक्यतावच्छे
दकतावच्छेदकाभेदेन शब्दत्वस्य शब्दनिष्ठशक्यतावच्छेदकतायाः एकत्वेनानन्तशक्तिकल्प राम
नापत्त्यभावात्। शक्यतावच्छेदकताभेदेनैव शक्तिभेदाभ्युपगमात्॥ न च कत्वादिविशिष्ट १०२

स्याकाशपदशक्यतावच्छेदकत्वमात्मपदविनिगमनाविरहादिति वाच्यम् । आकाशपदात्
केत्वविशिष्टाश्रयत्वेन बोधस्यानुभवविरुद्धत्वात् । न चैवं सति पुनः आकाशशब्दाश्रय
आकाशशब्द इति सहप्रयोगानुपपत्तिरिति वाच्यम् । पिकः कोकिल इतिवत् कोकिल
पिकपदवाच्य इतिवत् तादृशवाक्यादपि शब्दाश्रय आकाशपदवाच्य इति बोधाभ्यु
पगमेन तथाविधसहप्रयोगोपपत्तेः । न चैवं सति आकाशस्य त्वोपाधिकत्वेन पा
रिभाषिकत्वापत्तिरिति वाच्यम् । प्रजातीया वा अननुगतोपाधीनां शक्यतावच्छेदकत्वे तत्रैव
संज्ञापारिभाषिकत्वस्य मुनिपरिगमेनानुपपत्तेः भाव इति प्राञ्चः । परं तु आश्रयत्वमवापि
त्वमेवं घेनशब्दत्वमेवाकाशपदशक्यतावच्छेदकमिति तन्न । तथा सति आकाशो द्रव्य
मितिवत् शब्दो द्रव्यमित्याकारकबोधापत्तेरिति केचित् । तन्न । आकाशपदस्यानिर्वाच्छिन्न
वशान्निर्विकल्पकाकाशपदान्निर्विकल्पका आकाशस्मृतिः निर्विकल्पकात्मकशाब्दबोधापि

सा॰सं अत एव वास्तुवापदेऽपि निर्विकल्पकमिति प्रवादोपालापः । एवं शब्दवत्त्वमपि आकाशत्वे धर्म्म
१०३ तेनापि तत्र तदितरभेदानुमानसंभवात् अत एव संख्यापरिमाणपृथक्त्वसंयोगविभागश
ब्दाः आकाशगुणा इत्यनेनाकाशगुणमध्ये शब्दोत्कीर्त्तनमपि संगच्छत इति । ननु आकाशे
103 प्रमाणसम्भाव एव सर्वमिदं संगच्छते न हि वनपश्याम इति चेन्न । उपपत्या तत्र प्रत्यक्षप्र
माणाभावेऽपि अनुमानप्रमाणस्य तत्राक्षतत्वात् । तथा हि । शब्दो न स्पर्शवद्विशेषगुण
त्वाभावसिद्धौ प्रतिनियतबहिरिन्द्रियग्राह्यत्वेन सामान्यगुणत्वाभावसिद्धौ च तदुभयपु
विशिष्टगुणत्वेन स्पर्शवदन्तिभिन्नत्वसिद्धौ बहिरिन्द्रियग्राह्यगुणत्वादिनात्मादिवृत्ति
त्वसिद्धौ प्रत्यक्षत्वेन तत्र कालाद्यवृत्तित्वसिद्धौ सामान्याश्रयत्वविशिष्टप्रतिनियतब
हिरिन्द्रियग्राह्यत्वेन तत्र गुणत्वसिद्धौ च स्पर्शवद्विशेषगुणान्यकालादिचतुष्टयवृत्तिश राम
ब्दो द्रव्याश्रितो गुणत्वादिसमनुमानादाकाशसिद्धिः । अत्र स्पर्शवद्द्रव्यसमवेतत्वमादाय १०३

र्थान्तरवारणाय पक्षतावच्छेदककोटौ स्पर्शवद्विशेषगुणभिन्नत्वनिवेशः कालादिवृत्ति
त्वमादायार्थान्तरवारणाय तत्रैव कादिचतुष्टयावृत्तित्वनिवेशः ननु शब्दो न स्पर्शवद्वि
शेषगुणः प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वात् यावद्द्रव्यभावित्वहेत्वादौ किमकारणगु
णपूर्वकत्वं किं वा अयावद्द्रव्यभावित्वमिति चेदत्राकारणगुणपूर्वकत्वं च अकारणगु
णजन्यं पाकजन्यत्वभिन्नत्वं अयावद्द्रव्यभावित्वं च यद्वा अपनाशजन्यनाशप्रतियोगियावद्
द्विन्नत्वमित्येवेति। उपदर्शितानुमाने हेतुतावच्छेदककोटावेतन्निवेशश्च घटरूपादिसम
वेतरूपादौ व्यभिचारवारणाय न च न्यायपिप्रत्यक्षत्वे सतीति विशेषणात् तत्र व्यर्थमिति वा
च्यं मापरमाणुरूपादौ व्यभिचारवारणाय न तस्यार्थकत्वात् न चैवमपि पाकजघटरूपादौ
विरूपे व्यभिचारो दुरुद्धर इति वाच्यं मायवैशेषिकमते अवयविनि पाकानभ्युपगमात् पाक
जभिन्नत्वे सतीति विशेषणात् ह्यानचानकत्वनकोभावाद्रूपजकमिदमनुमानमिति

सा.से.
१०४
104

वाच्यमापन्नः शब्दस्य स्पर्शवद्विशेषगुणत्ववादिना शब्दः शंखमेघादिगुणेन वाच्यः दाहस्य
शंखादिजन्यशब्दस्य लेशदृष्टस्य हृदयस्य पुरुषप्रत्यक्षत्वप्रसंगात्तदाश्रयत्वेनाभिमत
शंखादिना सहदूरस्थपुरुषीयश्रोत्रेन्द्रियेणासंबंधात् आश्रयासंबद्धेनेन्द्रियेण गुणादिग्रहे
णातिप्रसंगात् किं च तस्य शंखादिरूपनिमित्तकारणमपहाय पद्मानगुणत्वेनानुपपत्तिः
शंखादिरूपनिमित्तकारणाजन्यशब्दः वीचीतरंगन्यायेन शब्दांतरं उत्पादयति तेन च तत्र शब्दांत
रं एवं रीत्या कर्णशष्कुल्यवच्छिन्ननभोदेशरूपश्रोत्रेन्द्रियेऽन्त्यः शब्दः श्रोत्रेन्द्रियेण गृह्यते
तस्य तादात्म्येन स्वसंबंधित्वात् तथाविधशब्दाश्रयस्याश्रयस्य श्रोत्रेन्द्रियसंबद्धत्वे
न श्रोत्रेन्द्रियेण तथाविधशब्दग्रहसंभवात् अतएव वीचीतरंगन्यायेन शब्दोत्पत्तिरिति
भवाद्योपि तदर्थस्तु यथाप्राप्यानि कपालानि पयः संयोगादुत्पन्नस्तरंगः सर्वदिक्षु तद्वत्संजाय
यत्र संतानरमेकं तन्न्वितं जातापान्तरंगमेकं उत्साहयति तथा शंखादिरूपनिमित्तकारणज

एम
१०४

न्यः शब्दः सर्वदिक्कस्स्वसजातीयशब्दान्तरं ततस्तेनापि शब्दान्तरमुत्पाद्यत इति तत्र प्रथमश
ब्दः शंखाद्याकाशसंयोगासमवायिकारणकः द्वितीयादिशब्दस्तु शब्दासमवायिकारणक
इति प्राप्यमाणवंशदलद्वयविभागजन्यशब्दस्थलेपि आद्यशब्दस्तथाविधविभागासम
वायिकारणकः द्वितीयादिशब्दस्तु शब्दासमवायिकारणक इत्यवधेयम्।आद्यन्तु शंखाद्या
त्मकनिमित्तकारणजन्यशब्दादपि कदम्बगोलकन्यायेन दश दिक्षु दश शब्दा उत्पद्यंते ते
भ्यः दशदिक्षु अन्ये दश शब्दा उत्पद्यंते इति मतं तत्र तद्दशशब्दकल्पने गौरवाच्च एवं शब्दत्व
व्याप्याः शंखमपापापातिप्रतीतेर्बोधकाभावेन तज्जातीयविषयकत्वभ्रमत्वस्य च
कल्पनायाः अन्याय्यत्वाच्च। न वा नाशस्तु। शब्दजशब्देनाभावः न चैवं सति उपदर्शितस्थले
शब्दग्रहानुपपत्तिरिति वाच्यम् उपदर्शितस्थले वायुसंयोगादिरूपनिमित्तकारणेनादि
वशादेकस्यैव शब्दस्य शंखकर्णोभयपार्श्वच्छेदेन उत्पत्तिस्वीकारेणानुपपत्त्यसंभवात्।

सास
१०५
105

नचैवंसतितत्रकेनचिद्घटस्तात्वेनगृह्यतेकेनचिच्चमंदत्वेनगृह्यतेएतेनरूपंसादितिवा
च्यं।एकएवशब्दःकेनचित्तारत्वेनदोषवशात्केनचिन्मंदत्वेनगृह्यतइत्यभ्युपगमात्।नचैवंस
तितत्रमंदत्वप्रतीतौभ्रमत्वकल्पनापित्तथाशब्दजमंदशब्दकल्पनमेवोचितमितिवा
च्यम्।यतःशब्दजशब्दकल्पनेऽप्रतिशब्दनिष्ठशब्दत्वादिजन्यतावच्छेदकंएकैवजातिःसिद्धा
यदिशब्दनिष्ठशब्दजन्यतावच्छेदकमपरमपरंचापद्यतातदाहिशब्दसाधारणीशब्दज
न्यतावच्छेदिका।एवंविजातीयशब्दंप्रतिशब्दस्यहेतुत्वमेकं।अपरंचविजातीयशब्दं
प्रतिशंखादित्वेनेतिजातित्रयकल्पनापित्तथाकार्यकारणभावद्वयकल्पनापित्तथा
चतत्रमंदत्वप्रतीतेर्भ्रमत्वकल्पनापि।एवन्याप्यत्वंएवंशब्दजशब्दजशब्दकल्पने
पत्रचैत्रापकवतालाघवमित्यभिधानप्रयुक्तेःएकःककारउत्पन्नःपश्चाच्छब्दजशब्दक्रमेण राम
मैत्रापकर्णावच्छेदेनापरःककारोजातःतत्रापिककारश्चैत्रायरसाकारकैमैत्रायप्र १०५

तात्तेर्थ्यमत्वकल्पनस्यावश्यकत्वात्तत्त्वमत्वकल्पनाद्वैपदोषस्योभयमतेतुल्यत्वं तस्मात्
शब्दकल्पने विज्ञातीयशब्दत्वावच्छिन्नं प्रतिशंखवादित्वेन कारणत्वमात्रं स्वीकार्यं चेत्तज्जा
तीयतोवच्छेदकं वैजात्यमात्रं कल्पनीयं शब्दजशब्दकल्पने तु पूर्वोक्तजातित्रयं तथा च
यकार्यकारणभावद्वयं च कल्पनीयमिति कल्पनीये च कार्ये तयोः कल्पनाद्वयस्य लघुत्वे
न शब्दजशब्दाकल्पनमेव समाचीनमित्याहुः। ननु भास्तत्पदर्शितयुक्त्या शंखवादिगुणः श
ब्दः वायुगुणस्तस्यादिति चेन्नज्ञातोसि।पत्तौ वाहिरेन्द्रियस्य स्वग्राह्यसजातीयविशेषगुणव
त्वनियमेन शब्दग्राहकेन्द्रियस्यापि शब्दवत्त्वेन वायुत्वमवश्यं वाच्यं तथा चैकजातौ बाहिरे
न्द्रियस्य परस्परविरुद्धजातिद्वयाश्रयप्रतिनियतेन्द्रियग्राह्यगुणद्वयग्राहकत्वनियमभंग
प्रसंगः। भवन्मते वायुजातीयेन्द्रियस्य त्वाविधस्पर्शशब्दोभयग्राहकत्वान्न चैतादृश
नियमे मानाभावः निवाच्यमन्तथासति घ्राणेन्द्रियासनेन्द्रियपोषपिष्टायवाजातीयत्वे

सासं॰ १०६ नैव निर्वाहः तत्र परस्परविरुद्धपृथिवीत्वजलत्वोभयजातिकल्पनस्यान्याय्यत्वात् । यदि चास्य
ग्राहकमिन्द्रियं जलस्य ग्राहकं द्रव्यत्वान्तरस्पर्शरसव्यञ्जकजलवदित्यनुमानात् रसनेन्द्रियस्य
जलत्वसिद्धौ रसनेन्द्रियघ्राणेन्द्रिययोः परस्परविरुद्धतथाविधजातिद्वयकल्पनमावश्यक
मिति विभाव्यते । तदा शब्दः स्पर्शग्राहकेन्द्रियजातीयाभिन्नबहिरिन्द्रियग्राह्यः स्पर्शान्यत्वे
सति बहिरिन्द्रियग्राह्यगुणत्वात् रूपवदित्यनुमानाच्छब्दे स्पर्शग्राहकेन्द्रियजातीयाभिन्न
बहिरिन्द्रियग्राह्यत्वसिद्धौ स्पर्शशब्दग्राहकबहिरिन्द्रिययोरपि परस्परविरुद्धधर्मद्वयक
ल्पनमावश्यकमिति कथं स्पर्शशब्दग्राहकबहिरिन्द्रिययोरेकजातीयत्वं तस्माच्छब्दस्य
वायुगुणत्वेनोपदर्शितयुक्त्या शब्दग्राहकेन्द्रियस्य वायुत्वापत्त्या शब्दो न वायुगुणस्तस्यव
श्यमुपपन्नमिति न चैतादृशयुक्त्या शब्दे स्पर्शवद्विशेषगुणत्वाभावसिद्धावपि बहिरिन्द्रि एम
यग्राह्यगुणत्वादिहेतुकानुमानात्तत्रात्मवृत्तित्वाभावसिद्धिरनुपपन्ना उपदर्शितानुमा १०६

नेऽनुकूलतर्काभावादिति चेन्न। आत्मगुणानां श्रोत्ररूपबाह्येंद्रियग्राह्यत्वे आत्मगुणग्रा
हकेंद्रियस्य मानसत्वनियमेन श्रोत्रेंद्रियस्य मानसत्वापत्त्या अनुकूलतर्कसत्त्वात्। एवं आत्मा
विषयकप्रसक्तविषयकगुणत्वहेतुक अनुमानबलादपि शब्दे आत्मावृत्तित्वसिद्धि
स्तथा शब्दस्य आत्मगुणत्वे आत्माविषयकप्रतीतिविषयत्वाभावापत्तेरस्य अनुकूल
तर्कस्यात्र सत्त्वे नानुपपत्त्यसंभवात्। वाणो बाधते इत्याद्याकारकात्माविषयकप्रसक्तेस्य
वसर्वानुभवसिद्धतया तत्र दोषापत्तेरसंभवात्। नन्वेवमपि प्रसक्तत्वहेतुकानुमानाद्दि
दिक्कालमनोः वृत्तित्वसिद्धिरनुपपन्ना। सत्तायां व्यभिचारेण तादृशानुमानस्यासंभवा
दिति चेन्न। गुणत्वविशिष्टप्रसक्तत्वस्य तत्र हेतुत्वेनानुपपत्त्यसंभवात्। तस्मादुपदर्शि
तानुमानैः शब्दस्याकाशातिरिक्तद्रव्यवृत्तित्वाभावसिद्धौ बाधकाभावेन तत्सिद्धौ गुण
त्वहेतुकोपदर्शितानुमानादाकाशसिद्धिर्निरप्रत्यूहैवेति दीधितिकृन्मतम्। शब्दस्य व

सासं हि। इंद्रियप्रत्यक्षविषयत्वेन आत्माविषयकप्रत्यक्षविषयत्वेन च जीवात्मगुणत्वमस्तु तत्रैश्व
१०७ रात्मगुणत्वे तु बाधकाभावः। न च तत्रापि तद्भयमेव बाधकमिति वाच्यम्। ईश्वरात्मगु
(१०७) णविशेषस्य तद्भयवत्त्वे बाधकाभावेन तथा वक्तुमशक्यत्वात्। न चैवं सति ईश्वरात्म
समवेतानित्यशब्दानामपि तथात्वप्रसंग इति वाच्यं तेषामतीन्द्रियत्वेन तथा वक्तुम
शक्यत्वात्। न चैवं सति श्रोत्रेंद्रियमनुपपन्नमिति वाच्यम्। कर्णशष्कुल्यवच्छिन्नेश्व
रात्मनः कर्णस्य वा श्रोत्रेंद्रियत्वेनानुपपत्त्यभावादित्याहुः। नन्व उपदर्शितप्रकाराका
सिद्धावपि तस्यैकत्वमसिद्धं तथा च एक एव आकाश इति प्रवादो व्याहन्येतेति चेन्न।
क्षितिः सकर्तृका कार्यत्वादित्यनुमानात् क्षितिकर्तुरेकत्वे लाघवमिति लाघवज्ञानेन क्षि
तिकर्तुरेकत्वमिव शब्दाश्रयस्यैकत्ववत्त्वे लाघवमिति लाघवज्ञानेन शब्दो द्रव्याश्रितो गम
गुणत्वादित्यनुमानादपि शब्दाश्रयस्यैकत्वसिद्धेः तत्पक्षानुपपत्त्यभावात्। लाघवज्ञा १०७

नादिस्थले व्यापकतानवच्छेदकतानवच्छेदकरूपेण विधेयमानस्य बहुषु व्यवस्थापितत्वा
दिति। एकत्वं चात्र शब्दवद्वृत्ति अन्योन्याभावप्रतियोगितानवच्छेदकैकवत्त्वं न तु सजाती
यद्वितीयरहितत्वं प्रकृते सजातीयद्वितीयाप्रसिद्ध्या तथा वक्तुमशक्यत्वादिति। न चाका
शस्यैकत्वे कर्णशष्कुल्यवच्छिन्ननभोरूपश्रोत्रेन्द्रियस्याप्येकत्वात्प्रतिपुरुषं श्रोत्रेन्द्रियभे
दो न स्यादिति वाच्यं। तत्तत्कर्णशष्कुल्यवच्छिन्ननभस्त्वेन तत्पुरुषीयश्रोत्रेन्द्रियपितृपा
धिभेदात्तद्रूपभेदेन श्रोत्रेन्द्रियभेदनिर्वाहात्। अत एव आकाशे एकपृथक्त्वमपि व्याख्या
तं मणिगगनस्यैकपृथक्त्ववत्त्वे लाघवमिति लाघवज्ञानसहकृतात्तद्गगनं एकपृथक्त्ववत्संख्या
वत्त्वादित्यनुमानात्तस्यापि तत्र सिद्धेः। न चापि प्रकृते शब्दवन्मात्रनिष्ठान्योन्याभावप्रतियो
गितावच्छेदकैकपृथक्त्वमविधेयमानं तु शब्दवन्मात्रवृत्तिद्वित्वपृथक्त्वाभाववत्त्वं न तु श
ब्दवन्मात्रवृत्तिद्वित्वपृथक्त्वाप्रसिद्धेः। न चोपदर्शितयुक्त्या आकाशे एककत्वे एकपृथक्त्वसिद्धाव

सा॰सं॰ ऽपि परममहत्परिमाणासिद्धिरनुपपन्ना। तथा आकाशादेः परममहत्परिमाणं साधर्म्यमित्यनुप
१०८ पन्नमिति वाच्यम्। विभुत्वान्न महानाकाशस्तथा चात्मेति क्वचिदाकाशस्य परममहत्परिमि
108 माणासिद्धिः। सूत्रार्थस्तु विभवो विभुत्वं सर्वमूर्त्तसंयोगित्वमिति यावत्। तस्मान्महान्महत्
परिमाणवानाकाश इति। परममहत्त्वस्याभावप्रधाननिर्देशेन परममहत्त्वन्न पार्थ
कत पा परममहत्परिमाणशब्दस्य परममहत्त्वात्मकपरिमाणरूपार्थोऽवसेयः। अथवा प
रममहत्तो द्व्यस्य परिमाणं महामहत्परिमाणं इति विग्रहात्तस्य महाश्रयेऽपि तत्त्व परममहद्द्रव्य
वृत्तिपरिमाणं परममहत्त्वपर्य्यवसन्नं वाच्यो द्रष्टव्यः। ननु तादृशस्य प्रमाणामूलकत्व
पात् तस्मात्कथं परममहत्त्वसिद्धिः। न च सर्वमूर्त्तसंयोगित्वहेतुकानुमानमेव तत्र प्रमाण
मिति वाच्यम्। अननुकूलतर्काभावेन तस्याप्रयोजककत्वादिति चेन्न। आकाशः परमम एम
हत्परिमाणवान् स्पर्शशून्यत्वे सति निरवयवत्वे सत्यनपत्वादात्मवदित्यनुमानस्यैव तत्र प्रमा १०८

णत्वेनैव अनुपपत्त्यभावात् । न चात्र दृष्टान्तासिद्धिरिति वाच्यम् ॥ आत्मनः परममहत्त्वप्रमाणाप्र
सत्त्वासिद्धत्वात् । न चोपदर्शितानुमानमनुकूलतर्काभावादप्रयोजकमिति वाच्यम् प्रसरे
गुणाश्रयस्य नित्यस्य तस्य परममहत्त्वाभावेन अणुत्वेन ह्रणस्य प्रत्यक्षत्वानुपपत्तेरेवा
नुकूलतर्कत्वात् । न चाकाशस्य अवयवित्वमेवास्त्विति वाच्यम् । स्पर्शवत्त्वाभावेन तस्य
नवयवकमशक्यत्वात् ॥ अवयविद्रव्यस्य स्पर्शवत्त्वनियमादिति । अत्रैव हन्ति । अनुकूल
तर्काभावेनोपदर्शितानुमानमप्रयोजकमिति न ह्यात गगने परममहत्त्वसिद्धिः न चोप
दर्शित एव अनुकूलतर्क इति वाच्यम् । महत्त्वाभाववत्त्रिसद्रव्यत्वस्य अणुत्वव्याप्यत्वे प्र
माणाभावेन दर्शितानुकूलतर्कासंभवात् । न च तथापि द्रव्यसमवेतप्रत्यक्षत्वावच्छि
न्नप्रतियोगिताश्रयसमवेतत्वसंबंधेन महत्त्वस्य हेतुत्वमेव तत्रानुकूलतर्क इति वाच्यम् परमा
णववच्छेदेन घटादौ चक्षुःसंयोगादिदृश्यापोसामानाधिकरण्यसंबंधेन घटादि हन्तिमह

सा॰सं॰ त्ववतः पृथिवीत्वस्य प्रसक्तत्वात् गुणपदं द्रव्यसमवेतत्वादृष्टत्वाद्यवच्छिन्नप्रतिमहत्त्वपर्या
१०८ वाच्छिन्नं च दृष्टः संयुक्तसमवायत्वादिनाविशिष्टहेतुताकल्पनस्यावश्यकतयास्यैवानुपप
त्तिपराहतो द्रव्यसमवेतद्यसत्त्वावच्छिन्नप्रतियोगिताधिकरणसंबंधेन महत्त्वहेतुत्वहेतु
तायां तिष्ठामाणिकत्वात् इति न न तथापि आकाशस्य संयोगविभागवत्त्वे मानाभावः
तथा च तयोः तद्गुणमध्यपदनमनुपपन्नमिति चेन्न। संयोगादिविभागादिच्छद्वा चक्षुरादि
ष्यतिरिति लक्षणस्य चितारकाशस्य संयोगविभागाभावमये या काशस्य योगवशद्ध लो
काशजविभागादिरूपस्य आद्यशब्दासमवायिकारणस्याभावे आकाशे आद्यशब्दानु
पपत्तिरूपानुकूलतर्कादाकाशसंयोगविभागवान् द्रव्यत्वादित्यनुमानादेव तत्त्वतदुभय
पसिद्धिरिति। न चैवमपि आकाशस्य नित्यत्वे प्रमाणाभाव इति वाच्यम् शब्दाश्रयस्य नि राम
त्यत्वे लाघवमिति लाघवज्ञानसहकृत[illegible]त्यचामियाहक प्रमाणादेव तस्य तत्सिद्धेः। ननु चेतना १०८

तिरिक्तद्रव्यमात्रस्यपरार्थत्वात् । आकाशः किंपरप्रयोजनमुत्पादयतीतिचेत्परस्यशब्द
प्रत्यक्षरूपप्रयोजनमेवोत्पादयतीत्यवेहि । न चाकाशस्य शब्दप्रत्यक्षजनकत्वमनन्ताभो
व इति वाच्यम् । इंद्रियस्य प्रत्यक्षजनकत्वात्कर्णशष्कुल्यवच्छिन्ननभोरूपश्रोत्रेंद्रियस्य
शब्दप्रत्यक्षजनकत्वेनाकाशेन निर्वाहादिति । न च कर्णशष्कुल्यवच्छिन्ननभोरूपेण
श्रोत्रेंद्रियेणत्यासत्ति । नस्यनिसतनपानाशासंभवेन वा धर्मपदार्थप्रतिवचनानुपप
त्तिः तस्य श्रोत्रेंद्रियनाशातिरिक्तस्यानिर्वचनाशक्यत्वादिति वाच्यम् । यतो न श्रो
त्रेंद्रियनाशेन वा धर्मपदार्थः । अपितु सुखदुःखसाक्षात्कारजनकशब्दज्ञानहेतु
रदृष्टविशेष नामारतिनव्यास्तु ॥ कर्णशष्कुल्यवच्छिन्ननभोनश्रोत्रेंद्रियं किंतु लाघवा
त्कर्णएवतनतान चैवंसतिशब्दप्रत्यक्षे श्रोत्रद्रसमवायस्य प्रत्यासत्तित्वानुपपत्तिः । कर्णे शब्द
समवायाभावादिति वाच्यम् । समवायस्य शब्दग्रहे प्रत्यासत्तित्वानुपगमादपितु स्ववच्छेद्य

सीसं नापाएवनयात्वात्ः तथा च तत्पुरुषीयशब्दश्रावणत्वावच्छिन्नं प्रति एतत्पुरुषीयकर्णावच्छे
११० दत्वमेव हेतुः। अतो न देशान्तरस्थपुरुषस्य देशान्तरस्थशब्दप्रसक्तानुपपत्तिः। न चैवं सति क
110 र्णावच्छिन्नसंयोगे शब्दश्रावणत्वावच्छिन्नापत्तिर्ङ्वीणा। तत्रापि कर्णावच्छेदकत्वसत्त्वादिति
वाच्यम्। विषयतासंबंधेन शब्दश्रावणं प्रति तादात्म्येन शब्दस्यापि हेतुतया अनुपपत्त्य
भावात्। न चैवं सति कार्यकारणभावद्वयापत्तिः समवायस्य प्रत्यासत्तित्वेऽपि नैवं तत्र एत
त्पुरुषीयशब्दश्रावणं प्रति एतत्पुरुषीयकर्णावच्छिन्नसमवायत्वेन एकहेतुतासंभवात् त
निवाच्यम्। तत्रापि एतत्पुरुषीयकर्णावच्छिन्नत्वशब्दत्वयोर्विशेष्यविशेषणभावे विनि
गमनाविरहेण कार्यकारणभावानन्त्यस्य अवच्छेदकगौरवस्य च दुष्परिहारत्वाद् उपदर्शि
तकार्यकारणभावकल्पनस्यावश्यकत्वादिति॥ अत्र मतद्वयेऽपि श्रोत्रादिपस्य शब्दप्रत्यक्षे एम
कारणत्वे तज्जनकशब्दस्य व्यापारत्वेन याबाध्यमासमवायोद्देशनिरस्तत्वाज्जन्यत्वाभावेन ११०

तत्रतच्चापात्वोसंभवादिति॥ ६९॥ इदानीं कालनिष्ठमितरद्वैधर्म्यंनिरूप्यते॥ ॥तत्रचका
लसंतकलेतिनतत्रतदितरभेदानुमानसंभवात।कालसंज्ञाच आकाशादिसंज्ञावदौपा
धिकीरूपा॥ कालत्वंसैकव्यक्तिमात्रवृत्तितयाजातित्वासंभवेनतस्यानैमित्तिकत्वासंभ
वात।एवमन्येभिन्नत्वेसतिकालिकपरत्वापरत्वासमवायिकारणत्वमपिकालवैधर्म्यं
तेनापितत्रतदितरभेदानुमानसंभवात।कालिकपरत्वापरत्वादिकंप्रतिकालपिंडसंयो
गस्यासमवायिकारणतयाऽपदर्शितधर्मवत्वस्यकालातिरिक्तेऽसंभवात।ननुसर्वमिदंका
लेप्रमाणसद्भावेनदेवतुनपश्यामइतिचेन्न।अत्रव्योमशिवाचार्याः।भावकार्यस्यसम
वायिकारणकत्वनियमेनऽसन्निमित्तोऽकालिकपरत्वापरत्वयोरप्यसमवायिकारणम
वश्यंवाच्यमानञ्चरूपादिकंनसंभवतिव्यापावयिकालिकपरत्वोत्पत्त्याव्यभिचारात।रूपा
समवायिकारणकस्यरूपत्वनियमेननतयोरूपत्वप्रसंगाच्च।अतएवनस्पर्शोऽपितयोर

समवायिकारणं स्पर्शो समवायिकारणकस्पर्शत्वनियमेन तयोः स्पर्शत्वप्रसंगात् ना
पि द्वित्वादिना सह कालिकपरत्वादिसमवायिकारणाहृपापिंडसंयोग एव तत्रासमवा
यिकारणं । द्वित्वाद्यसंयुक्तपदार्थेपि कालिकपरत्वाद्युत्पत्त्या व्यभिचारात् ॥ नापि स्वाका
शपिंडसंयोगस्तस्याविशेषगुणत्वेनासह पिंडसंयोगस्य कालिकपरत्वाद्यसमवायिकारण
त्वाभावनियमात् । एवं द्वित्वादिनासह पिंडसंयोगेन तथादर्शनत्वात् तथा च द्वित्वाद्यष्ट्र
व्यतिरिक्तद्रव्येण सह पिंडस्य संयोग एव कालिकपरत्वापरत्वयोरसमवायिकारण
ताबाच्चात्र अन्यथाभावकार्य्यस्यासमवायिकारणजन्यत्वनियमभंगप्रसंगस्तस्य
कृतत्वं च सह कृतानत्पुवावधिकस्याविरनिष्टं कालिकपरत्वं स्याद्विनावधिकपव
निष्ठं कालिकपरत्वं वात्र असमवायिकारणजन्यभावकार्य्यत्वात् रूपादिवत् इत्यनुमानम्
नान्तरद्रव्यसंयोगासमवायिकारणातिरिक्तासमवायिकारणजन्यत्वाभाववत्कालि १११

कपालत्वादिकमितानत्वाघवलात्कालिकपरत्वीयेद्रव्यसंयोगात्मकासमवायिकारणजं
न्यत्वसिद्धावुपदर्शितयुक्त्याकालात्मकातिरिक्तद्रव्यसंयोगात्मकासमवायिकारणाजन्य
त्वमेवासिद्धमतोऽनुपदर्शितानुमानात्अतिरिक्तकालसिद्धिः। न च स्थविरत्वादेर्द्वैवचनपानो
पदर्शितानुमानात्कालासिद्धिरितिवाच्यमायुर्वापेत्तपा॥धिकसूर्यक्रियावत्वस्यवि
रत्वाद्यविशिष्टस्यापाद्यत्वात्सूर्यक्रियावत्वपुत्रत्वमित्यादिनानतिरिक्तद्वैवचनसंभवात्त
थाविधक्रियावत्वे च तत्रस्वाश्रयसूर्यसंयुक्तद्रव्यसंयोगित्वादिरूपपरंपरासंबंधेनवो
ध्यं अन्येनानुपपत्तिरितिवदन्ति। तन्न। तदसत्॥ सर्वत्र मनापिं संयोगस्य कालिकपरत्वासम
वायिकारणत्वे बाधकाभावात् तन्मात्रपार्थान्तरेणोपदर्शितानुमानेन कालसिद्धेर
शक्यत्वात् तासां प्रदीपिकानुपदर्शितरीत्या कालासिद्धेरभावेऽपि प्रकारान्तरेणान
तिसिद्धिरित्यप्यस्तु हेवा न तथा हि कालिकपरत्वं प्रतिविप्रकृष्टत्वत्तान कालिकापरत्व

सास ः प्रतिसन्निकृष्टत्वज्ञानमन्तरेण व्यतिरेकाभ्यां निमित्तकारणमिति सर्वसिद्धं॥ तथा च पूर्वावधिक
स्यावधिनिष्ठकालिकपरत्वप्रतिस्यावधिविशेष्यकपूर्वविप्रकृष्टत्वप्रकारकज्ञानं कारणम्॥
११२ स्यावधिएवावधिकपूर्वनिष्ठकालिकापरत्वं प्रति च पूर्वविशेष्यकस्यावधिसन्निकृष्टत्वप्रका
॥ रकज्ञानं कारणमिति फलितं॥ अत्र च स्यावधिनिष्ठपूर्वविप्रकृष्टत्वे स्यावधिपूर्वापेक्षयाऽप्य
कसूर्यक्रियावत्त्वम्॥ पूर्वनिष्ठस्यावधिसन्निकृष्टत्वं तु पूर्वनिष्ठस्यावधिअपेक्षयाल्पतरसू
र्यक्रियावत्त्वं नाऽन्यदेवं च॥ अत्र च स्यावधिरादासूर्यक्रियावत्त्वम्॥ न सा ज्ञातं संबधेन॥ क्रियायाः
स्समवायातिरिक्तसाक्षात्संबंधाभावात्॥ अपितु स्वाश्रयसूर्यसंयुक्तद्रव्यसंयोगित्वात्म
कपरंपरासंबंधेनैव तद्व्याप्यमः॥ एवं चातिरिक्तकालाभ्युपगमाकाएआवश्यकः॥ अन्य
थाऽतिरिक्तपरंपराया अनिर्वाहात्॥ न चाकाशमादाय तन्निर्वाह इति वाच्यम्॥ आकाशस्य परंप राम
रासंबंधघटकत्वात् तत्पात्वे एकमेप्यांदूसंयोगे सर्वमेष्यवच्छेदेन शब्दासन्निप्रसंगात्॥ ११२

द्रामेयर्थ्यन्तरेऽपि स्वाश्रयदण्डसंयुक्ताकाशसंयोगित्वात्मकपरंपरासंबंधेन शब्दजनकं दण्डसंयो
गस्याविद्यमानत्वात् । यदि चावच्छेदकतासंबंधेन शब्दं प्रति न पथ्याकथंचित्संबंधेन भे(रि)
दण्डसंयोगः कारणमपि तु समवायेनेत्यतो नोक्तानुपपत्तिरिति विभाव्यते । तथापि दण्डपदर्शिन
परंपरासंबंधमादाय दण्डानाहतभेर्य्यां दण्डसंयोगवत्त्वाकुत्रापत्तिर्दुर्वारैवेति । अत एवात्मा
नमादायापि नोपदर्शितपरंपरासंबंधनिर्वाहः उपदर्शितापत्तेर्जागरूकत्वात् आत्मनः पर
परासंबंधघटकत्वानभ्युपगमात् । पृथिव्यादिकमादाय तथाविधपरंपरासंबंधनिर्वा
हस्तु दूरपराहत एव सर्वत्र पिंडे पृथिव्यादिसंयोगसत्त्वे मानाभावेन कालिकपरत्वादिकं च
तिपृथिव्यादिघटितोपदर्शितपरंपरासंबंधावच्छिन्नोपदर्शितसर्प्पे क्रियावत्त्वे प्रकारता
कत्वानहेतुताकल्पनस्य व्यभिचारेणाशंकं तथाविधकार्य्यकारणभावानुपपत्तिः । न च
सर्वत्र मनआदाय तथाविधपरंपरासंबंधकल्पनं संभवतीति वाच्यम् एतामनसोपिय

सा सं
११३
113.

रंपरासंबंधघटकत्वेमानाभावात्।अन्यथाऽक्तानुपपन्नेर्ध्वात्त्वात्तानचातिरिक्तकालस्य
परंपरासंबंधघटकत्वेपिकालपदितोपदर्शितपरंपरासंबंधमादायपदंऽनाहतमेवेष्पांदंडसं
योगवत्ताबुद्ध्यापातितद्वैते रेतिवाच्यम्।स्फप्पी।क्रियासंबंधघटकत्वेनसिद्धस्यकालस्यान्य
संबंधघटकत्वेप्रमाणाभावेनतथापत्तेरशक्यत्वात्।एवंचकालिकपरत्वोत्पादकत्वेन
सिद्धस्यविशेषदौऽपदर्शितसंपर्कक्रियावत्त्वादिबुद्धिः।स्वाश्रयासंपर्कसंयुक्तद्रव्यसंयोगित्वात्म
कपरंपरासंबंधावच्छिन्नसंपर्कक्रियाप्रकारताकसाक्षात्संबंधेनसंपर्कक्रियाप्रकारकत्वाभा
ववत्त्वेसतिस्पर्शक्रियाप्रकारकत्वादिसन्नमानानउपदर्शितपरंपरासंबंधावच्छिन्नसंपर्क
प्रकारताकत्वासिद्धावुपदर्शितपुरस्तान्यथाविधपरंपरासंबंधघटकत्वेनकालसिद्धिरेव
श्यकानिवर्तिता।नवानास्तु॥कालिकपरत्वादावेवमानाभावः कुतः कालिकपरत्वादिकंप्रति एम
उपदर्शितसंपर्कक्रियावत्त्वादिरूपविप्रकृष्टत्वादिबुद्धेः कारणत्वंकुतस्तरांचनादृशसंपर्कक्रि ११३

पावत्वादिविशिष्टबुद्धिः कुतस्तमां च तदन्यथानुपपत्त्या कालसिद्धिः न च कालिकपरत्वा
द्यनपगमे परापरव्यवहारानुपपत्तिः तस्य कालिकपरत्वापरत्वविषयकत्वादिति वाच्यम् ता
दृशव्यवहारस्य बहुतरसूर्यक्रियावत्त्वतदल्पसूर्यक्रियावत्त्वविषयकत्वेनोपपत्तेः तदन्यथा
नुपपत्त्या कालिकपरत्वापरत्वासिद्धेर्नवकाशात्। न चैवमपि स्थविरे सूर्यक्रियावत्त्वा
न्यथानुपपत्त्या अभ्युपगतस्य उपदर्शितपरंपरासंबंधस्य घटकतया कालसिद्धिप्रत्यूहेवे
ति वाच्यम्। स्थविरादौ सूर्यक्रियाया विशेषणताना विशेषणत्वानतिरिक्तसंबंधत्वाकारे
वसर्वानुपपत्तिपरिहारोपदर्शितपरंपराकालसिद्धेरभावात्। तत्र तथाविधपरंपरासंबं
कल्पनेन तद्घटकत्वेनातिरिक्तकालकल्पने च गौरवात्तदपहाय तथाविधातिरिक्तसंबं
धविशेषकल्पनस्यैवोचितत्वात्। एतेन युगपदुत्पन्ना घटाः युगपदुत्पन्नाः पटाः साहित्य
नातिविषयीभूतैकसूर्यक्रियावच्छिन्नकालवृत्तित्वादिरूपयौगपद्यादिघटकत्वेन का।

ससिद्धित्वावश्यकत्त्वस्यापिपदार्थान्तरलाघवात्तस्यैक्यापाद्यानतिरिक्तविशेषणताविशेषसंब
धस्वरूपेत्यनेनसंबंधेनैकस्यैकस्यापादृत्तित्वादेरेवपोपपादकपदार्थत्वाभ्युपगमेननिर्वाहे
गपचाद्दिपदार्थघटकत्वेनातिरिक्तकालकल्पनापात्रनवकाशादितिप्राञ्चः ननुअत्रातिरि
क्तकालाभ्युपगन्तृमतेकालस्यसर्वकार्य्यनिमित्तकारणत्वंसर्ववादिसिद्धमत्रात एवद्र
साधर्म्यनिरूपणप्रस्तावेतस्यतत्साधर्म्यमित्युक्तंप्राक्तनैःसर्वकार्य्यंकिमितिचेदुत्पत्ति
स्थितिविनाशाः एवंसर्वकार्य्यपदेनोपसंग्राह्याः इत्यवेहि । उत्पत्तिश्चमहाप्रलयानंतरीका
रेत्वाधिकरणसमयध्वंसानधिकरणसमयसंबंधः तदृशाकारेतुकश्चिदपिपदार्थसमय
संबंधेयत्समयवृत्तित्वंध्वंसप्रतियोगित्वंनास्तितत्समयसंबंध एवतस्योत्पत्तिः स्वपदंच
सर्वत्रलक्षणत्वेनाभिमतोत्पत्तिनिरूपकघटादिपरमितिध्येयम् । स्थितिश्चोत्पत्तिमित्र
समयसंबंधः स्वाधिकरणकालसंबंधोवा । नाशस्तुध्वंस एवसोऽपिजन्याभाव इतिननु

पदार्थेन सर्वकार्य्यहेतुत्वे कालस्य किं प्रमाणमिति चेत्॥ अद्योत्पन्नो घटः अद्य स्थितस्त्वद्य
विनष्ट इत्यादिव्यवहाराणां ऽसाधारणकारणत्वेन एतत्सर्व्वक्रियावच्छिन्नकालात्मका
यपदार्थविषयकानामेव प्रमाणत्वात्॥ तदसाधारणाधिकरणत्वेन वा कारणत्वेन व्यवहारविष
यस्य तदसाधारणहेतुत्वनियमात्॥ एवं क्षणादिव्यवहारनियामकोपि कालः॥ स्ववृत्तिपाव
ऽणप्रागभावविशिष्टध्वंससंबन्धिकालस्य कार्य्यप्रागभावविशिष्टचरमकारणविशि
ष्टकालस्य स्वजन्यविभागप्रागभावविशिष्टक्रियाविशिष्टकालस्य स्ववृत्तिपूर्ववर्त्तिपा
वत्पदार्थविशिष्टवस्तुविशिष्टकालस्य चोक्तत्वात्॥ अत्र प्रथमस्वपदं ध्वंसपरं द्वितीय
स्वपदं क्रियापरं तृतीयस्वपदं वस्तुपरम्॥ न चैवं चरमकारणत्वस्य दुर्वचनयाहितापलक्षणा
नुपपत्तिरिति वाच्यम्॥ स्वसमयोत्पत्तिकारणतानपेक्षत्वस्य चरमकारणलक्षणत्वे
नानुपपत्त्यभावादिति॥ नवीनास्तु॥ क्षणत्वस्यानुगतमनव्यवहारान्यथानुपपत्त्या क्षणत्वे

सा०सं०
११५
115

णाश्च पदार्थान्तरमेवेत्याहुः । ननु द्रव्यस्य गुणवत्त्वनियमेन कालाख्यद्रव्यस्यापि गुणसत्त्वात्त
त्के इति चेत् संख्यापरिमाणपृथक्त्वसंयोगविभागाः पंचैते इत्यवेहि । संख्या चात्र एकत्वादि
एकत्वं चात्र कालद्वयस्यान्योन्याभावप्रतियोगितानवच्छेदकमेव ग्राह्यं लाघवेन तथावि
धैकत्वविशिष्टस्यैव तस्य धर्मिग्राहकप्रमाणसिद्धत्वात् । परिमाणं चास्य परममहत्त्वम् ।
कारणे काल इति सूत्रात्सिद्धम् । सूत्रार्थस्तु यावन्मूर्त्तवृत्तियावत्कालिकपरत्वादिकारणघटका
भूतविप्रकृष्टत्वादिज्ञानविषययावन्मूर्त्तसंयोगासमवायिकारणे कालव्यवहार इति । ननु
तथाविधसत्त्वात्काले परममहत्त्वाप्रतीतेः कथं तस्मात्तत्र परममहत्त्वसिद्धिरिति चेन्न । काले याव
न्मूर्त्तवृत्तिपरत्वादिकारणत्वप्रदर्शकत्वेन तत्र तत्सूचनात् । तथाहि । काले परममहत्त्वानं
गीकारेऽव्यापकतया यावन्मूर्त्तसंयोगसमवायिकारणत्वाभावेन कारणविप्रकृष्टत्वता राम
न विचययावन्मूर्त्तसंयोगसंयोगासमवायियावन्मूर्त्तसहतत्संयोगानुपपत्त्या यावन्मू ११५

र्त्तेषु कालिकपरत्वाद्यनुत्पत्त्यापत्तिः। त्वन्मते परम्पर्यसंयुक्तकालसंयुक्तत्वरूपपरंपरासंबं
धघटितो दूरस्थेन विप्रकृष्टत्वादिज्ञानस्य तन्निमित्तकारणस्यासंभवादतोऽवश्यमभ्युपेय
यावन्मूर्त्तसंयोगित्वान्यथानुपपत्त्या काले परममहत्त्वांगीकारोऽवश्यं करणीयः। संख्याप
एपृथक्त्वसाधकत्वात्काले संख्यावत्त्वेन एकपृथक्त्वसिद्धिः ऽपरदृष्टितयुक्त्या धर्म्मिग्राहकप्रमाणे
न कालसंयोगसिद्धिः। संयोगनाशकत्वेन तत्र विभागसिद्धिरिति॥ इदानीं दिशं धर्म्मं च नि
रूप्यते॥ न च दिक्सत्ताकत्वे तेन तत्रेतरभेदानुमानसंभवात्। एवं मूर्त्तभिन्नत्वे सति दैशिक
परत्वापरत्वासमवायिकारणत्वमपि तल्लक्षणं तेनापि तत्रेतरभेदानुमानसंभवात्। नन्वि
दं सर्वं अतिरिक्तदिगभ्युपगमे एव संगच्छते तन्नैव च मानं न पश्याम इति चेदत्र सांप्रदायिकाः
अतिरिक्तदिगनभ्युपगमे प्राच्यां घटः इत्यादिप्रतीत्यनुपपत्तिः। सन्निहितसंयोगस्य चलसं
योगादिकदेशोपाध्यादिपदार्थे घटस्य संबंधाभावेन तत्र तद्विषयत्वासंभवात्। अतो

सा० सं०
११६
116

टस्य स्वाश्रयाभूतत्स्पर्शसंयुक्तद्रव्यसंयोगित्वरूपपर्याप्तिसंबंधघटितद्विषयेऽपेत्यसाध्यतानिरूपप
दनापेतित्तयाविधपर्याप्तिसंबंधघटकत्वे न दिक्सिद्धिः। न चाकाशमात्मानं वा तमादायपद
दशासंबंधोपपादनं संभवे किमतिरिक्तदिशेति वाच्यम् विशेषगुणवत्तापर्याप्तिसंबंधघट
कत्वे कालस्याप्युक्तदोषसंभवेन तस्यापर्याप्तिसंबंधघटकत्वनियमात्। न चैवं तस्यापि का
लमादाय संबंधो निर्वाच्यः किमतिरिक्तदिशेति वाच्यम्। कालस्याक्रियाया एवं पर्या
संबंधघटकत्वस्य धर्मिग्राहकमानासिद्धत्वात् स्पर्शसंयोगस्य पर्याप्तिसंबंधघटकत्वम
नाभावात्। यत्तु लाघवात्स्पर्शसंयोगस्यापि पर्याप्तिसंबंधघटकः काल एवास्तु अन्यथा अति
रिक्तदिगंगीकारे गौरवापत्तिरिति। तदप्यसत्। उक्तरीत्या स्पर्शसंयोगस्य पर्याप्तिसंबंधोप
पादनेऽपि दिशोऽवश्याभ्युपेयत्वात्। अन्यथा एकोपाधिकप्राच्यामन्योपाधिकप्रतीचा राम
त्वप्रत्ययानुपपत्तेः। एकोपाधिविशिष्टकालस्य वर्त्तमानत्वातीतत्वादिप्रत्ययासंभवत्वाप्रा ११६

चात्वप्रतीचीत्वोभयप्रत्ययस्यासंभवात् एकधर्म्मिके काले अन्यधर्म्मिप्रमाणनियमात् ।
दिक्त्वाकारेतुनोक्तानुपपत्तिः तत्र तथा फलेन तादृशनियमानभ्युपगमादित्याहुः । नवी
नास्तु । अतिरिक्तमहादिशि प्रमाणाभावेन सा नोपपन्न एव न चैवं सति प्राच्यां चर इति प्र
तीत्यनुपपत्तिरिति वाच्यम् । तत्तद्देश एव घटादीनामतिरिक्तविशेषणानां विशेषणसंबन्धमुप
त्पत्तथाप्रतीत्युपपादनसंभवात् । अतिरिक्तदिक्त्वाकारेपि तद्देशसंबन्धविशेषस्याकार
स्यावश्यकतया तस्यैवाभ्युपगमौचित्यादित्याहुः । नन्वतिरिक्तदिगंगीकर्तृमते कथं प्राच्या
दयो दश दिश इति व्यवहारः दिश एकत्वादिति चेत् । तत्र दिक्पदस्य दिक्संबन्धिनि लक्ष
णायैव तथाविधव्यवहारोपपत्तिरिति विहि । अत्र प्राच्यादिदशसंख्यानिष्प्रयोजनिकापरि
नु नाशंकनीया । श्रुतिस्मृतिलोकव्यवहारपर्यन्तादृशसंख्यायाः आवश्यकत्वात् । अथ के

सासं नित्यव्यवहाराः इति चेत्प्राचीप्रवणेन स्वैः एव देवेन पूजेत प्रतीचीशिरा न शयीत इति श्रौतो व्यव
११७ हारः। अपुष्पं प्राङ्मुखो भुञ्जीत इति स्मार्त्तव्यवहारः इति। न मा प्राहानिष्टौ किकव्यवहारः इत्यवे
117 हि अन्यपि के ते प्रागादिशब्दार्था इति चेत् तत्तन्नवेहिपदपेक्षिकसन्निहितसूर्य्योदयाचलसंयोगा
कोपोदेशः सतदवच्छिन्नावादिक्प्राची। एवं पदपेक्षिकव्यवहितसूर्य्योदयाचलसंयोगको
पोदेशः सतत्स्वच्छिन्नावादिक्प्रतीची। अत्र सन्निहितत्वव्यवहितत्वे मध्यवर्त्तिसंयोगानामल्प
त्ववहुत्वाभ्याम्। एवं प्राच्यभिमुखावस्थितपदार्थवामप्रदेशावच्छिन्ना दिक् उदीची। प्राच्यभिमु
खावस्थितपदार्थदक्षिणादेशावच्छिन्ना दिक् दक्षिणा। अत्र दक्षिणत्ववामत्वे न जातीहस्तत्व
पादत्वेहिनासंकरप्रसंगतात् अपितु वामत्वाभावकूटत्वं दक्षिणत्वं। दक्षिणत्वाभावकूटत्वं राम
वामत्वमिति हेयम्। अथवा पदापेक्षपासन्निहितसुमेरुकोपोदेशः सतदपेक्षपाउत्तरा। एवं प ११७

द्रव्ये तत्पाव्यवहितसुमेरुकोऽपरो देशः सन तद्पो त्पादक्षिणेन निषेध्यं तद्देशापप्राच्यवधिक
दक्षिणत्वे सति तद्देशीयदक्षिणावधिकप्राचीप्राच्यवाचीनदेशापप्राच्यवधिकवामत्वे सति
तद्देशापोदीच्यवधिकप्राचीप्राच्योदीची एवं तद्देशापप्रतीच्यवधिकवामत्वे सति तद्देशी
योत्तरप्रातीचीप्रतीच्युदीची एवं तद्देशीयप्रतीच्यवधिकदक्षिणत्वे सति तद्देशीयदक्षिणाव
धिकप्रतीचीप्रतीच्यवाची॥ एवं तद्देशीयपतनजन्यसंयोगाश्रयो देशः अधः एवं तद्देशीयो
र्ध्वज्वलनसंयोगाश्रयो देशः ऊर्ध्वं॥ अपवाततद्देशापेक्षया सन्निहितस्वर्लोककेदिशऊर्ध्वं तद्देशा
पेक्षया व्यवहितस्वर्लोककादेशः अधः इति॥ अथ दिशो द्रव्यत्वेन गुणवत्त्वस्यावश्यकतया
के गुणा इति चेत् संख्यापरिमाणपृथक्त्वसंयोगविभागात्मकाः पंचगुणा रसवहि॥ अत्र द्रव्य
त्वात्संख्यासिद्धा प्राच्यां घट इत्यादिप्रतीतिविषयीभूतनानाभूतनानामूर्त्तसंयोगात्पृथ्व्या
नुपपत्त्या महत्त्वोऽपरिमाणसिद्धं तदेव विभक्तमासंख्यापाः पृथक्त्वव्याप्यत्वात्॥ तत्र एव

सास कत्वंसिद्धंलाघवेनेति ॥ ॥ इदानीं आत्मत्वे धर्मं निरूपयति नन्वात्मत्वं ते न नन्त्रनद्दितरभेदानु
११८ मानसंभवात् । न चात्मत्वजातौ मानाभाव इति वाच्यम् । आत्मपदशक्यतावच्छेदकतया आ
118 त्मत्वजातिसिद्धेः न च शक्यतावच्छेदकतया जातिसिद्धौ विभुपदशक्यतावच्छेदकतया वि
भुत्वजातिसिद्ध्यापत्तिरिति वाच्यम् । आकाशकालदिशामेकव्यक्तित्वेन प्रमाणाभावेन
विभुत्वस्यात्मत्वरूपतया दुष्टापत्तेः । अथवा उत्तरसंयोगप्रतिबंधकतावच्छेदकेपूर्वसंयो
त्वेपूर्वत्वस्यजन्यसंयोगादिव्यावृत्तेस्यत्र्चेचतया आत्मसंयोगत्वमेवतद्वाच्यम् । तथाव
उत्तरसंयोगप्रतिबंधकतावच्छेदकघटकतया आत्मत्वजातिसिद्धिः नचतादृशजाते
रेश्वरसाधारण्ये मानाभावेन ईश्वरात्मसाधारणात्मत्वजात्यसिद्धिरिति वाच्यम् । वि
भुत्वात्सर्वमूर्त्तसंयोगित्वेन संयोगासिद्धेः । संयोगनाशकत्वेनाविभागः सिद्धतादृशजा राम
तेरीश्वरसाधारण्योपपत्तेरिति । पत्त्युत्स्वसमवायिकारणतावच्छेदकतया आत्म ११८

त्वजातिसिध्यतातितान्हसताजन्यसत्वावच्छिन्नं प्रतिद्रव्यत्वे न समवायिकारण
त्वकल्पनेपि चोपपन्नो तथाविधकार्य्यकारणभावे मानाभावात् भावे वा तपापुण्य
ईश्वरात्मसाधारणात्मत्वजातेरसिद्धेः। ईश्वरो जन्यसुखाभावेन तत्कारणतावच्छेद
कजातेस्तत्र स्वीकारे नित्यसुखस्वरूपयोग्यस्य फलावश्यभावनियततिव्याप्तेः सर्वैकत्वापत्तेः। यदि
च तादृशनियमे मानाभावः। न द्यातपापुण्यापि ईश्वरात्मसाधारणी जातिः सिध्यति। न च गो
त्वात्तादृशी जातिर्न्नेश्वरात्मसाधारणीति वाच्यम्। तथा सति ईश्वरात्मसाधारणात्मपदशक्य
तावच्छेदकलाघवसंभवेन तादृशगोत्वस्यापि किंचित्कारत्वादित्यलमतिशयविस्तरेण। न नेत
तथापि आत्मत्वं न सकलात्मवृत्तिधर्म्मः। आत्मनः स्वस्य प्रत्यक्षत्वेपि परात्मनः परस्याप्रत्यक्ष
त्वेन पक्षतानाभावात्। आत्मत्वेन तत्र इतरभेदानुमानानुपपत्तेरिति चेन्नैवमात्मत्वस्य
धीप्रश्रोत्रादीनि कर्तृव्यापारवंति करणत्वात् वास्यादिवत् इत्यनुमानात् परस्य परात्मज्ञाना

सा॰सं॰
११८
119

भवेन उक्तानुपपत्तेरभावात् । न चेष्टप्रयोज्यव्यापारवत्त्वमादाय सिद्धसाधनान्नैतादृशानुमा
नावकाश इति वाच्यम् । प्रकृते जन्यज्ञानवत्त्वस्य कर्तृपदार्थत्वेन उक्तानुपपत्तेरभावात् । न चैत
यापि अस्मत्प्रयोज्यव्यापारवत्त्वमादाय पर्यवसानमिति वाच्यम् । अस्मत्प्रयोज्यव्यापारान्यतमाश्रय
त्वस्य पक्षविशेषणत्वेन प्रवेशनीयत्वात् । न च श्रोत्रादौ तादृशव्यापाराभावेन तत्र तत्साधने बाध
इति वाच्यम् । श्रोत्रादौ श्रोत्रादिमनोयोगस्यैव परंपरया प्रयत्नवदात्मजन्यत्वेन तथाविधव्या
पारतया रतया बाधासंभवात् । न चाप्रयोजकत्वान्नैतादृशानुमानावकाश इति वाच्यम् । श्रो
त्रादौ तथाविधव्यापारानङ्गीकारे तत्र कारकलक्षणस्य कर्तृव्यापारवत्त्वस्याभावेन कारकत्वा
नुपपत्त्यानुकूलतर्कसंभवात् । अथवा एतच्छरीरावच्छिन्नज्ञानं किंचिदाश्रितं कार्यत्वात्
रूपवदित्यनुमानादात्मसिद्धिः । न चात्रानुकूलतर्काभाव इति वाच्यम् । कार्यस्यानाश्रितत्वे सम राम
वायिकारणाभावेन समवायिकारणप्रत्यासत्त्या कारणरूपासमवायिकारणस्य समवायिका ११८

णाः समवायिकारणाभिन्नरूपनिमित्तकारणस्य चाभावेनाकारणकत्वप्रसंगापत्त्याऽनुक-
ल्पनं क्लृप्तं संभवात्। न च तथापि शरीराश्रितत्वसिद्धिमादायार्थान्तराण्ठनादृशानुमानादात्म-
सिद्धिरिति वाच्यम्। ज्ञानं न शरीरसमवेतं अपादेद्रव्यभावित्वादित्यनुमानेन शरीरसमवेत-
त्वाभावनिर्णये नोपदर्शितार्थान्तरासंभवात्। ज्ञानस्यापावद्द्रव्यभावित्वं चमत्न शरीरेतद्भा-
वेन ज्ञेयमिति॥ न चैवमपि इन्द्रियसमवेतत्वसिद्धिमादायार्थान्तरापत्तिरिन्द्रियेति वाच्यम्। इन्द्रि-
यं न ज्ञानसमवायि ज्ञानासाधारणकारणवृत्तिद्रव्यविभाजकोपाधिमत्वात् इत्यनुमानान्तरेण
विघ्नविघातया इन्द्रिये ज्ञानसमवेतत्वाभावसिद्धावुपदर्शितार्थान्तरासंभवात्। न चोपदर्शिता-
नुमानमप्रयोजकमिति वाच्यम्। इन्द्रियस्य ज्ञानसमवायित्वे परद्रव्यानुभूतस्मरणं इन्द्रियोपघातद-
शायां स्मरणानुपपन्नेः। स्मरणस्यानुभवतज्जन्यसंस्कारसामानाधिकरण्यनियमेन इन्द्रिया-
भावदशायां भवन्मते स्मरणोत्पत्त्यसंभवात्। अत एव न ज्ञानस्याविषयसमवेतत्वसिद्धिमादा-

सा॰सं
११०
110

कार्यान्तरं अनुमतस्य विषयस्य स्वाभावदशायां स्मरणोत्पत्त्यनुपपत्त्या अनुकूलतर्कसंभवेन
विषयेण ज्ञानसमवायिनाशप्रतियोगित्वादिसनुमानान्तुल्यवित्तिवेद्यतया ज्ञाने विषय
समवेतत्वाभावसिद्धेः न चैवमपि मनसो ज्ञानसमवायित्वे बाधकाभावेन तत्समवेतत्वसि
द्धिमादाय पार्थीनएपत्यानोपदर्शितानुमानात् आत्मसिद्धिरिति वाच्यम् मनसो ज्ञानसमवा
यित्वे ज्ञानस्यातीन्द्रियत्वापत्तेः अणुसमवेतस्यातीन्द्रियत्वनियमात् न च मनसो विभुत्वा
त्काएनैष दोष इति वाच्यम् तथापि एकदा तत्र नानेन्द्रियसंयोगसंभवेन एकदा नाने
न्द्रियजन्यज्ञानानापत्तेरिति ज्ञाने आकाशकालदिक्समवेतत्वसिद्धिमादाय पार्थीन्तएप
त्यानुपदर्शितानुमानात् आत्मसिद्धिरिति तु न संभवति किंच। आकाशस्य ज्ञानसमवायि
त्वे अहं सुखवान् इति प्रत्ययापत्तेः दिक्कालयोर्ज्ञानसमवायित्वे तयोः प्रत्येकमेकत्वात् सु ११०
खित्वदुःखित्वादिव्यवस्थानुपपत्तेरिति आकाशादीनां ज्ञानसमवायित्वाभावनिर्णयेन आ

याविधार्थीनत्राणनवकाशात्तान्यथाचव घंकाभावाद्रूपदर्शनानुमानादृतिरिक्तात्मसिद्धिप्र
सङ्गेवेति। अथवा परकायंजीवतःशरीरं प्रपन्नावच्छेदकं च शरीरत्वान्नापत्तेर्नैवं तन्नैवपथ्या
परःसनुमानात्परकायप्रपन्नसिद्धौ तदाश्रयापत्तपापरकायात्मसिद्धिः। न चोपपदर्शितानु
मानमप्रयोजकमिति वाच्यं। चेष्टाप्रतिपन्नस्येहेतुतयाप्रपन्नं विनाचेष्टानुपपत्त्यानुकूलतर्क
संभवादिति। अथवा परकायजीवच्छरीरं प्रपन्नावच्छेदकं प्राणादिमत्त्वादित्यनुमानात्पर
कायप्रपन्नसिद्धौ तदाश्रयतया परकायात्मसिद्धिः। न चानुकूलतर्काभावान्नास्यानुमानम
प्रयोजकमिति वाच्यम्। प्राणादिमतिशरीरे प्रपन्नावच्छेदकत्वानंगीकारे तत्र प्राणादिक्रियानु
पपत्तेः। प्राणादिक्रियाप्रतिप्रपन्नवदात्मसंयोगस्य हेतुत्वादित्यनुकूलतर्कसत्वात्। एवं निमे
षोन्मेषादिहेतुतोपि आत्मानुमेयः। तदाकारश्च परकायजीवच्छरीरं प्रपन्नावच्छेदकं निमे
षोन्मेषवत्त्वात्। अनुमानशरीरं चेतनाः। अत्र हि पदं मनोसंयोगजनकं विलक्षणकर्मनिमे

सा सं
१२९

षःतयोर्विभागजनकविलक्षणकर्मोऽन्येषः अतो न तदनिर्वचनेनानुमानानुपपत्तिः। अ
त्रानुकूलतर्कः तथाविधविलक्षणक्रियां प्रतिप्रयत्नवदात्मसंयोगहेतुत्वस्यान्यथानुपप
त्तिरिति। एवं जीवनलिंगकानुमानादपि पाकापात्मानुमेयः तद्दाकाष्ठ्चपाकापं जीवच्छरी
रं प्रयत्नावच्छेदकं जीवनवत्त्वात्। अनुमानत्त्र शरीरत्ववादिति। अत्र जीवनशब्देन जीवनकार्यवृ
द्धिक्षतभग्नसंरोहणं बोध्यं। वृद्धिः शरीरावयवोपचयः क्षतसंरोहणं किंचिदवच्छेदेन विभा
गवत्वे सति किंचिदवच्छेदेन संयोगवत्ता। अस्थिपर्वमांसभागयोर्विभागावच्छेदकावच्छेदेन
संयोगः भग्नसंरोहणं। सर्वावच्छेदेन विभक्तयोरस्थिपर्वमांसभागयोः सर्वावच्छेदेन संयोग
ः। एतेषां च प्रत्येकं हेतुत्वं बोध्यमापत्त्वत्र जीवनशब्दो विजातीयात्ममनःसंयोगपर इति तन्न।
तस्यातीन्द्रियतयानुमानतः एतद्रूपदृष्टान्तमन्तर्भाव्य व्याप्तिग्रहानुपपत्तेः। अत्रापि तद्विधात्म
दिकं प्रति प्रयत्नवदात्मसंयोगत्वेन हेतुत्वान्यथानुपपत्तिरेवानुकूलतर्कः। एवं मनो १२९

गात्ति लिंगकानुमानादपि परकीयात्मानुमेयः। तदाकारश्च परकीयं मानः जन्मप्रयत्नवन्निरू
पितविज्ञानायसंयोगाश्रयः जन्मप्रयत्नासमवहितकर्मसामग्र्यभावे सति कर्मवत्त्वात् बा
लकप्रेरितजतुगृहकवत्। अत्रापि तथाविधक्रियाप्रतिप्रयत्नवदात्मसंयोगत्वेन हेतुत्वानुपप
त्तिरेवानैकान्तिकम्। एवं स्वेन्द्रियेण सह देहेतोरकसंप्रवहृत्पस्पेन्द्रियान्तरविकारस्य हेतुत्वादपि प
रकीयात्मानुमातव्यः। तदाकारश्च परकीयः स्वेन्द्रियदेहेतरकसंहृत्वचेतनप्रयोज्यं तथावि
धस्य स्ववादनुमातन स्वेन्द्रियदेहेतरकसंहृत्यवत् तदिति। न चात्रानैकान्तिकाभावः इति
वाच्यम् आजंबालादिदर्शनात् तेषामन्यस्य स्वस्मृति जनितस्य निरूपितव्याप्तिग्रह जनितस्यानु
मानजनितस्य तथाविधसंस्तवस्य चेतनं विनानां दृष्टानुमानानां साऽनुपपत्तेरेवानुकूलतर्क
त्वात्। न चेन्द्रियादिकमात्मा पार्श्वेन एतेनोतादृशानुमानादतिरिक्तात्मसिद्धिरिति वाच्यम्। इन्द्रि
यादेरचेतनत्वस्य पूर्वं व्यवस्थापितत्वादिति। एवं हर्षादिलिंगकानुमानादपि परकीयात्मा

सासं नुमेयः तदाकाशस्य सुखादयो द्रव्याश्रिता गुणत्वात् रूपवदिति।न चात्र हेतुत्वासिद्धिरिति वाच्यम
१२२ मात्मसुखादयो गुणाः कार्यत्वे सति उभयेन्द्रियाग्राह्यत्वे सति रिन्द्रियग्राह्यत्वात् रूपादिवदित्यनु
मानात् सुखादीनां गुणत्वसिद्धेः।न चानैकान्तिकताभावान्नैतादृशानुमानाद्गुणत्वासिद्धिरि
ति वाच्यं।सुखादिकार्यस्य द्रव्यत्वे निरवयवत्वात्सुखत्वव्याघातप्रसंगः।कर्मत्वे संयोगावि
भागानपेक्षकारणकत्वप्रसंगः।सामान्यादित्वे नित्यत्वव्याघातप्रसंगः।तस्मादन्यथानुपपत्त्या
गुणत्वमेवाकाशस्यानुकूलवेदनीयत्वात्।न च पि सुखादेः शरीरादिद्रव्याश्रितत्वसिद्धि
मादाय पार्थिवत्वसत्त्वात्रोपदर्शितानुमानादतिरिक्तसिद्धिरिति वाच्यम्।आत्मसुखादयो न शरी
रादिगुणाः।अहंपदार्थवृत्तित्वात्तस्य निवस्तिपनुमानेन सुखादेः शरीरादिगुणत्वाभावसिद्धेः।
न च सुखादेरहंपदार्थवृत्तित्वमानाभाव इति वाच्यम्।अहं सुखी अहं दुःखीत्युत्पादितमानसप्रत्य राम
न प्यावगाहनात् न चोपदर्शितानुमानमप्रयोजकमिति वाच्यम्।पोहं सुखसाधनं स्वकं चन्दना १२२

दिकमुपलभ्यतद्रूपादिघुद्घुष्यमानस्तद्रूपान्नवान्सोऽहंसुखावापोऽहंदुःखसाधनमाहिकंरक्ताद्युप
लभ्यापिनपरिहृतवालसोऽहंदुःखीरत्नादिप्रतिसंधानान्नुपपत्त्यातथाविधानुमानस्यसप्रयो
जकत्वतत्ताद्दृशप्रतिसंधानानुपपत्तिश्चपरिणामिभेदेनशरणादेर्भिन्नत्वतथाविधाभेदा
वगाहनासंभवाद्वाद्ध्यानंचयोऽहंगौरःस्थूलःकृशःआससोऽहमिदानींश्यामःकृशोदीर्घःइति
प्रत्यप्रत्यवत्तत्तथाविधचद्रसप्रत्यभिज्ञानतत्वान्नत्वप्येतिवाच्यम्।एवमपिसुखादीनांशरीरादिवृ
त्तित्वेस्वजनकज्ञानसामानाधिकरण्यानुपमानुपपत्त्यानथाविधानुमानस्यसप्रयोजकता
पाडष्यापरिहार्यत्वात्।एवंचोपदर्शितक्रमेणोपदर्शितानुमानादतिरिक्तात्मसिद्धिःप्रत्युदेवा
अतएवप्राणापाननिमेषोन्मेषजीवनमनोगत्यन्तरविकाराःसुखदुःखेच्छाद्वेषप्रयत्ना
श्चात्मनोलिंगानीतिसूत्रेणपरममहर्षिभिरुपितन्येवोक्तमिति।अत्रवैनास्तिकाःज्ञानस
मवायिकारणत्वेनातिरिक्तात्मानसिध्यतिज्ञानस्यैवज्ञानसमवायिकारणत्वाभ्युपगमात्।

सासं
१२३
123

न च सत्त्वादिपत्तकद्रव्याश्रितत्वसाध्यकानुमानादेव अतिरिक्तात्मासिद्धिरस्ति । वाच्यम् । पदा
र्थमात्रस्यैव त्रैकालिकत्वाभ्युपगमेन विभिन्नकालीनानां सुखादिमाणामाश्रयापि भावासंभ
वेनतत्पाविधानुमानादपि अतिरिक्तात्मसिद्धेरसंभवात् । चेन्नेपदार्थमात्रस्य त्रैकालिकत्वसर्व
मिदं संभवति तत्तद्वस्तु न संभवतीति वाच्यम् । त्रैकालिकत्वसाध्यकानादेवातत्सिद्धेः । तथाहि । का
र्यस्य कारणसमानकालीनं नवेति क्षणभंगविप्रतिपत्तिः । अत्र विधिकोटिर्नैयायिकवैनाशि
षेधकोटिर्बौद्धानां । अत्र बौद्धाः पदसन्तत्रैकालिकरूपया घटादिः संश्च चरशब्दातिरिक्तशब्दा
दिरिति चरमशब्दातिरिक्तशब्दादिपत्तकत्रैकालिकत्वसाध्यकसत्त्वहेतुकानुमानेनस्यः पदार्थ
मात्र एव त्रैकालिकत्वसिद्धेः । त्रैकालिकत्वं च स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधि
करणक्षणवृत्तिध्वंसप्रतियोगित्वाभावसमानकालीनपदार्थध्वंसासमानकालीनत्वं वा । सेप एम १२३
सत्त्वमत्र जनकत्वं । न चात्र घटादेर्दृष्टान्तत्वविरुद्धं तत्रापि त्रैकालिकत्वस्य साध्यनपाऽपदार्थे

र्शितानुमानात्पूर्वं तत्र साध्यनिर्णयाभावादिति वाच्यम्। अलौकिकस्यापि घटस्यात्र व्यतिरेक
दृष्टान्तत्वेनानुपपत्त्यभावात्। अत एवात्र साध्यसिद्ध्यनोपदर्शितानुमानात् लौकिकत्वसि
द्धिरित्यपि परास्तं। अत्र अन्वयव्याप्त्यभावेपि व्यतिरेकव्याप्तिबलात् पदार्थमात्रे लौकिकत्व
सिद्धेः। अथवा वाच्यमेवास्य अलौकिकत्वे चैवमशब्दो घटादिर्वा प्रसाध्यताग्राहक एव [illegible]न्वयदृष्टा
न्तस्यान्वयव्याप्तिबलादपि लौकिकत्वसिद्धिरिति। न चानुकूलतर्काभावान्नोपदर्शितानु
माने लौकिकत्वसिद्धिरिति वाच्यं अस्यापि पदार्थाग्राहकोरे तत्र जनकत्वानुपपत्तेरेवानुकूलत
कं [illegible]र्कत्वात्। तथाहि। जनकत्वं क्रमयौगपद्याभ्यां व्याप्तं। अत्र क्रमश्च जन्यकार्यप्रागभावस
मानकालीनकार्यजनकत्वं तदभाववत्त्वं यौगपद्यं तथा चास्यापि एतयोर्विपक्षक्रमयौगप
द्ययोरभावरूपव्यापकाभावेन जनकत्वरूपतद्व्याप्याभावापत्तेरेवास्य हेतुपातनया विधानु
कूलतर्कस्य स्फुटत्वात्। न चास्यापि क्रमपदार्थाभ्युपगमेन तदभावासिद्ध्याऽपदर्शितानि

सासे नसंभवंतीतिवाच्यम्।स्थिरेण तथाविधक्रमाभ्युपगमेन तस्माद्दृश्यमानकार्यासत्त्वसमये अती
१२४ तानागतकार्योत्पत्तिः।समर्थस्य तेषामपेक्षायोगादिति।नचसमर्थोनापि सहकारिणामपे
125 क्षफलमुत्पादयतीति।समर्थस्य तेषामपेक्षायोगासिद्धेरितिवाच्यम्।समर्थेनफलेजननीयेसहका
र्य्यपेक्षाप्रयोजनाभावेन तदपाकल्पनतानतथाहि।तत्र सहकार्य्यपेक्षा किं स्वरूपलाभा
र्थं किंवोपकारार्थं।कार्य्यजननार्थं वा।नाद्यः।तत्कार्यजननसमर्थहेतुत्वेनिस्य धर्म्मिविरा
घरूपस्वभावात्मकस्वरूपस्य तत्कार्य्यजननसमर्थात्मकस्वरूपस्य वा सहकारिणाजननास
संभवात्।नद्वितीयः।नतत्कार्यजननासमर्थादेवसर्वत्र तत्तत्कार्य्योपपत्तौ नतत्कार्यज
ननसमर्थेषूपकारकल्पनेप्रयोजनाभावात्।अतएवनतृतीयः।नतत्त्वतत्कार्यजननस
मर्थादेवसर्वत्र तत्कार्योपपत्तौ नतत्कार्यसहकारिणामनपयोगादिति।नचपदार्थो ताम
नासहकारिसमवधानदशायांकार्योत्पादकत्वं तदभावदशायांकार्यानुत्पादकत्वं चे १२४

ति स्वभावरूपोपपत्सामर्थ्ये अवश्यं सहकारिसमवधानापेक्षावाच्येति वाच्यो न तु तत्सहकार्य
स्वभावस्य तादात्म्येन तत्तत्सहकार्यव्यापकतया एकत्र तदुभयासंभवे न तत्सहकार्यत्वतया धर्मि
मितद्रूपावश्यकतया तत्क्षणिकपदार्थगोचरीकारस्यावश्यकत्वादिति । अत्र च क्षणिकपदार्था
गोचरीकारिसहकारिणो हेतुत्वे अंकुरादिकं प्रति समर्थबीजादेके न रूपेणाहेतुत्वं न तावद्रूप
त्वेन कस्यचिदपि बीजादेरंकुरोत्पत्त्यापत्तिः । न वा तत्तद्व्यक्तित्वेन व्यभिचारात् । न च कार्य
तावच्छेदकमपि तत्तद्व्यक्तित्वमिति क्लृप्तव्यभिचार इति वा संतानपासति अंकुरत्वावच्छिन्न
स्याकस्मिकत्वापत्तेर्दुर्वारत्वात् । न तो वाच्येति चेन्न । अंकुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वे
नैव समर्थबीजहेतुत्वात् । कुर्वद्रूपत्वं तावदंकुरजनकत्वावच्छेदेन सिद्धो जातिविशे
षः फलोपधायकतत्क्षणिकसमर्थबीजादिमात्रवृत्तिरिति । कुसूलस्थबीजे न
हि भावो हि एव तस्मादंकुरोत्पादानापत्तसंभवात् । इदं च कुर्वद्रूपत्वं जातिबीज

सीस
१२५
125

यववीजादिभेदेनभिन्नंदृष्टव्यं।नानोपवादिबीजात्शाल्यंकुराद्युत्पत्तिरिति।अत्रोच्यते।पदार्था
न्तरोत्पत्तिकत्वेमानाभावः।नचप्रत्यक्षतःतदुत्पत्तिकंस्तत्ाद्युपदर्शितानुमानात्पदार्थान्तरोत्पत्तिकत्वसि
द्धिरितिवाच्यम्।अनुकूलतर्काभावेनतादृशानुमानस्याप्रयोजकत्वात्।नचोपदर्शितएवानुकू
लतर्कइतिवाच्यम्।स्थिरेनिरुक्तक्रमाभ्युपगमेबाधकाभावेनतथाविधानुकूलतर्कासंभवात्।
नचास्थिरेनिरुक्तक्रमाभ्युपगमेबाधकस्योक्तत्वात्तत्रतदनभ्युपगमेआवश्यकइतिवाच्यम्।स
मर्थबीजादिनाफलजननीयसहकारिसमवधानापत्त्यास्वीकारेगौरवमितिवाच्यम्।उत्पत्तिकपदा
र्थानीकत्वमतेपिअंकुरादिकंप्रतिधरणिसलिलादिसहकारिणांकुर्वद्रूपत्वेनहेतुतयाविनिगम
नाविरहेणाव्वरूपकत्पासमर्थबीजेनफलजननीयसहकारिणःकारणत्वेनावश्यापेक्षणीयत्वा
त्।उत्पत्तिकपदार्थांगीकारेअंकुरादिकंप्रतिबीजादीनांसहकारिणांचकुर्वद्रूपत्वेनैकहेतुत्व राम
कल्पनेलाघवंस्थिरपदार्थांगीकारेतुअंकुरंप्रतिबीजत्वसलिलत्वधरणित्वादिरूपेणाच १२५

र्मैत्रेणानानाहेतुत्वं कल्पनीयमिति गौरवमिति लाघवात्पदार्थानां क्षणिकत्वसिद्धिः प्रत्यहेत्वे
तिचेन्न क्षणिकपदार्थानां कर्तृमते अनन्तानां कुर्वद्रूपपदार्थकल्पनागौरवस्य दुष्परिहरत्वात् । उप
दर्शितलाघवस्याकिंचित्करत्वात् तावदिव लाघवादुपदर्शितकार्यकारणभावसिद्धेस्तदनन्ता
र्थमनन्तव्यक्तिकल्पनायाः फलमुखत्वान्न तथाविधगौरवस्य दोषः । अत एव निषादस्थप
तियाजयेदित्यादौ कर्मधारयाभ्युपगमे निषादव्यक्तिकल्पनागौरवस्य फलमुखत्वेनादोष
त्वव्यवस्थापिता । अत एव व्याक्तिपौर्वापर्यावधारणार्थं अनन्ततत्तद्व्यक्तित्वावच्छिन्नप्रति अनन्त
तत्तद्व्यक्तित्वेन हेतुताकल्पनाधिक्यादेवं क्षणिकपदार्थानां कर्तृनयेपरस्यापि प्रमाणता ता
दृशगौरवस्यापि फलमुखत्वेनादोषत्वादिति विभाव्यते तथाप्यनुपपन्नः पदार्थानां क्षणिक
त्ववादः । तथाहि पदार्थानां क्षणिकत्वाभ्युपगमे स एवायं घट इत्याद्यभेदावगाहिप्रत्यभि
ज्ञानुपपत्तिः । न चैतादृशप्रत्यभिज्ञायास्तद्घटवृत्तिघटत्वावच्छिन्नाभेदस्यैव तद्घटे वि

सा॰स॰ १२६ षयकत्वाभ्युपगममात्रानुपपत्तेरितिवाच्यं। तन्मते घटत्वादेरपि ज्ञापकतया नानात्वे
नतद्रूपस्य ज्ञप्तिघटत्वस्यैतद्घटे अभावेनोपदर्शितत्वात् एतेनैवासम्भवोऽपीति। यत्तु स्थिरपदा
र्थानां कारणैकत्र सामर्थ्यासामर्थ्यलक्षणाविरुद्धधर्म्मद्वयमनुपपन्नमिति तद्वा अपभेदा
त्क्षणिकपदार्थसिद्धिरिति। तन्न। एकत्र कालभेदेन सामर्थ्यासामर्थ्ययोर्णाकारैर्बाधका
भावेनोपदर्शितत्वात् उक्तैरपि क्षणिकपदार्थासाधकत्वात्। न च धर्म्मधर्म्मिणोर्भेदेन त
थाविधधर्म्मद्वयस्य भेदात्तद्वा अपि धर्म्मी अतद्रूपो भिन्न उपेय इति वाच्यं। धर्म्मध
र्म्मिणोर्भेदमतस्यान्यत्र दूषितत्वेन तादृश्युक्तेरपि क्षणिकत्वासाधकत्वात्। यत्तु
पदार्थानां क्षणिकत्वाभ्युपगमे नाशत्वावच्छिन्नं प्रति सत्वेनैकहेतुत्वमात्रकल्पने
लाघवात्तदभ्युपगम आवश्यक इति। तदपि नाशस्य प्रत्यभिज्ञानुपपत्तिरूपबाधकस्यागा राम
गरूकतया पदार्थानां स्थिरत्वसिद्धेरुपदर्शितलाघवसहस्रेणाप्यनपलपनीयत्वादिति १२६

तस्मात्सर्व्वपदार्थाः स्थिराएवेति। सुखादिकं द्रव्याश्रितं गुणत्वादित्यनुमानादतिरिक्ता
त्मसिद्धिः। प्रत्यक्षेणैव न चैवं सत्यपि बुद्धेरेव बुद्धिसुखादेराश्रयो भविष्यतीति न तदाश्रयतया
ऽतिरिक्तात्मसिद्धिरिति वाच्यम्। बुद्धिर्नेच्छुकवाद्या अपः गुणत्वादित्यनुमानाद्बुद्धेर्बुद्ध्यपा
अपत्वाभावान्निरोपिनेपदर्शितः। एताः तिरिक्तात्मसिद्धेः प्रत्यक्षत्वादित्यलमप्राह्यावशेन
ननु ऽपदर्शितः एषा सिद्धस्यातिरिक्तात्मनो द्रव्यत्वेन गुणवत्त्वानिपमान्नेपादिस्सुखेऽः ए
च्छाद्वेषप्रयत्नाः एव न दा बुद्धिधर्म्माधर्म्माश्रयतया द्रव्यानामसिद्ध्या न वैव द्रव्याणां तिव्या
घातप्रसंगः। सुखादेर्नात्माश्रितत्वप्रसंगश्च तज्जनकानां बुद्ध्यादीनां नित्यत्वादिति चेत्
द्धि बुद्धिधर्म्माधर्म्मा अपि आत्मगुणाः सन्तु प्राणादिसूत्रे सुखादेरात्मलिंगत्वकथनेन तद्
नित्यत्वप्रोक्तात् तज्जनकामनुबुद्ध्यादेरपि तद्गुणत्वस्यार्थतः प्राप्त्या सूत्रकारस्यापि तत्सम्मत
त्वात्। न च सुखादिद्रव्याधिकरणे बुद्धिधर्म्माधर्म्माः सुखादिके सुसाधनतरति नोपदर्शि

सांसं
१२२

लसत्त्वात् अर्थतः सुखादिसामानाधिकरण्यपर्युदासादिषु सिद्धमिति वाच्यं । अन्यनिष्ठत्वा
नादिनान्यत्र सुखादिजनने चैत्रेण दृष्टे विहितनिषिद्धकर्मकरणे वा मैत्रस्य सुखादि
प्रसंगेन न तथोक्तैः एवं भवान् । अत एवात्मान्तरगुणानामात्मान्तरगुणेषु कारणत्वादिति नि
त्रेण तथैव प्रतिपादनात् । ननु धर्माधर्मयोः प्रमाणाभावात् तत्रात्मगुणत्वकथनमसंग
तमेवेति चेन्न चिरध्वस्तस्य यागादेः कालान्तरभाविफलजनकत्वव्यापारं विनानु
पपत्त्या मितस्यानुपपत्तिप्रतिसंधानात् तद्व्यापारसिद्धेः धर्माधर्मयोः पर्यवसानेन तत्सिद्धेरिति
एवं भावनाख्यसंस्कारोऽपि आत्मगुण एव अन्यथा तद्दृष्टस्य पतनापत्तेः । किं च व्याप्तिसिद्धेर्नैव
वेति व्याघातप्रसंगः । अत एवात्ममनसोः संयोगासंस्कारः तद्व्यासंगतिरिति निस्त्रेणामहर्षि
णापि संस्कारस्यात्मगुणत्वमुक्तं पुनश्चैतन्नान्यथा तस्यानुभवसामानाधिकरण्यानु राम
पपत्तेः । न च तस्य तथात्वाभावे का क्षतिरिति वाच्यं । अन्येनानुभूतस्यान्येनास्मरणेन १२२

स्यात्तथात्वस्यावश्यकत्वात्। एवं द्रव्यत्वात् नानात्मानो व्यवस्थात इति सूत्रार्थः। संख्याथ
मगुणाः सूत्रार्थस्तु बंधमोक्षव्यवस्थातो नानात्मान इति। अन्यथा आत्मैक्ये कोऽपि कश्चिन्मुक्तो
कश्चित्तबद्ध इति व्यवस्था न स्यादिति निष्कर्षः। अथवा। ऐश्वर्यानैश्वर्यव्यवस्थातो नानात्मा
न इति सूत्रार्थः। न चेश्वरे मानाभावान्नेत्येतिवाच्यम्। ईश्वरे साधकप्रमाणस्य प्रागुपद
र्शितत्वात्। अथवा। कश्चित्सुखी कश्चिद्दुःखीति व्यवस्थातो नानात्मान इति सूत्रार्थः।
अन्यथा योऽहं देवदत्तः सुखी सोऽहं यज्ञदत्तो दुःखीति प्रतिसंधानं स्यादिति॥ न चात्मनो ना
नात्वे एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन इत्यात्मैकत्वप्रतिपादकश्रुतिविरोध
इति वाच्यम्। मुमुक्षूणां संघं विहायात्मनिष्ठेन भवितव्यमित्यत्र तथाविधश्रुतेस्तात्पर्या
पपत्यभावात्। एवं एतत्क्रमप्राप्तमात्मगुणाः तस्य संख्याव्यापकतया संख्यापात्तत्र तत्सिद्धे
एवं परिमाणमपि आत्मगुणः द्रव्यत्वादेव तत्र तत्सिद्धेः। न च परममहत्त्वं बोध्यं॥ अत्रे

सां सं ११८

विभवान्महानाकाशस्तथा चात्मेति सूत्रेण महर्षिणापि तथैवोक्तं। अस्त्रार्थस्तु यथा विपु
त्वात्परममहत्त्वाश्रय आकाशः विभुत्वादात्मापि परममहत्त्वाश्रय इति। न चात्मनो विभुत्वे
मानाभाव इति वाच्यं। तस्य तदन्यगाकाशे पत्र पत्र शरीरं गच्छति तत्र तत्र सुखदुःखादी
नामनुपलम्भापत्तेः। न च शरीरे गतात्मा आत्मापि तत्र गच्छतीति वाच्यं। आत्मनो ऽमूर्त्तत्वेन ग
तेरसंभवात्। न चात्मनो ऽमूर्त्तत्वे मानाभाव इति वाच्यं। तस्य मूर्त्तत्वे ऽल्पत्वस्य सावयवत्व
स्य वा प्रसंगात्। तत्र चाद्ये आत्मनो ऽल्पत्वस्याहितापि। निरंशत्वस्य भंगे ऽनित्यापत्तेरप्र
संगात्। न चात्मनो निरंशत्वे ऽपि विहर इति वाच्यम्। आत्मनो निरंशत्वे गगनाकारे जातमा
त्रस्योत्पत्तिनाशनियमानुपपत्तेः। भवन्मते जातमात्रस्यात्मनोपि जातत्वेनापि तज्जनकाभूतस्य
साधनता स्मरणस्य तत्रासंभवात् तदा न भवन्मते ऽप्यल्पत्वेनानुभवात्मकत्वादृशज्ञान राम
स्याप्यसंभवात्। एवं च विभुत्वादात्मा नित्यः स्पर्शादिगुणशून्यः सिद्धः। अत एवात्ममनःसंयोगादात्मप्रसत्तिम ११८

128

स्यपि संगच्छते।ऽन्यथा तत्र मनःसन्निकर्षस्यासंभवेनात्ममानसाऽनुपपत्तेः। संयोगाविना
शकत्वेन तत्र विभागोपि सिद्धः। अन्यथा संयोगस्य तत्र नित्यत्वापत्तेः। नित्यत्वे तु संयोग
स्य विभागनाश्यत्वनियमादिति। एवं च संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसु
खदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्याश्चतुर्दश गुणा आत्मन इति। अदृष्टानामदे
धर्म्मयानिरूप्यते॥ तत्र मनस्त्वाख्याजातिः नेष्टधर्म्मः। तत्रापि तेन तद्वितरभेदानुमानसंभ
भवात्। न च मनस्त्वजातौ मानाभावान्नैवमिति वाच्यम्। जन्यज्ञानादिकं प्रति मनःसंयो
गस्यासमवायिकारणतया तदवच्छेदककोटिप्रविष्टत्वेन मनस्त्वाख्यजातिसिद्धेः। य
द्वि जन्यज्ञानादिकं प्रति मनस्त्वघटितोपदर्शितधर्म्मेण मनःसंयोगस्य न हेतुत्वं मनः
प्रतियोगिकत्वसंयोगत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारण
भावानन्त्यात्। किं तु विजातीयसंयोगत्वेन तस्य तत्र हेतुत्वं वाच्यमतो यावेनोपदर्शितरूपेण।

सा सं मनस्त्वसिद्धिरिति विभाव्यते तदा विनिगमनाविरहेण विजातीयसंयोगसंबंधेन मनस्त्वेना-
१२८ पि हेतुतापात्‌ आवश्यकत्वपात्‌ तदवच्छेदकत्वेनैव मनस्त्वजातिसिद्धिरित्यवधेयम्। वस्तुत-
स्तु शरीकत्वावच्छेदकत्वपापि जातिसिद्धेर्भवस्थापि तत्तदा नहू धर्मस्य चेतापोमनस्त्वस्य
129 तथात्वोल्कात्तेनुमुच्चितं। तदेव न पश्यामः इति चेन्न देवदाहि। जन्यभावस्य समवायिकारण-
त्वनियमेन जन्यज्ञानादिकं प्रति किंचित्समवायिकारणमवश्यं वाच्यमात्मा तत्र मनःसं-
योग एव असमवायि तन्निर्बंधनाशकत्वात्। तथा च तदन्यथानुपपत्त्या अतिरिक्तं मनःसि-
द्धिः। अथवा नानेंद्रियाणां स्वविषयसंबंधसत्वेनानाज्ञानयोगपद्यापत्तिवारणाय मनसो-
ऽभ्युपगम आवश्यकः। तदभ्युपगमे कथं नहि ज्ञाणायमित्यत्र तेनाशंकनीयम्। यतस्तथा-
सति तत्तदिंद्रियजन्यप्रसक्तं प्रति तत्तदिंद्रियमनोयोगानां हेतुताकल्पनसंभवेनात्र एम
य मनःसिद्ध एकदापरस्परविप्रकृष्टदेशास्थितनानेंद्रियसंयोगासंभवेन कारणबाधेन १२८

तथाविधापत्तेर्वारणासंभवात् न चैकदा ज्ञानद्वययौगपद्यानंगीकारे दीर्घशष्कुली
भक्षणादावेकदा रूपरसादिविषयकनानाविधज्ञानोत्पत्त्यनुपपत्तिरिति वाच्यं तत्रा
पि क्रमशालिनां ज्ञानानामभ्युपगमेनानुपपत्त्यभावात् न चैवं सति कथं तत्र नानाज्ञानयु
गपद्यानुभव इति वाच्यं ॥ मनसस्त्वाशुसंचारात् एतत्सत्त्वेऽपि तत्र ज्ञानोत्पत्तिक्रमो न लक्ष्य
त इति तथाविधानुभवस्य भ्रमत्वात् अन्यथोत्पत्त्यभावात् तथा च पारमर्षं सूत्रं अला
तचक्रदर्शनवत्तदुपलब्धिराशुसंचारात् इति ॥ न चैकदा ज्ञानद्वयजनकादृष्टाभावा
द्वा ज्ञानद्वययौगपद्यापत्तिवारणासंभवे तद्वारणार्थं मनसोऽभ्युपगमो निरर्थक इति वाच्य
म् ॥ कार्यं प्रति अदृष्टस्य हेतुत्वे सामग्रीसंपादकत्वेनोपयोगितया दृष्टकारणसत्त्वे अ
दृष्टाभावासंभवे न तथोक्तासंभवशङ्कितत्वात् एवं क्रमेण सिद्धस्य अत्र मनसो
द्रव्यत्वेन गुणवत्त्वासिद्धावष्टावेवेते संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापर

तासं त्वसंख्याभेदादव्याप्याः। नन्वत्र ज्ञानयौगपद्यादेकं मन इति सूत्रेण एकैकशरीरे एकैकं मनः सि
१३० द्ध्यति तस्य संख्यासिद्धिः न च पुत्रभावेन सूत्रमप्रयोजकमिति वाच्यम्। एकस्मिन् शरीरे
नानामनःस्वीकारे एकदा नानामनोभिः सह नानेन्द्रियसंयोगसंभवेन ज्ञानद्वययौग
130 पद्यापत्तिरूपतर्कसंभवेन तथाविधसूत्रस्य सप्रयोजकत्वात्॥ संख्यायाः पृथक्त्वे
व्याप्यत्वात्तत्रैव पक्षाभ्युपगमः। तदभावादणु मन इति सूत्रान्मनसोऽणुपरिमा
णसिद्धिः सूत्रार्थस्तु विभुत्वाभावान्मनसोऽणुत्वमिति। न च तत्र विभुत्वाभाव एवासि
द्ध इति वाच्यम्। मनसो विभुत्वांगीकारे इन्द्रियाणां स्वस्वविषयैः सह सन्निकर्षसत्त्वे मन
सा सहापि एकदा नानेन्द्रियसन्निकर्षसंभवादेकदा नानेन्द्रियजन्यज्ञानापत्तेर्दु
रत्वात्तत्रैतदंगीकारस्यावश्यकत्वादिति॥ अथ नानेन्द्रियाणां स्वस्वविषयैः सह सन्नि एम
कर्षसत्त्वे नानेन्द्रियजन्यज्ञानानामेकदा सन्निस्वीकारे बाधकाभावेन मनसो विभुत्वे १३०

णीकारेनतद्व्यापकंानचतत्प्रापिमनसोविभुत्वात्सुषुप्तिकालेत्वङ्मनोयोगवि
रहेणज्ञानानुत्पत्तिरित्यसंगतंमवेत॰नह्यात्मनामपिविभुमनसासहविप्रकृष्टदेशस्थि
तत्वात्वच॰संयोगसंभवादितिवाच्यम्।यतोमनसोविभुत्वेसुषुप्तिकालेत्वङ्मनोयो
गविरहेनज्ञानोत्पत्तिरितिब्रूमः।अपितुविषयेंद्रियसन्निकर्षाणांविजातीयसंयो
गत्वादिनाहेतुत्वकल्पनस्यावश्यकतयातदभावेनतत्रज्ञानानुत्पत्तिरितिकिमनुप
पन्नम्।नचविषयेंद्रियसन्निकर्षाणांविजातीयसंयोगत्वादिनाहेतुत्वेमानाभाव
स्तेवमितिवाच्यम्।घटादौचक्षुःसंयोगत्वकसंयोगसत्वेघटादिस्पार्शनत्वापत्तेणायस्पार्श
नेप्रतिचात्वक्संयोगस्यसामग्रीत्वेनप्रतिबंधकतावत्मनापिस्याविषयेंद्रियसन्निकर्षस्य
विजातीयसंयोगत्वादिनाहेतुताकल्पनस्योचितत्वोनानन्यथासतितत्रस्पार्शनाप

सा॰मं॰ 
१३१ 
131

त्रिःकारणस्य फलबलकल्प्यत्वपक्षे फलाभावेन न तत्र विजातीयत्वकं संयोगो नाभ्युपग
म्यते न च तथापि ज्ञानाद्यसमवायिकारणात्ममनःसंयोगानुपपत्तिर्विभुद्वयसंयो
गानभ्युपगमादिति वाच्यम् । विभुद्वयस्याजसंयोगाभ्युपगमात् अत एव मनसो विभु
त्वांगीकारे शब्दश्रावणकारणीभूतश्रोत्रमनोयोगानुपपत्तिरिति विपरीतम् । अज
संयोगाभ्युपगमेनानुपपत्त्यभावादिति चेदत्र ब्रूमः । मनसो विभुत्वांगीकारे तत्र स
र्वसंयोगत्वलक्षणधर्मिकल्पने गौरवात् अणुत्वकल्पने तु न तथेति अणुत्वमेव त
त्र कल्प्यते । दीर्घशष्कुलीभक्षणादौ रूपरसादिविषयकनानाज्ञानेषु यौगपद्य
प्रतीतिस्तु एवं संपादितैव मनसोऽणुत्वकल्पेऽपि न चैवं सति दीर्घशष्कुलीभक्ष एम
णादौ नानेन्द्रियजन्यज्ञानानि न स्युः घ्राणनानेन्द्रियाणां स्वस्वविषयैः सन्निकर्षसत्त्वे १३१

श्री

कदाचिदेकेंद्रियमात्रजज्ञानोत्पत्तिस्तु तावन्मात्रविषयकेच्छावशादित्यादि धीधि
कृद्भिः समंगतमिति वाच्यम् । तावतास्तेरभावात् । यत्तु मनसो नानात्वमपि हि लाघवा
दिशा एकत्वात् सततुनावमानासिनापसर्पणादिचेष्टाविशेषाडुत्पद्यते । नहि स्वविभुनी
एकेनानेकाधिष्ठानं संभवतीति मनसो विभुत्वमवश्यमुपेयमिति तदसत् । तद
एकदेशस्य चपरिच्छिन्नत्वस्य उपगृहीतात्मनः कारणान्तरवशाद्धृतान्यथाविधशरीरके भ्रामयत्येनो
तदनुरोधेन मनसो विभुत्वानंगीकारादिति । तस्मादणुपरिमाणमेव मनसि न विभु
त्वं न स्वल्पमवश्यमुपगंतव्यम् । अत एव तदभावान्मनसोऽणुत्वमिति सर्वमविप्र
तिक्रिकमिति ध्येयम् । संयोगविभागासिद्धिस्तु मनसः । अपसर्पणामुपसर्पणम्

सास· शिनतत्पात्तसंयोगाभ्कार्प्यीनताएसंयोगाश्चादृष्टकारितारतिसत्वात्ता। अत्रापसर्पणपूर्वका
१३२ रणविभागहेतुमनःकर्मोपसर्पणंतत्र एसंयोगहेतुमनःकर्मबोध्यम। मूर्त्तत्वात्परत्वापर
वेगाख्यसंस्कारा एमनसि सिद्धा इति मूर्त्तत्वं तस्य कथं सिद्धमिति तु नाशंकनीयम्। अणुपदर्शि
तरीत्या विभुत्वाभावादेव तस्य तत्सिद्धेः। मनसो मूर्त्तत्वेन द्रव्यत्वसिद्धिरप्यवाधिया। द्रा
धितिकृतस्तु। मनो न पदार्थान्तरं अपितु असमवेतं। तन्नु प्राचीनमते परमाणुर्नवा
नमतेत्रसरेणुर्द्वि नि मनसोऽष्टमात्रगुणावत्वं निर्युक्तिकमित्याहुः॥ ॥ इतिश्रीयु
तमहामहोपाध्याय हरिरामतर्कवागीशभट्टाचार्य्यशिष्यश्रीपुत्ररघुदेवभट्टाचा
र्य्यविरचितो द्रव्यसारसंग्रहः। समाप्तः॥ ग्रंथ॥ संख्याः॥ ३१०० ॥ राम॥ राम॥ श्री राम
राम॥ शुभमस्तु॥ संवत १८२८ मिति कुआर वदी १ ॥ केषोच्चीशपुराणेभरथि १३२